श्रीजिनदत्तसूरिप्राचीनपुस्तकोद्धार-फण्ड ग्रन्थाङ्कः २७

॥ अर्हम् ॥

श्रीनवाङ्गीवृत्तिकारश्रीमज्जिनअभयदेवसूरिशिष्यश्रीमज्जिनवल्लभसूरिविरचितम्।

# द्वादश-कुलकम्।

श्रीमज्जिनपतिसूरिशिष्यप्रवरपण्डितउपाध्यायश्रीमज्जिनपालगणिकृतविवरणसमेतम्।

जैनाचार्यश्रीमज्जिनकृपाचन्द्रसूरीश्वराणाम् सदुपदेशेन सुरतनिवासी जह्वेरी-कल्याणचन्द
पुत्र प्रेमचन्दस्य-धर्मपत्नी "रतनबेन" नाम्न्या द्रव्यसाहाय्येन
प्रकाशक-श्रीजिनदत्तसूरि-ज्ञानभंडार, मुंबई-महावीरस्वामिमंदिर ॥
इदं पुस्तकं जैनाचार्यश्रीमज्जिनकृपाचन्द्रसूरीश्वराणां शिष्येण प्रवर्त्तकमुनिसुखसागरेण संशोधितम्।

प्रतयः ७५० | विक्रमनृपस्य संवत् १९९०. | सन १९३४.

Published by Javeri Mulchand Hirachand Bhagat, for Jinadattasoori Jnan Bhandar,
Mahaveer Swami's Temple, Pydhany, Bombay.

Printed by Ramchandra Yesu Shedge, at the Nirnaya Sagar Press, 26-28, Kolbhat Lane, Bombay.

पुस्तकप्राप्तिस्थानम्

१ कल्याण भुवन मु० पालीताणा.

२ महावीर स्वामीनुं देरासर पायधुनी. मु० मुंबई.

# प्रस्तावना ।

श्रीदानादिधर्मैकनिष्ठाः परोपकरणशीला मोक्षाभिलाषिणो महाशयाः ! सुविदितमेतद् हेयोपादेयधर्माधर्मादरणीयानादरणीयतत्त्वातत्त्वादिविवेकनिपुणानां विदुषां, यदुत आधिव्याध्युपाध्यात्मकत्रिविधतापाभितप्तानामसुमतां निरन्तरदुःखैकपूर्णे चतुर्गतिरूपसंसारमरुपथे भ्रमतां विना निर्वृतिं नास्ति निवृत्तिः । सा च ज्ञानक्रियाभ्यामेव । ते च वीतरागवाण्यैव । सा च चतुर्विधा द्रव्यानुयोगगणितानुयोगचरणकरणानुयोगधर्मकथानुयोगभेदात् । अयं च ग्रन्थश्चरणकरणानुयोगान्तर्वर्ती सर्वविरतदेशविरतसम्यक्त्ववन्मार्गानुसार्यादिसर्वसन्मार्गगामिहितकरः श्रीनवाङ्गवृत्तिकारश्रीमदभयदेवसूरीश्वरपट्टसुवर्णशैलभास्कर—श्रीजिनवल्लभसूरिभिर्ग्रथितो नानाप्रकारछन्दःसमलङ्कृतो धर्मोपदेशवैराग्यरसतरङ्गतरङ्गिणीसमो द्वादशकुलकनामा ।

सूरिपादाश्चेमे कदा भरतावनीमलञ्चक्रुः ? के तेषां गुरवः ? किं चाधीतं तैः ? इत्यादि जिज्ञासायां विस्तृततच्चरितार्थिना वि० सं० १२९५ वर्षे सुमतिगणिविरचिता गणधरसार्धशतकबृहद्वृत्तिर्विलोकनीया । तत्संक्षेपश्चायम्—

**आसिकाभिधानदुर्गनिवासी** चैत्यवासी **कूर्चपुरीयो जिनेश्वराचार्य** आसीत् । तत्रत्याः श्रावकपुत्रा बहवस्तन्मठेऽपठन् । तेषु च कश्चिन्मृतपितृको मातृवत्सलो **जिनवल्लभ**नामा श्राद्धपुत्रोऽतीव बुद्धिमानासीत् । तं निपुणं भाग्यवन्तं शासनोद्दीपकं भाविनं विलोक्य तन्मातरं सामदानाभ्यां प्रबोध्य शिष्यतया स गृहीतः । व्याकरणकाव्यच्छन्दोऽलङ्कारनाटकज्योतिर्मन्त्रतन्त्राद्यशेषविद्यानिपुणं कृत्वा तं सिद्धान्ताध्ययनाय **श्रीपत्तने स्थितानां श्रीअभयदेव**सूरीणां पार्श्वे प्रैषीत् । सूरिपादैश्च योग्यतां ज्ञात्वा सर्वोऽपि सिद्धान्तोऽध्यापितः ।

एवं च गृहीतसिद्धान्तवाचनः सिद्धान्तोक्तक्रियासम्यगनुष्ठानबद्धमानसः समधिगतसस्फूर्तिज्योतिषः स्वगुरोः समीपे गमनाय मुत्कलवचनं प्रतीच्छति, तदा प्रभुभिरभिहितम्–'वत्स ! सिद्धान्तोक्तसाधुसमाचारस्तावत्समस्तोऽपि त्वयावगतोऽतस्तदनुसारेण यथा वर्तसे तथा विधेयम्'। श्रीजिनवल्लभगणिना पादयोर्निपत्य भणितम्–'यथा श्रीपूज्यपादा आज्ञापयन्ति तथैव निश्चितं प्रवर्तिष्ये' इति। ततोऽसौ स्वगुरुसमीपे गन्तुं प्रवृत्तः, प्राप्तो माइयडग्रामे आसिकादुर्गादर्वाक् क्रोशत्रये स्थितः। तत्र कञ्चित्पुरुषं प्रेष्य गुरुं स्वमिलनायाजूहवत्। गुरुः 'किमिति सोऽत्र नागतः' इति वितर्कयन् सर्वलोकसमुदायसहितः समायातः, संमुखं गत्वा तेनापि वन्दितः। कुशलवार्ता जाता। गुरुणा पृष्टं–'किमिति त्वं नागाः' ?। तेनाभिहितम्–'भगवन्! सुगुरुमुखाज्जिनवचनामृतं पीत्वा कथमधुना दुर्गतिगुहावात्मनः समुपचितपापं चैत्यवासं विगर्ह्यमाणकं सेवितुमिच्छामि' ? ततो गुरुणा भणितम्–'भो जिनवल्लभ! मयेदं चिन्तितमासीत् यत्तुभ्यं स्वपदं दत्त्वा त्वयि स्वगच्छदेवगृहश्रावकादिचिन्तां निवेदय पश्चात्स्वयं सद्गुरुपार्श्वे वसतिमार्गमङ्गीकरिष्ये'। ततो जिनवल्लभगणिना विकस्वरवदनारविन्देन भणितम्–'भगवन्! अतीव शोभनमेतत्, विवेकस्य हीदमेव फलं, यद् हेयपरित्यागेनोपादेयमुपादीयते। तर्हि समकमेव सुगुरुसमीपे गम्यते'। गुरुणा ईषन्निःश्वस्य प्रत्यपादि यदुत–'वत्स! ईदृशी निःस्पृहता नास्त्यस्माकं यया चिन्ताकरणसमर्थं पुरुषं विना स्वगच्छदेवगृहवाटिकादिचिन्तां मुक्त्वा सुगुरुपार्श्वे वसतिवासमङ्गीकुर्महे, अवश्यं भवता विधातव्यं वसतिवसनम्'। श्रीजिनवल्लभगणिः–'भगवन्! एवम्'। ततो गुरुर्व्याघुट्यासिकायां संप्राप्तः।

श्रीजिनवल्लभगणिरपि तत्संमत्या श्रीपत्तने विजहार। श्रीमदभयदेवसूरिपादा वन्दिताः प्रीणिताश्च। सूरयः स्वपदयोग्यं तं जानाना अपि कस्याप्यग्रे न कथितवन्तः। यतो देवगृहनिवासिशिष्य इति गच्छस्य सम्मतं न भविष्यतीति। ततो गच्छाधारकः श्रीवर्धमानाचार्यैः

स्वपदे निवेशितः, एकान्ते पुनः प्रसन्नचन्द्राचार्यो भणितः ‘मदीयपदे भव्यलग्ने जिनवल्लभगणिः स्थापनीय’ इति। ततो देवलोकं गताः श्रीमदभयदेवसूरयः।

ततो जिनवल्लभगणिर्गुर्जरत्रामेदपाटादिषु विहृतवान्। ते च सर्वेऽपि देशाः प्रायश्चैत्यनिवास्याचार्यैर्व्याप्ताः, सर्वोऽपि लोकस्तद्वासित एव तेन सद्ध्यानसदनुष्ठानसद्विद्यासदुपदेशादिना भाविज्ञानप्रभावादिना च प्रतिबोध्य वसतिवासमतानुरागीकृतः। चित्रकूटे कृतचातुर्मासिकजिनवल्लभगणिना भणितम्—“भोः श्रावकाः! अद्य आश्विनमासस्य कृष्णत्रयोदश्यां श्रीमहावीरदेवगर्भापहारकल्याणकं समागतम् “पंचहत्थुत्तरे हुत्था साइणा परिनिव्वुडे” इति प्रकटाक्षरैरेव सिद्धान्ते प्रतिपादनात्। ततोऽत्र दिने देववन्दना कार्या, सा च विधिचैत्ये कर्तव्या, तत्तु अत्र नास्ति, अतोऽत्रैव चैत्यवासिचैत्ये गत्वा यदि देवा वन्द्यन्ते तदा शोभनं भवति”। श्रावकैरुक्तम्—‘भगवन्! यद् युष्माकं संमतं तत् क्रियते’। ततो गुरुसहिताः सर्वे श्रावका गृहीतनिर्मलपूजोपकरणा देवगृहे गन्तुं प्रवृत्ताः, प्राप्ताश्च तत्र। तत्र स्थितयाऽऽर्यिकयाऽऽत्मघातप्रतिज्ञापूर्वकं तेषां प्रवेशो निषिद्धः। तदप्रीतिकं ज्ञात्वा पूज्या निवृत्य स्वस्थानं गताः। ततः श्रावकाणां वचनेन एकस्य श्रावकस्य गृहोपरि चतुर्विंशतिपट्टकं धृत्वा देववन्दनादि सर्वं धर्मकार्यं कृतम्।

केचित्तु चरमतीर्थंकरस्य पञ्च कल्याणकान्येव मन्यन्ते यथा—“पंच हत्थुत्तरे” इत्यत्र नक्षत्रसाम्याद् गर्भापहारो मध्ये गणितः, परं कल्याणकानि तु “साइणा परिनिव्वुडे” इत्यनेन सह पञ्चैव इति, तत्तु चिन्तनीयमेव पुष्टप्रमाणाभावात्। तथा च “पंचहत्थुत्तरे” इत्यादि वचनस्यान्यथा व्याख्यानात्।

वस्तुतस्तु **पंचहत्थुत्तरे**ति, व्याख्या—हस्तादुत्तरदिशि वर्त्तमानत्वात्, हस्त उत्तरो यासां वा, हस्तोपलक्षिता वा उत्तरा हस्तोत्तरा उत्त-

रफल्गुन्यः, बहुवचनं फल्गुनीशब्दस्य प्रायो बहुवचनान्तप्रयोगात्, यथा–"सिंहसुममघा पूर्वाफाल्गुन्यः पाद उत्तराणां च" इत्यादौ, प्रायोग्रहणात् कचित् हारिभद्र्यादौ 'हस्तोत्तरायाम्' इति दर्शनेऽपि न व्यामोहः। यत्तु कश्चित्–'बहुवचनं बहुकल्याणकापेक्षं' तदुपेक्षणीयमेव, प्रति फल्गुनीमेकैकहस्तमपेक्ष्य हस्ता उत्तरा यासामिति विगृह्य बहुव्रीह्यापत्तेरित्यादि।

अत्रेयं खण्डनप्रक्रिया–पूर्वं यद्भवतोक्तं 'बहुवचनं फल्गुनीशब्दस्य प्रायो बहुवचनान्तप्रयोगादिति', तदयुक्तम्, शब्दानुशासने पाणिनिना द्वित्वे विकल्पेन बहुत्वाभिधानात् प्रायोग्रहणं शब्दानुशासनानभिज्ञत्वमेव तव द्योतयति। हेमाचार्येणापि–'फल्गुनी योनिदेवता' इति पाठव्याख्यायां नाममालावृत्तावुक्तं। यद्वाचस्पतिः–'पूर्वफल्गुनी योनिदेवता'। शाब्दिकास्तु 'पूर्वफल्गुन्यौ पूर्वफल्गुन्य' इति मन्यन्ते, "फल्गुनी प्रोष्ठपदस्य भे" ( सिद्धहे० २–२–१२३ ) इति द्वित्वस्य वा बहुत्वविधानात्, तथा च तत्सूत्रम्–'अस्मदो द्वयोश्च' इति द्वित्वमनुवर्तते, फल्गुनी प्रोष्ठपदानां च नक्षत्रे, चकारः द्वयोरनुकर्षणार्थः फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च द्वयोर्नक्षत्रे बहुवचनमन्यतरस्यां भवति, कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः, कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदा इति। यत्तु कश्चित्–'बहुवचनं बहुकल्याणकेत्यादि' तदप्यनवबोधाविर्भावकं, बहुवचनं बहुकल्याणकापेक्षं, इदमेव घटते द्वित्वेऽपि बहुत्वमस्तीति तद्व्यवच्छेदाय, तद्व्यवच्छेदकस्य पञ्चेति पदस्य पञ्चाननवज्जागरूकत्वात्, 'पञ्चसु कल्याणकेषु हस्त उत्तरो यासां हस्तोत्तरा उत्तरफल्गुन्य' इत्युक्तं कल्पावचूरौ कुलमण्डनसूरिभिः। तथा प्रतिफल्गुनीमेकैकहस्तमपेक्ष्य हस्ता उत्तरा यासामिति विगृह्य बहुव्रीह्यापत्तेः इति भवदीयपाठे प्रतिफल्गुनीमित्यपपाठः, भवति च प्रतिफल्गुनीति अव्ययीभावात् अतिरिवत् इति। अर्थापेक्षया त्वयं दोषः—एकैकं हस्तमपेक्ष्य हस्ता उत्तरा यासामित्युक्तं, तत्रान्यपदार्थबहुत्वे किं समस्यमानपदानामपि बहुत्वं न्याय्यं? येन हस्ता उत्तरा यासामित्युच्येत? एवं च चित्रा

मार्गदर्शक -

गौर्येषामिति समासे एकगोस्वामित्वेऽन्यपदार्थापेक्षया चित्रा गाव इति प्रसक्तं स्यात्। तथाऽवधिमतो बहुत्वे किमवधेरपि बहुत्वेन भाव्यं? हस्तादुत्तरस्यां दिशि उत्तरफल्गुनीनां विद्यमानत्वेन किं हस्तस्यापि बहुत्वं घटमानं? ध्रुवाद् ध्रौव्येण तत्तद्दिगाद्युपलक्षितमन्दिरादिवस्तुवृन्दं वर्तत इति किं मन्दिरादिवस्तुबाहुल्ये ध्रुवस्यापि बाहुल्यं केनचित् परिकल्प्येत? ततो नैवंविधो विग्रहाश्लिष्टो विग्रहकारी बहुव्रीहिरुदयमासादयेदिति कुतस्तदापत्तिविपत्तिः? इति। तथा चतुर्णां च्यवनादीनां कल्याणकत्वं गर्भापहारस्य नेति कुत उपलब्धिः? 'पंचहस्तोत्तरो भगवान्-भूत' इति कथनात्, भवनं तु सर्वत्रापि समानमेव, यदि चत्वारि कल्याणकानि तदा भवतोऽनिष्टोऽप्ययं गर्भापहारः कल्याणकत्वेन समापतित एव, 'सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यभाव एव' इति महाभाष्योक्तेः यदि गर्भापहारस्याकल्याणकत्वं तदा तन्मिश्रितत्वात्तदन्येषां चतुर्णामप्येषामकल्याणकत्वं बलादायातम्। अपि च यद्याश्चर्यभूतत्वेन न मन्यसे गर्भापहारे कल्याणकत्वं तर्हि मल्लिस्वामिनोऽपि स्त्रीत्वे तीर्थकृत्त्वं न स्वीकरणीयम् आशाम्बरवत्, तत्राप्याश्चर्यभूतत्वस्य समानत्वात्, तदुच्छेदे च तव गर्भस्रावेणेव गलिता तमधिकृत्य पञ्चकल्याणकव्यवस्था। तथा भवद्गुरुणा कुलमण्डनाचार्येणापि समं भवतो विरोधो दुर्निरोधः समापन्नः, तेन हि पञ्चानामपि कल्याणकत्वं स्वीचक्रे त्वया च प्रतिषिध्यते, अहो! गुरुशिष्ययोर्वर्यं पारंपर्यम्। अथ गर्भापहारे च्यवनादिवस्तुचतुष्कवत् कल्याणकत्वव्यवस्थापिकामनेकशास्त्रसंमतिं दर्शयामः—पत्तनज्ञानकोशे ताडपत्रपुस्तिकायां चन्द्रकुले श्रीशीलभद्रसूरितच्छिष्यधर्मघोषसूरितच्छिष्ययशोभद्रसूरितच्छिष्य-देवसेनगणितच्छिष्यपृथ्वीचन्द्रसूरिकृते पर्युषणाकल्पटिप्पनके "हस्त उत्तरो यासां ताः, बहुवचनं बहुकल्याणकापेक्षं, योगश्चन्द्रेण सह संबन्धः" ॥ १ ॥ तथा श्रीविनयेन्दुसूरिणा श्रीपर्युषणाकल्पाध्ययननिरुक्ते श्रीविक्रमात् तत्त्वगुणेन्दु ( १३२५ ) वर्षनिर्मिते—'ते णं काले णं ति' तस्मिन् काले यः पूर्वतीर्थकरैः श्रीवीरस्य च्यवनादिहेतुर्ज्ञातः कथितश्च यस्मिन् समये तीर्थकरश्च्यवति स एव समय उच्यते,

समयः कालविचारणार्थः, यतः कालो वर्णोऽपि, तथा हस्त उत्तरो यासां ता हस्तोत्तरा उत्तरफल्गुन्यः, बहुवचनं बहुकल्याणकापेक्षं, तस्यां हि विभोश्च्यवनं गर्भाद्गर्भसंक्रान्तिः जन्म व्रतं केवलं चाभवन् निर्वृतिस्तु स्वातौ ॥ २ ॥ तथा दशाश्रुतस्कन्धाष्टमाध्ययनचूर्णौ—"ते णं काले णं तेणं समएणं जो भगवता उसभसामिणा सेसतित्थगरेहि य भगवतो वद्धमाणसामिणो चवणादीणं छण्हं वत्थूणं कालो णातो दिट्ठो वागरिओ य, तेणं काले णं ते णं समए णं ति", कालान्तर्गतः समयः, समयादिश्च कालः, सामण्णकालतो एस विसेसकालो स यतो हत्थस्स उत्तराओ हत्थुत्तराओ गणणं पडुच्च हत्थोत्तरो जासिं ताओ हत्थुत्तराओ उत्तरफग्गुणीओ बहुपक्खेणं ति । यच्च वर्धमानस्वामिनः पञ्चाशकवृत्तौ अस्मद्गुरुभिः श्रीअभयदेवसूरिभिः पञ्चैव कल्याणकानि उक्तानि, तथाहि—"सेसाण वि एवं चिय नियनियतित्थेसु विण्णेया ॥ ३६ ॥" शेषाणामपि, न वर्धमानस्यैव ऋषभादीनामपि वर्तमानावसर्पिणीभरतक्षेत्रापेक्षया, एवमेव इह तीर्थे, वर्धमानस्येव निजनिजतीर्थेषु स्वकीयस्वकीयप्रवचनावसरेषु, विज्ञेयानि ज्ञातव्यावसरेषु ज्ञातव्यानि, मुख्यवृत्त्या विधेयतयेति । इह च यान्येव गर्भादिदिनानि जंबूद्वीपे भारतानामृषभादिजिनानां तान्येव सर्वभारतानां सर्वैरवतानां, च यान्येव च एतेषामस्यामवसर्पिण्यां तान्येव च व्यत्ययेनोत्सर्पिण्यामपीति गाथार्थः । "पंच महाकल्लाणा सव्वेसि जिणाण नियमेण" इति, तन्नियमविधायकं वचः पञ्च भवन्त्येव न न्यूनानीति न्यूनत्वस्याविद्यमानत्वात्, न चाच्युतस्य जन्म, न चाजातस्य दीक्षा, न च तीर्थकृतो दीक्षामप्रतिपन्नस्य केवलं, न च तदभावे मुक्तिः, इत्यतो न्यूनत्वाभावे नियमः, आधिक्ये तु नियमो नास्ति, साक्षादवलोक्यमानत्वात्तस्य, यदत्र वीरस्य षष्ठे कल्याणके विशेषरूपे विद्यमानेऽपि पञ्चकल्याणकप्रतिपादनं तदतिदेशार्थम्, उभयसाधारणपदापेक्षत्वादतिदेशस्येति । यथा श्रीपञ्चमाङ्गे—"जति णं भंते ! सक्के देविंदे देवराया जाव महिड्ढीए जाव एवइयं च णं पभू विकुव्वित्तए, ईसाणे णं भंते ! देविंदे देवराया के महिड्ढीए ? एवं तहेव त्ति"। अत्र एवं तहेवत्ति, अनेन यद्यपि शक्रसमानवक्तव्य-

मीशानेन्द्रप्रकर्णं सूचितं, तथापि विशेषोऽस्ति, स चायम्—"से णं अट्ठावीसाए विमाणवाससयसहस्साणं असीए सामाणियसाहस्सीणं जाव चउण्हं असीईणं आयरक्खदेवसाहस्सीणं ति" । यथा वा स्थानाङ्गे—पञ्चहत्थुत्तरो वीरो' इत्युक्त्वा किं स्वातौ वीरनिर्वाणकल्याणकाभावः प्रतिपादितः ? किं त्वेकैकनक्षत्रोत्पन्नपञ्चपञ्चकल्याणकप्रतिपादनाधिकारात् सदपि षष्ठं वीरनिर्वृतिकल्याणकं नोक्तं, तद्वदत्रापि न दोषः ॥३॥ तथा संदेहविषौषध्यां श्रीजिनप्रभसूरिकृतायाम्—"पञ्चसु च्यवनगर्भापहारजन्मदीक्षाज्ञानकल्याणकेषु हस्तोत्तरा यस्य स तथा ॥ ४ ॥ तथा कुलमण्डनसूरिकृत् कल्पावचूरौ—"पञ्चसु कल्याणकेषु हस्त उत्तरो यासां हस्तोत्तरा उत्तरफल्गुन्यः ॥ ५ ॥ तथा श्रीस्थानाङ्गे पञ्चमस्थाने प्रथमोद्देशके—"पउमप्पभस्स चित्ता मूलो वण होइ पुप्फदंतस्स । पुव्वाइं ते आसाढा सीतलस्स उत्तर विमलस्स भद्दवया ॥१॥ रेवतिता अणंतजिणो पुसो धम्मस्स संतिणो भरणी। कुंथुस्स कत्तिताओ अरस्स तह रेवतीतो य ॥२॥ मुणिसुव्वयस्स सवणो आसिणि णमिणो य नेमिणो चित्ता । पासस्स विसाहा उ, पंच य हत्थुत्तरो वीरो ॥ ३ ॥ समणे भगवं महावीरे पञ्चहत्थुत्तरे होत्था, तं जहा—हत्थुत्तराहिं चुए, चइत्ता गब्भं वक्कंते, हत्थुत्तराहिं गब्भाओ गब्भं साहरिए, हत्थुत्तराहिं जाए, हत्थुत्तराहिं मुंडे भवित्ता जाव पव्वइए, हत्थुत्तराहिं अणंते अणुत्तरे जाव केवलवरनाणदंसणे समुप्पण्णे" । अत्र गर्भापहारस्यान्यचतुष्कसमतोद्देशेन कल्याणकत्वं स्वत एव निर्व्यूढम् ॥ ४ ॥

अत्र केचित्प्रतिपादयन्ति—प्रथमतीर्थकरस्य उत्तराषाढासु जंबूद्वीपप्रज्ञप्त्यां राज्याभिषेक उक्तः, सोऽपि कल्याणकत्वेनास्तु, मैवम्, तस्य मासतिथ्योरनुक्तत्वात् कस्मिन्मासे कस्मिन् ( कस्यां ) तिथावाराधनं कुर्मः ? गर्भापहारे च आवश्यकनिर्युक्तौ मासतिथिनक्षत्राणामुक्तत्वादाराधनं घटते । अन्यच्च राज्याभिषेकस्य कल्याणकत्वं यदि स्यात्तदा पञ्चोत्तराषाढासु पञ्चवस्तूनामेवासुक्तत्वात् स्थानाङ्गे किमिति पञ्चमस्थानके पद्मप्रभादिवदेकनक्षत्रेऽस्याऽपि प्रतिपादनं नाकारि समानयोगक्षेमत्वात् ? । तथाऽन्येषामपि तीर्थकृतां राज्याभिषेक उक्तोऽस्ति, परं न कल्या-

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज



णकत्वेन न्यगादि । जंबूद्वीपप्रज्ञप्त्यामयं पाठः—“ उसभे णं अरहा पंच उत्तरा अभीइ छट्ठे होत्था, तं जहा—उत्तरासाढाहिं चुए, चइत्ता-गब्भं वक्कंते, उत्तरासाढाहिं जाए, उत्तरासाढाहिं रायाभिसेयपत्तो , उत्तरासाढाहिं मुंडे भवित्ता अगाराओ अणगारियं पव्वइए, उत्तरासाढाहिं अणंते जाव समुप्पण्णे, अभीइणा परिनिव्वुए” । तथा आगमिकश्रीजयतिलकसूरिविरचिते सम्यक्त्वसंभवनाम्नि महाकाव्ये सुलसाचरिते सम्यक्त्वपरीक्षणनाम्नि षष्ठे सर्गे–“सिद्धार्थराजाङ्गजदेवराज ! कल्याणकैः षड्भिरिति स्तुतस्त्वम् । तथा विधेह्यान्तरवैरिपट्टं, यथा जयाम्याशु तव प्रसादात् ॥ ५० ॥ इति स्तुत्वा जिनाधीशं, त्रिः प्रणम्याम्बडो मुनिः । विस्मितास्यः सभा(मा)सीनोऽश्रौपीत्तद्धर्मदेशनाम् ॥ २ ॥” इति ॥ ७ ॥

तथा श्रीजिनदत्तसूरिभिरप्युक्तम्–“गब्भापहारकल्लाणगं पि न हु होइ वीरस्स” इत्युत्सूत्रम् ।

तथा सङ्घपट्टकबृहद्वृत्तौ–“क्षुद्राणां लिङ्गिनामाचीर्णानि सिद्धान्तोक्तमपि श्रीमहावीरस्य षष्ठं गर्भापहारकल्याणकं लज्जनीयत्वान्न कर्तव्यम् इत्यादिका आचणाः इति । तदेवं सिद्धान्तपक्षमुररीकृत्यापि तत्प्रतिक्षेपायोद्यच्छन् सतां कथं नोपहास्यतां यासि ? ॥ इत्यलमतिविस्तरेण ।

ततो विधिचैत्याभावे सीदतः श्रावकान् ज्ञात्वा गुरुभिः—

“जिनभवनं जिनबिम्बं, जिनपूजां जिनमतं च यः कुर्यात् । तस्य नरामरशिवसुख–फलानि करपल्लवस्थानि ॥ १ ॥”

इत्यादि देशनायामुपदिष्टम् । ततः श्रावकैर्विधिचैत्यद्वयं निर्मापितमित्यादि सदुपदेशेन, अनागतज्ञानेन, समस्यापूर्त्याद्यनेकविधशक्त्या चैभिर्गुरुभिः ब्राह्मणादयोऽपि वशमानीताः, धारानगर्यां च नरवर्मनृपात्सन्मानं प्राप्तः, विधिचैत्यस्थापनाऽपि स्थाने स्थाने कारिता । क्रमेण

श्रीमदभयदेवसूरिपदं सूरिपदेन विभूष्य शासनोद्दीप्तिकराः इमे श्रीजिनवल्लभसूरयः वि० सं० ११६७ कार्तिककृष्णद्वादश्यां रजनीचरमयामे पञ्चपरमेष्ठिमन्त्रपरावर्तनं कुर्वन्तः चतुर्थदेवलोकं प्राप्ताः ।

पूज्यपादैरेभिः सूक्ष्मार्थसिद्धान्त–विचारसारषडशीति–सार्धशतकाख्यकर्मग्रन्थ–पिण्डविशुद्धि–पौषधविधि–प्रतिक्रमणसामाचारी–सङ्घपट्टक–धर्मशिक्षा–प्रश्नोत्तरशतक–शृङ्गारशतक–नानाप्रकारविचित्रचित्रकाव्यसार–शतसंख्यस्तुतिस्तोत्रादिग्रन्था ग्रथिता विलोक्यन्तेऽधुनाऽपि। ( अस्य विवरणस्यादावन्ते चैतत्संक्षिप्तचरितस्य बीजं विवरणकर्त्रा प्रदर्शितम् )

विवरणकर्तारश्चास्य ग्रन्थस्य श्रीजिनपालोपाध्यायपादाः कदा जन्मदीक्षादि प्राप्नुवन्निति सम्यग्न ज्ञायते, परन्तु एतद्विवरणं सं १२९३ वर्षे कृतमिति एतत्प्रशस्तिगतसप्तमश्लोकात् स्पष्टं ज्ञायते तेषां सत्ताकालः । तथा एतत्कुलककर्तृश्रीजिनवल्लभसूरिपट्टधरशिष्य श्रीजिनदत्तसूरिस्तत्पट्टधरशिष्य श्रीजिनचन्द्रसूरिस्तत्पट्टधरशिष्य श्रीजिनपतिसूरेः शिष्यः श्रीजिनपालोपाध्यायः श्रीमज्जिनेश्वरसूरेः श्रीजिनचन्द्रसूरिपट्टधरस्य वाक्यादिदं विवरणं चकारेति स्पष्टमेतत्प्रशस्तौ । किं चास्य कृतिक्रमोऽपभ्रंशकाव्यत्रयीभूमिकायामित्थं लिखितः–

वि० सं० १२६२ वर्षे षट्स्थानकवृत्तिः । सनत्कुमारचक्रिचरितं सटीकं महाकाव्यम् ।
वि० सं० १२९२ वर्षे उपदेशरसायनविवरणम् । वि० सं० १२९३ वर्षे द्वादशकुलकविवरणम् ।
वि० सं० १२९३ वर्षे पञ्चलिङ्गीविवरणटिप्पनम् । वि० सं० १२९४ वर्षे चर्चरीविवरणम् ।
अज्ञातरचनासमयं स्वप्नविचारभाष्यादि ।

इत्यादि उपाध्यायपादानामेषां किञ्चिदधिकं चरितमपभ्रंशकाव्यत्रयीभूमिकायां दृश्यते इति तदर्थिभिस्तद्विलोक्यम् ।

अयं ग्रन्थो धर्मजिज्ञासूनामुपयुक्ततरोऽप्रसिद्धश्चेति श्रीखरतरगणनायक श्रीजिनकृपाचन्द्रसूरीश्वरोपदेशामृतधाराधौतचित्तया गुर्जरदेशभूषणसूर्यपुरवास्तव्य जहेरी प्रेमचन्द्रश्राद्धस्य धर्मपत्न्या श्रीमत्या "रतनबेन" नामधेयया स्वपरोपकारार्थं दत्तेन द्रव्यसाहाय्येन मुद्रापितः ।

अस्य च मुद्रणावसरे वीकानेरस्थश्रीजिनकृपाचन्द्रसूरिज्ञानभाण्डारात् पूज्यप्रवर्त्तकश्रीकान्तिविजयप्रसादेन वाडीपार्श्वनाथज्ञानभाण्डागाराद्, महोपाध्यायश्रीदेवविजयगणिशास्त्रागारात् प्राप्ता लिखितप्रतयस्तिस्रः शुद्धिविषय उपयुक्ततरा जाता, अतः प्रतिसाहाय्यकारिणामेषां महात्मनां महोपकारो मन्यते ।

अस्य ग्रन्थस्य प्रुफशोधने अस्मत् गुरुवर्यप्रवर्त्तक मुनि सुखसागर महाराजेन अतिपरिश्रमेण तथा च भावनगरनिवासि श्रीजैनधर्मप्रसारकसभाश्रयि शास्त्री जेठालाल हरिभाईत्यनेन कृतेऽपि दृष्टिदोषाच्छाद्मस्थ्यात्प्रमादान्मुद्रणयन्त्रदोषाद्वा यत्र यत्र स्खलितं दृक्पथमायात् तत्र विद्वद्भिर्महात्मभिः क्षमाधनैः सम्यक् संशोध्य ज्ञापनीया वयं यतो द्वितीयावृत्तिसमये तद्विषये यत्यते इति प्रार्थ्यते—

विदुषां वशंवदः

श्रीजिनकृपाचन्द्रसूरीश्वरचरणसरोजभृङ्गप्रवर्तक **श्रीसुखसागरशिष्याणुः** मङ्गलसागरो मुनिः

वि० सं० १९९० मार्गशुक्लपञ्चमी. पालीताणानगरे.

# विषयानुक्रमणिका ।


| विषयः | पत्राङ्कः |
|---|---|
| १ मङ्गलाचरणम् । मूलग्रन्थकर्तुः परिचयः प्रवरधर्मोपदेशप्रस्तावनाख्यं प्रथमं कुलकम् ... | १–१३ |
| २ सम्यग्ज्ञानपूर्वकं जीवित–धनादीनां चञ्चलत्वख्यापकं गुणवत्त्वभवनोपदेशकं च द्वितीयं कुलकम् | १४–२२ |
| ३ यौवनादिसांसारिकभावानां सोपमानमनित्यत्वख्यापकं तृतीयं कुलकम् ... ... ... | २२–३५ |
| ४ मनुष्यत्वादीनां दुर्लभत्वदर्शकम् अप्रमादोपदेशकं च चतुर्थं कुलकम् ... ... ... | ३६–४३ |
| ५ गुणस्थानप्राप्त्यप्राप्तिख्यापकं पञ्चमं कुलकम् ... | ४३–५६ |
| ६ लक्ष्म्यादिममत्वपरिहारपुरस्सरं धर्मश्रद्धाभिधायकं षष्ठं कुलकम् ... ... ... | ५६–५८ |
| ७ धर्मसामग्र्या दुर्लभत्वदर्शकं सप्तमं कुलकम् ... | ५८–६२ |
| ८ मिथ्यात्व–कषायादीनां स्वरूपम्, फलम्, तत्त्यागे चाऽप्रमत्ततोपदेशकमष्टमं कुलकम् ... | ६२–७२ |
| ९ सन्मार्गनिष्ठत्वोपदेशकं नवमं कुलकम् ... | ७३–८९ |
| १० कामाद्यान्तरवैरिदमनोपदेशकं दशमं कुलकम् ... | ९०–९६ |
| ११ क्रोधाद्यन्तरङ्गशत्रुपरिहारोपदेशकम् एकादशं कुलकम् ... ... ... ... | ९६-१०० |
| १२ पर्यन्तोपदेशख्यापकं द्वादशं कुलकम् ... | १००-१०७ |
| १३ प्रशस्तिः .... ... ... ... | १०७-१०८ |

॥ अर्हम् ॥

श्रीनवाङ्गीवृत्तिकारश्रीमज्जिन-अभयदेवसूरिशिष्य-श्रीमज्जिनवल्लभसूरिविरचितम्

# द्वादशकुलकम्.

श्रीमज्जिनपतिसूरिशिष्य-प्रवरपण्डितश्रीमज्जिनपालकृतविवरणसमेतम् ।

## प्रथमकुलकम् ।

नृत्यन्नानाविलासोद्धुरविबुधवधूसत्कटाक्षच्छटाभिः, श्वेताभिः श्वेतिमानं स्तबकितमभजन् नूनमङ्गं समग्रम् ।
श्रीमज्जन्माभिषेके सुरगिरिशिखरे यस्य लोकैकबन्धोः, स श्रीचन्द्रप्रभाख्यो जिनपतिरसमश्रेयसे वः सदा स्तात् ॥ १ ॥
श्रीमच्चान्द्रकुलाम्बरैकतरणेः श्रीवर्द्धमानप्रभोः, शिष्यः सूरिजिनेश्वरो मतिवचःप्रागल्भ्यवाचस्पतिः ।
आसीद् दुर्लभराजराजसदसि प्रख्यापितागारवद्,-वेश्मावस्थितिरागमज्ञसुमुनिव्रातस्य शुद्धात्मनः ॥ २ ॥
तस्मादभून्नवनवाङ्गविवृत्तिवेधा, मेधानिधेस्तनुतरो जिनचन्द्रसूरेः ।
संस्थापितानुपमधामजिनेन्द्रपार्श्वः, श्रीस्तम्भने पुरवरेऽभयदेवसूरिः ॥ ३ ॥

द्वादश-
कुलकम् ।
॥ १ ॥

अर्थानामूहते स्मातिगहनरचनागूढताभाजि वृत्ते-ऽशीतिं युक्तां चतुर्भिश्चतुरतरमतिर्यः सुविद्यानिधानम् ।
द्रोणाचार्यप्रधानैः स्तुत इति मुदितैः पत्तने संघमुख्यैर्नूनं धात्रा धरित्र्यां प्रवचनतिलकः कौतुकान् निर्ममेऽसौ ॥ ४ ॥
तथा च तदुक्तिः ॥ आचार्याः प्रतिसद्म सन्ति महिमा येषामपि प्राकृतैर्मातुं नाध्यवसीयते सुचरितैर्येषां पवित्रं जगत् ।
एकेनापि गुणेन किन्तु जगति प्रज्ञाधनाः सांप्रतं, यो धत्तेऽभयदेवसूरिसमतां सोऽस्माकमावेद्यताम् ॥ ५ ॥
तस्य ख्यातिं निशम्य श्रुतनिकषनिधेर्गौतमस्येव दूरात्, पुर्याः श्रीआशिकायाः प्रवररजतकृत्त्वेन कच्चोलवर्षः ।
एवं विख्यातकीर्त्तिः सितपटवृषभः प्रैषयत् स्वं विनेयं, त्रैविद्यं शान्तदान्तं निशमनविधयेऽथागमच्चास्य पार्श्वे ॥ ६ ॥

शिष्योऽथ स श्रीजिनवल्लभाख्यश्चैत्यासिनः सूरिजिनेश्वरस्य ।
प्राप्य प्रसन्नोऽभयदेवसूरिं, ततोऽग्रहीज्ज्ञानचरित्रचर्य्याम् ॥ ७ ॥
शुभगुरुपदसेवावाप्तसिद्धान्तसारावगतिगलितचैत्यावासमिथ्यात्वभावः ।
गृहिगृहवसतिं स स्वीचकारातिशुद्ध्या, सुविहितपदवीवद् गाढसंवेगरङ्गः ॥ ८ ॥
तथास्य संविग्नशिरोमणेरभून्मनः प्रसन्नं सकलेषु जन्तुषु ।
जिनानुकूल्या भुवनं विबोधयन्, यथा न शश्राम महामनाः स्वयम् ॥ ९ ॥
धर्मोपदेशकुलकाङ्कितसारलेखैः, श्राद्धेन बन्धुरधिया गणदेवनाम्ना ।

प्रथम-
कुलकम् ।
१
॥ १ ॥

---

१ आचार्यैरतिकोविदैश्च इति पाठान्तरम् ।

प्राबोधयत् सकलवागडदेशलोकं, सूर्योऽरुणेन कमलं किरणैरिव स्वैः ॥ १० ॥

तानि द्वादश विस्तृतानि कुलकान्यम्भोधिवद् दुर्गमान्यत्यन्तं च गभीरभूरिसुपदान्युच्छिद्रतार्याणि च ।

व्याख्यातुं य उपक्रमः कृशधियाऽप्याधीयते मादृशे–नारोढुं तदमर्त्यशैलशिखरं प्रागल्भ्यतः पङ्गुना ॥ ११ ॥

एवं श्रीजिनवल्लभस्य सुगुरोश्चारित्रिचूडामणेर्भव्यप्राणिविबोधने रसिकतां वीक्ष्याद्भुतां शाश्वतीम् ।

आदेशाद् गुणविन्नवाङ्कविवृतिप्रस्तावकस्यादरात्, प्रादात् सूरिपदं मुदञ्चितवपुः श्रीदेवभद्रः प्रभुः ॥ १२ ॥

इह हि संप्रति विशिष्टज्ञानवत्पुरुषसंपर्कार्कोद्द्योताभावेन भव्यजनानामपि अपगतसम्यग्दर्शनविवेकविलोचनानां भगवान् कारुण्यरसपाथोनिधिः श्रीमत्तीर्थाधिपोपदिष्टश्रुतनिकषावगमप्रवर्त्तितसम्यक्सारविधिः समस्तविद्यानितम्बिनी-चुम्बितवदनारविन्दः समभिनन्दितसत्कविकोविदवादिवृन्दः श्रीमज्जिनवल्लभसूरिमुनिवरः, तदुपचिकीर्षया विवेकलोच-नोन्मीलकरसायनाञ्जनशलाकाप्रख्यानि द्वादशकुलकानि आविश्चकार । तेषामपि प्रवरधर्मोपदेशप्रस्तावनाप्रख्यमाद्यकुल-कमारभमाणः सप्रशंसं च विनेया धर्मे उपदेष्टव्या इति शिष्टसमाचारं सत्यापयन् तेषां सकलगुणोपेतत्वेनोपदेशाविषयतामा-शङ्क्य साधुसमाचारमात्रत्वेन उपदिश्यत इति उपदर्शयन् प्रथमवृत्तमाह—

कुलप्पसूयाण गुणालयाणं, तुम्हाण धम्मे सयमुज्जयाणं ।

नत्थेत्त किंची उवदेसणिज्जं, तहावि कप्पुत्ति भणामि किंचि ॥ १ ॥

व्याख्या–कुलप्रसूतादिसमस्तविशेषणयुक्तानां युष्माकं नास्त्येव उपदेष्टव्यं किंचित्, तथापि 'कल्प', इति कृत्वा किंचिद् भणामि इति सम्बन्धः। तत्र कुलं पैतृकं, तत्र प्रसूता जाताः कुलप्रसूता–स्तेषाम्। तेऽपि केचिद् निर्गुणा एव स्युः, तथा च तेऽपि उपदेष्टव्या भविष्यन्ति, इत्यत आह–'गुणालयानामिति', गुणाः सामान्यविशेषरूपा धर्म्माः, दयादाक्षिण्यगांभीर्यौदार्यादयः सम्यक्त्वदेशविरत्यादयश्च, तत्र सामान्यगुणास्तावदेवम्–''धम्मरयणस्स जोगो, अक्खुद्दो रूववं पगइसोमो। लोयप्पिओ अकूरो, भीरू असढो सदक्खिन्नो ॥१॥ लज्जालुओ दयालू, मज्झत्थो सोमदिट्ठि गुणरागी। सक्कहसपक्खजुत्तो, सुदीहदंसी विसेसन्नू ॥२॥ वुड्ढाणुगो विणीओ, कयन्नुओ परहियत्थकारी य। तह चेव लद्धलक्खो, इगवीसगुणो भवे सड्ढो ॥३॥'' विशेषगुणास्तु एवम्–''सम्मत्तं गुरुभत्ती देसजइत्तं चरित्तरागो य। वेयावच्चं गुरुदेवयाणमेए विसेसगुणा'' ॥१॥ एतेषामालया आश्रयास्तेषाम्। 'तुम्हाणंति' युष्माकमिति उपदेशबोध्यत्वेन सर्वदान्तःकरणे विवर्त्तमानानां साक्षादनुपात्तानामपि श्रावकाणां ग्रहणम्। सर्वत्र चात्र चतुर्थ्यर्थे षष्ठी। गुणवन्तोऽपि केचित् प्रमादादिना न धर्मे समुद्यमभाजो भविष्यन्ति इत्यत आह–'धर्मे' संपूर्णश्रावकसमाचारे वीतरागसपर्यासामायिकावश्यकादौ 'स्वयमेव' परोपदेशादिकं विनापि समुद्यतानामुद्यमपराणाम्। तथा चैवंविधानां किमुपदेश्यम्, उपदेश्यस्यार्थस्य स्वयमेव विधानादिति अभिप्रायवानाह–'नास्त्येव' न विद्यत एव 'किंचित्' स्वल्पमपि कार्यमुपदेश्यं, नास्त्येवेति एवकारेण सर्वथा उपदेशविषयताऽभावमाह। उपदर्शनीयमिति पाठपक्षे तु वचनेन क्रियया वा न दर्शनीयमस्ति। ननु किमर्थं तर्हि तवापि तदुपदेशे प्रवृत्तिरित्यत आह 'तथापीति' अत्र यद्यपि इति शेषः, ततश्च यद्यपि एवं सर्वथाप्युपदेशप्रवृत्तिरसमीचीनैव तेषु, तथापि 'कल्प इति' समाचार इति। साधूनां हि अयं

समाचारो यदुत साधुभिः श्राद्धेभ्य उपदेशो देय एव, तीर्थकरैः समवसृतौ धर्मव्याख्यानप्रस्तावनेनास्यार्थस्य समर्थनात्। 'भणामि' प्रतिपादयामि किंचित् स्वल्पमपि, बहुप्रतिपादनस्य शक्त्यभावेन प्रतिपाद्यजनावधारणसामर्थ्याभावेन च नैरर्थक्यादिति वृत्तार्थः॥ १ ॥

अथ वृत्तचतुष्टयेन धर्मोपदेशपीठमारचयन्नेव कुलप्रसूतत्वादिविशेषणत्रितयमाविष्कुर्वन्नाह—

दुल्लंभमाइम्मि नरत्तसुत्तं, तत्तो वि खित्तं जिणधम्मजुत्तं ।
तहिं पि जाई कुलरूवमाउ–मारुग्गबुद्धी सवणुग्गहो य ॥ २ ॥
एयं च तुब्भेहिं सुचिण्णपुण्ण–पब्भारलब्भं लहिऊण सव्वं ।
पवज्जिऊणं च सिविक्कहेउं, देवं जिणिंदं जियरागदोसं ॥ ३ ॥
निरासवे पावकलंकमुक्के, तिगुत्तिगुत्ते अममे अमोहे ।
सुसाहुणो धम्मगुरू सरित्ता, नाउं च सम्मं जिणधम्मतत्तं ॥ ४ ॥
पमत्तलोयाण विरूवरूवं, दट्ठूण चिट्ठं कुपहट्ठियाणं ।
मणागमित्तं पि न वेमणस्सं, पमत्तया वावि कहिंचि किच्चा ॥ ५ ॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

व्याख्या–'दुर्लभं' दुष्प्रापमादौ शेषक्षेत्राद्यपेक्षया प्रथमं 'नरत्वं' मानुषत्वम् 'उक्तं' प्रतिपादितं सिद्धान्ते गणधरादिभिरिति गम्यते । ततोऽपि 'क्षेत्रं' वर्षं दुर्लभमित्यत्रापि योज्यं, कीदृशमित्यत आह–'जिनधर्मयुक्तं', तीर्थकृत्प्रणीतसन्मार्गसहितपंचदशकर्मभूमिरूपं, 'तत्रापि' सुक्षेत्रेऽपि, 'जातिः' शुद्धमातृपक्षरूपा, तत्रापि 'कुलं' शुद्धपितृपक्षलक्षणं, तत्रापि 'रूपं' पटुपञ्चेन्द्रियत्वलक्षणं, अपरिपूर्ण्णेन्द्रियो हि कथं संयमं विदध्यात्? । तथा 'आयुः'–कालानुसारि जीवित्वं, तद्विकलो हि न बहु सद्धर्मकारी स्यात्, तथा 'आरोग्यं' नीरोगत्वं, चिरजीवी अपि सर्वदा रोगाक्रान्तः किं कुर्यादिति आरोग्यं गवेष्यते, तत्रापि 'बुद्धिः'–धर्मग्रहणचातुर्यं, तत्रापि 'श्रवणं' सद्गुरुमुखाद्धर्मश्रुतिः, तत्रापि 'अवग्रहः'–श्रुतस्य चिरकालं धारणाऽवग्रहः, अथवा श्रवणावग्रहः, सुसाधुजनकृतो धर्मश्रवणोपकारः, श्रमणवाचकः श्रवणशब्दोऽपि अस्ति इति, । चशब्दः समुच्चये, दुर्लभपदं सर्वत्र तत्तत्क्षेत्रादिविशेष्यपदलिङ्गापेक्षया स्त्रीपुंनपुंसकत्वेन योज्यम्, एतावता कुलप्रसूतत्वं प्रकाशितम् । दीर्घत्वं विभक्तिलोपश्च प्राकृतत्वात्, इत्यर्थः ॥ २ ॥ 'एतच्चेति' चशब्दः पुनरर्थे, ततश्च एतत् पुनः पूर्वोक्तं मनुष्यत्वादिश्रवणावग्रहपर्यन्तं युष्माभिर्लब्ध्वा–प्राप्य । कीदृशमित्याह–'सुचीर्ण्णपुण्यप्राग्भारलभ्यमपि' सुष्ठुविहितसुकृतसंभारप्राप्यमपि 'सर्वं' समस्तं, यतो मनुष्यत्वादेरेकस्यापि अभावे संपूर्ण्णसद्धर्मस्य न निष्पत्तिः, अतः किं कर्त्तव्यमित्याह–न क्वापि धर्मकृत्ये वैमनस्यं प्रमत्तता वा कार्या इति योगः । तथा 'प्रतिपद्य च' स्वीकृत्य च देवमाराध्यतमं 'शिवैकहेतुं' मोक्षाद्वितीयकारणं 'जिनेन्द्रम्' अर्हन्तं, कीदृशमित्याह 'जितरागद्वेषं' तिरस्कृतमायालोभक्रोधमानं, जितरागदोषं ॥ २ ॥

वा, तत्र दोषा मिथ्यात्वादयः ॥ ३ ॥ 'निराश्रवान्' परिहृताभिनवकर्मोपादाननिमित्तप्राणिवधादिसर्वपापस्थानान्, द्वितीयाबहुवचनान्ते पुंलिङ्गे एकारः सर्वत्र द्रष्टव्यः। अत एव 'पापकलङ्कमुक्तान्' कालुष्यपङ्कविवर्जितान्, तथा 'त्रिगुप्तिगुप्तान्' मनोवाक्कायगुप्तियुक्तान्, तथा मम इत्यव्ययं ममत्वे, तथा च 'अममान्' वस्त्रपात्रशरीरादिष्वपि ममत्वरहितान्, तथा 'अमोहान्' पित्रादिष्वपि अस्नेहान्, 'सुसाधून्' ज्ञानक्रियावत्त्वेन सुष्ठु मोक्षसाधनपरायणान् 'धर्मगुरून्'–धर्मप्रकाशकाचार्यान् 'सरित्तत्ति' अनुसृत्य अङ्गीकृत्येति यावत्, तथा 'ज्ञात्वा' अवबुध्य, चशब्दः समुच्चये, 'सम्यग्' यथावस्थितत्वेन, नतु विपरीततया, 'जिनधर्मतत्त्वं' तीर्थकृदुपदिष्टश्रुतसामायिकरहस्यम्। सम्यग्ज्ञानं च तदेव निश्चयतो यत्र तदर्थप्रतिपत्तिरिति, तदर्थस्य सर्वस्यापि अङ्गीकारो लक्ष्यते, एतावतापि देवधर्मगुरुधर्मश्रद्धानरूपसम्यक्त्वप्रतिपत्त्या गुणालयत्वमाविष्कृतम्, ईदृशाश्च अवश्यं धर्मे समुद्यता एव भवन्तीति पूर्वोक्तं त्रितयमपि व्यक्तीकृतमित्यर्थः ॥ ४ ॥ ततश्च 'प्रमत्तलोकानां' विषयकषायादिव्यासक्तजनानां 'विरूपरूपा'–मशुभस्वरूपां स्त्र्यादिसंसर्गपरप्रहारादिरूपां 'दृष्ट्वा' अवलोक्य 'चेष्टां' व्यापारं, 'कुपथस्थितानां'–मसन्मार्गप्रवृत्तिभाजा–मन्यदर्शनिनां स्वदर्शनिनां च, स्वदर्शनेऽपि कदाचित् कुकर्मपारतन्त्र्येण विरूपचेष्टासंभवात्, तस्याश्च वैमनस्यादिहेतुत्वात्, ततश्च तत्परिहारोपदेशमाह–'मनाङ्मात्रमपि' अतिस्वल्पमपि, आस्तां प्रभूतं, न नैव वैमनस्य–मनास्थया स्वर्गादिफलाभावप्रतिपत्त्या करणोत्साहभङ्गः, प्रमत्तता वापि तत्करणशैथिल्यं, वापीति अव्ययोपसर्गसमुदायो विकल्पे, 'क्वचित्', क्वापि कार्ये चैत्यसंघपूजादिके कृत्ये कार्या। इति वृत्तचतुष्टयार्थः ॥५॥

न केवलं तच्चेष्टां दृष्ट्वा धर्मे वैमनस्यादिकं न कार्यम्, अपि तु तद्भाषितमपि आकर्ण्य न धर्मे शङ्कादिकमाधेयमित्याह—

न यावि तब्भासियभूरिभेय-पावोवएसे बहुसो वि सोच्चा ।
पारद्धसद्धम्मविहीसु संका, अणायरो वावि अणुट्ठियव्वो ॥ ६ ॥

व्याख्या-'न चापि' नैव तैः पूर्वोक्तप्रमत्तजनैर्भाषिता उक्ता 'भूरिभेदा' देवगुरुधर्मादिविषयभेदेन नानाप्रकारा ये पापोपदेशा असत्यत्वेन कलुषप्रवर्त्तकवचनानि । तत्र देवविषया यथा शाकुन्तलनाटके-"या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री, ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् । यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः, प्रत्यक्षाभिः प्रसन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥१॥" तथा-'जले विष्णुः स्थले विष्णु-राकाशे विष्णुमालिनि । विष्णुमालाकुले लोके, नास्ति किञ्चिदवैष्णवम्' ॥ १ ॥ इत्यादयः । गुरुविषया यथा-"गुरुरग्निर्द्विजातीनां, वर्णानां ब्राह्मणो गुरुः । पतिरेको गुरुः स्त्रीणां, सर्वस्याभ्यागतो गुरुः" ॥२॥, इत्यादयः । धर्मविषयास्तु एवम्-"ओषध्यः पशवो वृक्षा-स्तिर्यञ्चः पक्षिणस्तथा । यज्ञार्थं निधनं प्राप्ताः, प्राप्नुवन्त्युच्छ्रितिं पुनः" ॥ ३ ॥ तथा "तिलै-र्व्रीहियवै-र्माषैरद्भि-र्मूलफलेन वा । दत्तेन मासं प्रीयन्ते विधिवत् पितरो नृणाम्" ॥ ४ ॥ "द्वौ मासौ मत्स्यमांसेन, त्रीन् मासान् हारिणेन च । औरभ्रेणाथ चतुरः, शाकुनेनेह पञ्च वै" ॥५॥ इत्यादयः । तान् 'बहुशोऽपि' अनेकश आस्तामेकवारमेव इत्यपेरर्थः, 'श्रुत्वा' आकर्ण्य, किमित्याह-'प्रारब्धसद्धर्मविधिषु' वीतरागसपर्या-निःसङ्गगुरुसेवा-श्राद्धादिमिथ्यात्वस्थानपरिहार-

जीवदयालुत्वादिरूपक्रियमाणशोभनधर्मानुष्ठानेषु, 'शङ्का' यदुत एतेऽपि देवगुर्वादिविषया उपदेशाः प्रमाणं भविष्यन्तीत्येवंरूपः संदेहः। अथवा एवंविधोपदेशकेभ्यो गुरुपित्रादिभ्यः शङ्का भयरूपा न कर्त्तव्या, अनादरो वा तदकृत्यत्वप्रतीत्या अवज्ञारूपो वा नानुष्ठेयः। सर्वेषामपि एषामसदुपदेशानां तु युक्तिलोकागमबाधितत्वेनाप्रमाणत्वात्, क्रियमाणविधीनां च युक्त्यागमाविरुद्धत्वेन समीचीनत्वात्। यथा च पूर्वोक्ताः प्रमाणबाधितास्तथा लोकतत्त्वनिर्णय–शास्त्रवार्त्तासमुच्चयादिशास्त्रेभ्योऽवसेया इति वृत्तार्थः ॥ ६ ॥

तदेवं श्राद्धानां स्वमतदार्ढ्योपदेशमभिधाय अथ तादृशामेव श्राद्धधर्मविधानयोग्यताऽपि शास्त्रेऽभिहिता इत्याह—

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

तेणेव जो बीहइ नो परेसिं, धम्माणभिण्णाण कुतित्थियाणं।
पियानिवाईण य सो सुयम्मि, धम्माहिगारी भणिओ न अन्नो ॥ ७ ॥

व्याख्या–यत एव गुरुपित्रादिभ्यो न शङ्का कर्त्तव्या धर्मविधाने 'तेनैव' कारणेन 'यः' कश्चित् पुरुषादिः 'न बिभेति' न त्रस्यति 'परेभ्यः' अन्येभ्यः, कीदृशेभ्यो 'धर्मानभिज्ञेभ्यः', लोकोत्तरशुद्धधर्मावबोधविकलचित्तेभ्यः, 'कुतीर्थिकेभ्यः' शाक्यभौतादिभ्यः, पञ्चम्यर्थे सर्वत्र षष्ठी। तथा 'पितृनृपादिभ्यश्च' जनकराजप्रभृतिभ्यश्च, आदिशब्दात् पूर्वगुर्वादिपरिग्रहः, तेनायमर्थः–शुद्धविधिधर्ममार्गं कुर्वन् यः सर्वथा नृपजनकपूर्वगुरुभ्यो न बिभेति स एव धर्माधिकारी, धर्मविधिप्रवर्त्तनयोग्यतावान्। 'श्रुते' सिद्धान्ते 'भणित' उक्तः पूर्वाचार्यैः, अत्र चार्थलब्धोऽपि अन्यनिषेधोऽत्यन्तदार्ढ्यख्यापनाय साक्षादुक्तः

द्वादश-कुलकम्। ॥ ५ ॥

'नान्य' इति, न पुनरेतस्मादन्योऽधिकारीत्यर्थः, तथा च दर्शनसप्तत्याम् अर्थिसमर्थसूत्राप्रतिकुष्टरूपमधिकारिणं निरूपयद्भिः श्रीहरिभद्रसूरिभिरुक्तं "होइ समत्थो धम्मं, कुणमाणो जो न बीहइ परेसिं। माइपिइसामिगुरुमाइयाण धम्माण भिन्नाणं" ॥ १ ॥ इत्यादि । तदियता सर्वशंकाविकलस्यैव धर्माधिकारित्वं यतोऽतः शंका न कर्तव्येति भाव इत्यर्थः ॥ ७॥

किञ्च शुद्धधर्मरत्नप्रतिपत्तिलक्षणं कार्यं श्रेयोभूतं वर्तते, तत्र च प्रवर्त्तमानानां संभाव्यते विघ्नो जनकादिप्रतिबन्धरूपः, परं तत्संभवेऽपि धीरा धर्मनिश्चलचित्ता एव भवन्ति इत्युपदिशन्नाह—

सभावओ चेव हियाणुबंधि, पओयणं भूरिभवंतविग्घं ।
ता विग्घभावेऽवि न तत्थ धीरा, चलंति थेवं पि सुराचलु व्व ॥ ८ ॥

व्याख्या—'स्वभावत एव' निसर्गादेव 'हितानुबन्धि' परंपरयापि आनुकूल्यानुयायि, 'प्रयोजनं' कार्यं राज्यलाभचैत्यभवनविधानादिकं तद् 'भूरिभवद्विघ्नं' भूरयः प्रभूता भवन्तः संपद्यमाना विघ्नाः—स्वगोत्रजोत्थानप्रत्यर्थिमिथ्यादृष्टिप्रतिरोधादयः प्रत्यूहा यत्र तत् तथा । यत एतदेवं 'तत्' तस्माद् 'विघ्नभावेऽपि' पूर्वोपदर्शितान्तरायसद्भावेऽपि आस्तां तदभावे, 'न' नैव 'तत्र' तस्मात् प्रारब्धकार्यविधानात् 'चलन्ति' तत्करणे विमुखीभवन्ति, तत्रेति सप्तम्यन्तमपि पञ्चम्यन्ततया योज्यं, 'धीरा' बुद्ध्या विराजमाना आपत्सु अपि अवैक्लव्यभाजो वा 'स्तोकमपि' अल्पमपि आस्तां सर्वथा प्रारब्धत्यागः । तथा चोच्यते "प्रारभ्यते न खलु विघ्नभयेन नीचैः, प्रारभ्य विघ्नविहता विरमन्ति मध्याः । विघ्नैः पुनः पुनरपि

प्रथम-कुलकम्। १ ॥ ५ ॥

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

प्रतिहन्यमानाः, प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ १ ॥" अत्रानुरूपमन्वयोदाहरणमाह-'सुराचल इव' मेरुपर्वतवद्, यथासौ प्रभूतैरपि वातादिभिः क्षोभकारणैर्न 'चलति' न प्रकम्पते तथा धीरा अपि प्रारब्धान्न चलन्ति, न ततो निवर्त्तनाध्यवसायभाजो भवन्ति । अयमभिसन्धिः-भवद्भिरपि अनुश्रोतोरूपगतानुगतिकजनमार्गमुत्सृज्य प्रतिश्रोतोरूपजन्मद्वयहितानुबन्धि-शुद्धविधिधर्मप्रतिपत्तिलक्षणकार्यप्रारम्भः कृतोऽस्ति; तत्र च केषांचित् कुबोधकुग्रहाभिनिविष्टबुद्धीनां संभवति विघ्नविधानं, परं तत्सद्भावेऽपि न विधिमार्गपरित्यागबुद्धिः कदाचिद् विधेयेत्यर्थः ॥ ८ ॥

ननु यथा सांसारिककार्येषु विवाहादिषु निःशङ्काः सोद्यमाः प्रवर्त्तन्ते जीवाः, तथा धर्मप्रयोजनेष्वपि पूजासामायिकादिषु प्रवर्तन्ते, अतः किमिति विशेषेण शङ्काव्युदासोपदेश इत्यत आह—

संसारकज्जेसु सयंपि जीवा, निच्चं पसत्ता अपमाइणो य ।
धम्मत्थकज्जे पुण भीरुचित्ता, सया पमत्ता न समुज्जमंति ॥ ९ ॥

व्याख्या-'संसारकार्येषु' भवभ्रमणनिबन्धनप्रयोजनेषु वाणिज्यविवाहादिषु 'स्वयमपि' आत्मनैव परोपदेशं विनैव इत्यर्थः, 'जीवाः' गुरुकर्माणः प्राणिनः 'नित्यं' सर्वदा ननु कदाचिदेव, 'प्रसक्ताः' प्रकर्षेणासक्तिमन्तः 'अप्रमादिनश्च' सर्वथा निद्रादिप्रमादविरहिताः, चः समुच्चये । व्यतिरेकमाह-'धर्मार्थकार्ये' निःश्रेयससाधकसुकृतनिमित्तप्रयोजने विशुद्धपूजासामायिकादौ पुनः कर्त्तव्ये तत्करणविषये, पुनःशब्दः पूर्वस्माद् विशेषणार्थः, 'भीरुचित्ताः' निजजनकपूर्वगुर्वादिभ्यो भयालुमानसाः,

तथा 'सदा' सर्वकालं प्रमत्ता निद्रालस्यादिप्रमादपराः, 'न' नैव, 'समुद्यच्छन्ति' सम्यगुद्यमं कुर्वन्ति, तथा चैवंविधस्वभावभाजां प्राणिनां शङ्काव्युदासोपदेशः सार्थक एवेत्यर्थः ॥ ९ ॥

तदेवं स्थिते लोकानां स्वभावे श्राद्धैस्तत्त्वावलोकनपरैर्यद् विधेयं तदुपदर्शयन्नाह—

ता लोयसन्नाविपरंमुहेहिं, समुज्झियासेसकदग्गहेहिं ।
इमे गुणा लोगदुगे वि रम्मा, सयंमि देहम्मि निवेसियव्वा ॥ १० ॥

व्याख्या-यतो लोकाः संसारकार्येषु धर्मकार्येषु चैवंस्वभावास्तत् तस्मात् कारणात् 'लोकसंज्ञाविपराङ्मुखैः' इमे गुणाः स्वात्मनि निवेशनीया इति सम्बन्धः । तत्र लोकसंज्ञा भवाभिनन्दिजनमनोवृत्तयस्ताभ्यो विशेषेण पराङ्मुखैः विपराङ्मुखैः । लोकसंज्ञाविपराङ्मुखा अपि केचित् स्वबुद्ध्या तीर्थान्तरीया न जिनोक्तक्रियायां सम्यक् प्रवर्त्तन्ते इत्यत आह—'समुज्झिताः', परित्यक्ता 'अशेषाः' समस्ताः 'कदाग्रहाः' कुगुरुकुबोधसम्बन्धजनिताः कुत्सितदेवगुरुधर्मान्तरविषया अभिनिवेशा यैस्ते तथा तैः अनभिनिविष्टैरित्यर्थः । 'एते' वक्ष्यमाणा 'गुणा' धर्मा लोकद्वयेऽपि इहलोकपरलोकयोर्न केवलमिहलोक एवेत्यपेर्थः । 'रम्याः' सुखानुबन्धित्वेन रमणीयाः, भवति हि अपूर्वज्ञानाभ्याससुगुरुशुश्रूषादिभ्य इहलोके परलोके च वाञ्छितसिद्धिरिति । ततः किमित्याह—'स्वकीये देहे' शरीरे 'निवेशनीयाः' स्थापनीयाः, निवेशनीयपदं च प्रत्येकमपूर्वपाठादिसर्वेषु अपि गुणेषु योज्यं, इह च देहदेहिनोरभेदविवक्षया स्वात्मनीत्यर्थः । एवं च सति ज्ञानेच्छादीनामान्तराणां गुरुशुश्रूषा- ॥ ६ ॥

6 12

विनयादीनां च बाह्यानां सर्वेषां संग्रहकृतो भवतीति । किञ्च "यद्वद् मुक्ताकलापे प्रभुरसमगदोच्छेदसंपद्विधाना-द्यर्थेष्वे-कोऽप्यचिन्त्यातिशय इह मणिः कोऽपि कस्याप्यहो स्यात् । तद्वत् संपूर्णकार्यक्षम इह हि गुणेष्वेककोऽप्येषु सद्यः, सर्वेऽप्येकत्र दैवात् स्युरिह सुघटिताः कस्य नार्थस्य सिद्ध्यै" ॥१॥ तेन श्राद्धानां स्वदेहे सर्वगुणनिवेशोपदेशः । इति वृत्तार्थः ॥१०॥

वृत्ताष्टकेन गुणानेवोपदर्शयन्नाह—

अपुव्वपुव्वागमनाणवंछा, गुरूसु सुस्सूसणलंपडत्तं ।
परोवयारप्पवणासयत्तं, विमूढसंसग्गिविवज्जणं च ॥ ११ ॥

व्याख्या—'अपूर्वापूर्वागमज्ञाने' प्रतिदिनं सिद्धान्तप्रकरणसूत्रतदर्थावगमे 'वाञ्छा' अभिलाषः, लौकिकैरपि सम्यक्त्वत्रतार्थिभिः "श्लोकार्धं श्लोकपादं वा, समस्तश्लोकमेव वा । नवं नवं पठेन्नित्यं, यदीच्छेद् विपुलां मतिम्" ॥१॥ इत्यादि वदद्भिरयमर्थः स्वीकृत एव, किं पुनर्लोकोत्तरैः केवलागमज्ञानपरतन्त्रप्रवृत्तिभिः? यतस्तीर्थकृन्नामकर्मोपार्जननिमित्तविंशतिस्थानमध्येऽपि अस्याः 'अपुव्वनाणगहणं' इत्यादिना श्रवणात् । यदुक्तम्—"अकुण्ठकण्ठैः सोत्कण्ठैः, यः पाठः क्रियते नवः । प्रत्यहं स श्रुतस्य स्याज्जिनत्वस्यापि मूलभूः" ॥ १ ॥ समस्तसम्यक्क्रियाकलापस्य एतत्पूर्वकत्वाद् आदौ अस्योपन्यासः, तस्यापि गुरुशुश्रूषासाध्यत्वात् तदनन्तरं गुरुशुश्रूषायाः, सा च सत्कारादिभेदेन दशधा । तथा चोक्तम्—"सक्कारब्भुट्ठाणे, सम्माणासण-
श्रा० कु० २ अभिग्गहे तह य । आसणमणुप्पयाणं, किइकम्मं अंजलिग्गहो य ॥ १ ॥ इंतस्सणुगच्छणया, ठियस्स तह पज्जुवासणा

भणिया । गच्छंताणुवयणा, एसो सुस्सूसणाविणओ ॥ २ ॥" सत्कारो वन्दनादिः, अभ्युत्थानं गौरव्यदर्शने विष्टरत्यागः, सम्मानो वस्त्रादिपूजनम्, आसनाभिग्रहः पुनस्तिष्ठत एवासनानयनपूर्वकमुपविशतात्र इति भणनम्, आसनानुप्रदानं तु आसनस्य स्थानान्तरसंचारणम्, शेषभेदाः प्रसिद्धाः। तथा चाह-'गुरुषु' सम्यग्ज्ञानक्रियावत्सु आचार्यादिषु 'शुश्रूषालाम्पट्यं' शुश्रूषालालसत्वं तदेकपरत्वमित्यर्थः, यतोऽवश्यमेतस्य सफलत्वमेव। तदुक्तम्-"सद्गुरूणामुपास्तिर्या, निदानं ज्ञानसंपदः। सा भवेद् भवपाथोधेस्तारणी तरणिर्यथा" ॥१॥ एवमग्रेतनपदेषु अपि पूर्वापर्योपन्यासे कारणं सुधिया स्वयमेवाभ्यूह्यम्। तथा 'परेषाम्' आत्मव्यतिरिक्तानामुपकारोऽनुग्रहो धनजीवितादिरक्षणलक्षणस्तत्र 'प्रवणः' प्रगुणो दक्ष आशयश्चित्तं यस्य स तथा, तस्य भावस्तथात्वम्। यस्य चैतदविकलं स एव पुण्यभाक्, शेषस्तु आत्मंभरिबलिपुष्टककक्षात्राह्येव। तदुक्तम्-"अगण्यपुण्यकारुण्यामृतनिर्भरमानसाः। धन्या एवोपकुर्वन्ति, परान् दुःखशतार्दितान्" ॥१॥ तथा 'विशेषेण मूढाः' शास्त्रपल्लवमात्रग्राहित्वेन दुर्विदग्धा लोकादिविरुद्धाचारचारिणस्तैः सह 'संसर्गः' परिचयस्तस्य समस्तानर्थमूलत्वेन 'विशेषेण' सर्वात्मना 'वर्जनं' परिहारः, चः समुच्चये, तत्परिहारे च सर्वसमृद्धिसिद्धिरित्यर्थादुक्तं भवति । तदुक्तम्-"दुष्टान्तःकरणैर्भीमैः, परच्छिद्राभिवीक्षकैः। भुजङ्गैरिव संसर्गो, विमूढैर्न सुखावहः" ॥ १ ॥ इति वृत्तार्थः ॥ ११ ॥

तथा—

पगिट्ठधम्मप्पडिबद्धलोय-सुबंधुबुद्धी विमलासयत्तं ।
सयावि अत्तुक्करिसस्स चागो, अजुत्तनेवत्थअणिच्छणं च ॥ १२ ॥

व्याख्या–'प्रकृष्टो धर्मः' केवलतीर्थकृदाज्ञासमाराधनपरः शुभव्यापारस्तत्र 'प्रतिबद्धाः' सातिशयानुरागा ये 'लोका' जनास्तेषु गुणानुरागेण 'सुबन्धुबुद्धिः' पित्रादिसम्बन्धमन्तरेणापि "सहधम्मयरा मह बंधवत्ति" वचनात्, शोभनबान्धवबुद्धिः, ये तु नैवंविधास्ते परमार्थतः पशव एवेति । उक्तं च–"शिवैकहेतुसद्धर्म–निष्ठचित्तेषु धर्मिषु । येषां न बन्धुबुद्धिस्ते, पशवः शृङ्गवर्जिताः" ॥ १ ॥ तथा 'विमलो' विषयकषायाद्यदूषितत्वेन निर्मल 'आशयः' चित्तं येषां ते तथा, तद्भावो विमलाशयत्वम्, एतदभावेऽपि सर्वमनुष्ठानं निष्फलमेव । यदाहुः–"येषां न मानसं शुद्धं, ते दानाद्युद्यता अपि । फलभाजः सदा न स्युर्निर्बीजा इव कर्षकाः ॥१॥" तथा 'सदापि' सर्वकालमपि 'आत्मन उत्कर्षो' रूपादिभिर्गुणैरहमुत्कृष्ट इत्यभिमानबद्धवचनविशेषः तस्य 'त्यागः' परिहारः, आत्मोत्कर्षो हि लाघवायैव । यतः–"परेण परिविख्यातो, निर्गुणोऽपि गुणी भवेत् । शक्रोऽपि लघुतां याति, स्वयं प्रख्यापितैर्गुणैः" ॥१॥ किं च तदभावेऽपि गुणिनां गुणविस्तारात् । तदुक्तम्–"आत्मोत्कर्षं विनापि स्याद्, गुणतो गौरवं जने । नहि भास्वान् निजा भासः, कदाचिदपि शंसति" ॥१॥ तथा 'अयुक्तस्य' देशकालवयःप्रभृत्यनुचितस्य 'नेपथ्यस्य' वेषस्य 'अनिच्छनम्'–अनिष्टिरकरणमिति यावत्, अयुक्तस्य तस्यापि लाघवहेतुत्वात् । तदुक्तम् "देशकालदशादीनामनौचित्येन वेषकृत् । अस्तु तावद् दरिद्रादिः, सार्वभौमोऽपि हस्यते" ॥१॥ चः समुच्चये । इति वृत्तार्थः ॥ १२ ॥

तथा–

अहासभासित्तमदीणवित्ती, अणुत्तणत्तं सुयसीलया य ।
गुणाहिएसुं परमो पमोओ, संसारकिच्चेसु परा विरत्ती ॥ १३ ॥

द्वादश-कुलकम् । प्रथम-कुलकम् १

व्याख्या—न विद्यते 'हासो' हसनं यत्र तदहासं, क्रियाविशेषणमेतत्, ततोऽहासं 'भाषितुं' वदितुं शीलमस्येति अहासभाषी, तस्य भावस्तत्त्वं, हासान्निवृत्त्यैव भाषणीयं, सहासभाषणस्य लोकेऽपि मूर्खताभिव्यञ्जकत्वात्, तद्भाषणनिषेधस्य च मूर्खतानिवृत्तिहेतुत्वेन श्रवणात्। तदुक्तम्—"खादन् न गच्छामि हसन् न भाषे, दत्तं न शोचामि कृतं न मन्ये। द्वाभ्यां तृतीयो न भवामि राजन्, अस्मादृशा नैव भवन्ति मूर्खाः" ॥१॥ तथा 'अदीना' दुःखातिशयाभिव्यञ्जकवदनविच्छायतादिपरिहाररूपा 'वृत्तिः' व्यापारः, तस्या अपि सत्पुरुषताभिव्यञ्जकत्वात्। तदुक्तम्—"यदि भवति कथंचिद् द्रव्यसंघातनाशः, प्रियजनविरहो वा कालराजादिदौःस्थ्यम्। विदितविधिनियोगालंघनीयस्वभावास्तदपि हि न महान्तो दीनभावं व्रजन्ति" ॥१॥ तथा 'उत्तानो' विद्यमानाविद्यमानगुणोत्कर्षरूपाभिमानवान्, न तादृशोऽनुत्तानस्तद्भावस्तत्त्वं, ह्रस्वत्वं प्राकृतत्वात्। उत्तानत्वस्य चात्मोत्कर्षाद् वचनाभावकृतो भेदो द्रष्टव्यः, तादृशो हि गुर्वादिभ्यो विद्यादिलाभवान् स्यात्, न तद्विपरीतः। तदुक्तम्—"नैवोत्तानमतिर्विद्यां, विन्देत सुगुरोरपि। यतोऽस्या विनयो मूलं, स चोत्तानाद् विदूरगः" ॥१॥ तथा 'श्रुते' सदागमरूप एव तदध्ययनश्रवणादिना 'शीलं' समाधानं यस्य स तथा, तद्भावः श्रुतशीलत्वम्, तादृशो हि "पढमं नाणं तओ दया" इत्यादिन्यायेन मोक्षतरुबीजभूतकारुण्यादिविधानभावेन ऐहिकपारत्रिकसमस्तसंपत्सिद्धेः, अतादृशस्य पुनरुभयाभावतस्तदभावात्। तदुक्तम्—"नाश्रुतश्रुततत्त्वस्य, स्याद् दया सिद्धिसिद्धिदा। ऋते तु तामिहामुत्र, न यशःशर्मसंपदौ" ॥१॥ तथा 'गुणाधिकेषु' सातिशयज्ञानादिवत्सु, अनुस्वारः प्राकृतत्वात्, 'परमः' प्रकृष्टः 'प्रमोदः' तद्गुणानुमननरूप आनन्दः, तेन हि एकदापि क्रियमाणेन सर्वसद्गुणानुमननेन महाफलसिद्धेः। तदुक्तम्—"ज्ञानादित्रयवान् जनो गुणिजनस्तत्सङ्गमात्

॥ ८ ॥ ॥ ८ ॥

संभवेत्, स्नेहस्तेषु स तत्त्वतो गुणिगुणैकात्म्याद् गुणेष्वेव यत्। तस्मात् सर्वगसद्गुणानुमननं तस्माच्च सद्दर्शनाद्, यस्मात् सर्वशुभं गुणिव्यतिकरः कार्यः सदार्यैस्ततः" ॥ १ ॥ तथा 'संसारकृत्येषु' भवोद्भवहेतुषु स्वजनसम्बन्धराज्यविवाहादिषु, 'परा' प्रकृष्टा 'विरक्तिः' परम्परया अनन्तदुःखदायित्वेन तेषु तत्कारिषु च वैराग्यभावना, सम्यग्दृष्टेस्तथास्वभावत्वात्। तदुक्तम्–"बन्धूदयोद्वाहसुतोत्सवादौ, संसारकृत्ये प्रतिबन्धभाजः। आजन्म यस्य स्वहिते न वृत्तिः, स्वयं स्वघातोद्यतमेव धिक् तम् ॥ १ ॥" इति वृत्तार्थः ॥ १३ ॥

तथा—

सव्वेसु कज्जेसु अणूसुगत्तं, अखुद्दभावो य अणिद्दयत्तं।
सज्झायसज्झाणतवोवहाणं–आवस्सयाईसु समुज्जमित्तं ॥ १४ ॥

व्याख्या–'उत्सुकः' तरलतरतया अविमृश्यकारी, ततश्च 'सर्वेषु' समस्तेषु संसारधर्मप्रतिबद्धेषु 'कार्येषु' प्रयोजनेषु 'अनुत्सुकत्वं' विमृश्यकारित्वम्, अतादृशस्य तु कदाचिन्महाविपत्संभवेन कार्यस्य स्वात्मनश्च विघातभावात्। तदुक्तम्–"प्रायः समुत्सुकमतिर्न विवेचकः स्यात्, तादृक्स्वभावविभवश्च न कार्यजातम्। सम्यक् पतङ्गखगवत् स्वहितं करोति, स्वल्पं सुसाधमपि मन्दतया सुबुद्धेः" ॥ १ ॥ तथा 'अक्षुद्रभावश्चेति' परविप्रियकारित्वबुद्धिः क्षुद्रभावस्तन्निषेधोऽक्षुद्रभावः, सर्वदा सर्वेषु प्रियकारित्वम्, 'चः' समुच्चये, अतादृशस्य सर्वाविश्वास्यत्वेन स्वार्थासाधकत्वात्, तदुक्तम्–"बन्धुष्वपि प्रसृतविप्रि-

द्वादश-कुलकम् । ॥ ९ ॥

यकारिचित्ते, दुर्योधने युधि यथा विविधप्रवृत्तौ । नक्तंदिनं विवरदृष्टिपरे परेषां, क्षुद्रे न विश्वसिति कोऽपि यथा भुजङ्गे" ॥१॥ तथा 'निर्दयो' निष्करुणः, तन्निषेधोऽनिर्दयत्वं सदयत्वमित्यर्थः, तादृशस्यैव मोक्षतरुमूलधर्मप्रसाधकत्वात् । तदुक्तम्–"दया धर्मस्य सर्वस्वं, जीवितं कामितप्रदा । कामधेनुरिवापूर्वा, पूर्वपुण्येन लभ्यते" ॥ १ ॥ तथा अधीतश्रुतादेः पुनः पुनरावर्त्तनं 'स्वाध्यायः,' ध्येयालम्बना बुद्धिधारा ध्यानं, तदशुभमपि स्यादत आह 'सत्' शोभनं केवलकल्याणानुबन्धित्वेन प्रधानं सद्ध्यानम् । तथा तपसोऽनशनादेर्विधानमुपधानं वा करणमिति यावत् । तथा "समणेण सावएण य, अवस्सकायव्वयं हवइ जम्हा । अंतो अहोनिसिस्स य, तम्हा आवस्सयं नाम" ॥ १ ॥ इत्याद्यनुयोगद्वाराभिहितोभयसन्ध्याऽवश्यककर्त्तव्य-विशेष 'आवश्यकम्' । ततश्च स्वाध्यायश्च सद्ध्यानं चेत्यादिद्वन्द्वस्तानि आदौ येषां पूजादानप्रत्याख्यानादीनां ते तथा तेषु । अत्र दीर्घत्वं प्राकृतत्वात् । 'समुद्यमित्वं' सम्यगुद्यमपरत्वं, तद्विकलस्य तु अजागलस्तनकल्पत्वेन अपार्थकजन्मवाहित्वात् । तदुक्तम्–"आवश्यकध्यानतपोविधान–स्वाध्यायशून्यस्य दिनानि यस्य । प्रयान्ति तारुण्यहृता स्वमातु–र्जातेन पापेन किमत्र तेन ? ॥ १ ॥" इति वृत्तार्थः ॥ १४ ॥

तथा—

लोगस्स धम्मस्स य जं विरुद्धं, तव्वज्जणंमी परमोऽणुबंधो ।
पइक्खणं दुक्कडनिंदणम्मि, रागो सुभट्ठाणपसंसणे य ॥ १५ ॥

प्रथम-कुलकम् । १ ॥ ९ ॥

व्याख्या–'लोकविरुद्धं' मातृस्वसृगमनादिकं, 'धर्मविरुद्धं' नास्तिक्यवादादिकं, किञ्चित् पुनरुभयविरुद्धं चौर्यपारदारिकत्वादिकम्। तथा च लोकस्य धर्मस्य च, 'वा' शब्दे, तदुभयस्य च। इह च षष्ठीसप्तम्योरर्थं प्रति अभेदाद् लोके लोकविषये धर्मविषये च, तदुभयविषये च, यत् किञ्चिद् 'विरुद्धं' तद्विरोधाधायि। 'तद्वर्जने' तत्परिहारे, दीर्घत्वं प्राकृतत्वात्, 'परमः' प्रकृष्टो 'अनुबन्धः' चित्तस्थैर्येण सततामिनिवेशः, तस्यैव समस्तलोकलोकोत्तरप्रशंसनीयत्वाद्, इतरस्य तु अतिनिन्द्यत्वात्। तदुक्तम्–"मातृस्वसृस्वतनयागमनादिलोके, नास्तिक्यवादगुरुतल्पगते च धर्मे। निन्द्यो न यः परिहरेत् कलुषः प्रकृत्या, स श्वेव जीवति मुधा भरकृद् धरायाः" ॥ १ ॥ तथा 'प्रतिक्षणं' क्षणं क्षणं प्रति निरन्तरमित्यर्थः, 'दुष्कृतनिन्दने' स्वयमनुष्ठितप्राणातिपातादिदुष्टानुष्ठानेषु निन्दनम्, अतीतेषु तेषु पश्चात्तापपूर्वकं मिथ्यादुष्कृतदानं, तत्र 'रागो' अभिष्वङ्गः, इदं च पदं डमरुकमणिन्यायेन उभयत्रापि सम्बन्धनीयं, तद्रहितस्य तु न कदाचित् शुद्धिरिति। उक्तं च–"यः सर्वमूलोत्तरसद्गुणादि–प्रध्वंसपापेन न निन्दति स्वम्। निलीननीलीप्रचयांशुकश्रीः, कथं स शुद्ध्येदपि वर्षलक्षैः ॥ १ ॥" तथा 'शुभस्थानप्रशंसनं' स्वयंकृतजिनभवनसुसङ्घदानादिविषयं गुरुवन्दनकसामायिकादिविषयं चानुमोदनम्। तत्र धन्योऽहं येन मया इदमिदं च कृतमिति आत्मारामत्वं, चः समुच्चये, तद्विकलस्य पुनरुपबृंहारूपसम्यक्त्वाचारसमाराधनाभावेन प्रशंसाऽनास्पदत्वात्। तदुक्तम्–"द्रव्यस्तवो वा परमः स्वयं कृतो, भावस्तवो वा विधिना परैरपि। न शस्यते येन विमूढचक्रिणा, मनुष्यसंज्ञान्तरितः स रेणुकः" ॥ १ ॥ इति वृत्तार्थः ॥ १५ ॥

१ मनसि निवेशनीयम्।

तथा—

कामपिवासाइसमुत्थदोस–दुरंतयालोयणलालसत्तं ।
पमायवायाहयजीवलोय–जायंतदुक्खोहविभावणं च ॥ १६ ॥

व्याख्या–'कामपिपासा' भोगतृष्णा, सा आदिर्येषां ते कामपिपासादयः, आदिशब्दाद् मांसमद्यादिभोगतृष्णाग्रहः, 'तत्समुत्थाः' तदुत्पन्ना ये 'दोषाः' तत्तदशुभप्रवृत्त्यादीनि दूषणानि, तेषां 'दुरन्तता' चक्रवाकगजपारदारिकादीनां शोकातिरेकबन्धनमारणपर्यवसानता, तस्या 'आलोचनं' मनसि विमर्शनम् आलोकनं वा साक्षादेव दर्शनं, तत्र 'लालसत्वं' लम्पटत्वं तदेकतानत्वमित्यर्थः। तथाहि–"तीरात् तीरमुपैति रौति करुणं चिन्तां समालम्बते, किञ्चिद् ध्यायति निश्चलेन मनसा योगीव युक्तेक्षणः । स्वां छायामवलोक्य कूजति पुनः कान्तेति मुग्धः खगो, धन्यास्ते भुवि ये निवृत्तमदना धिग् दुःखिताः कामिनः" ॥ १ ॥ तथा–"रेवाजलं किसलयानि च शल्लकीनां, विन्ध्योपकण्ठगहनं स्वकुलं च हित्वा। किं ताम्यसि द्विप! गतोऽसि वशं करिण्याः, स्नेहो हि कारणमनर्थपरंपरायाः" ॥ १ ॥ तथा–"आत्मायुर्नरके धनं नरपतौ प्राणास्तुलायां कुलं, वाच्यत्वे हृदि दीनता त्रिभुवने तेनाऽयशः स्थापितम् । येनेदं बहुदुःखदायि सुहृदां हास्यं खलानां कृतं, शोच्यं साधुजनस्य निन्दितपरस्त्रीसङ्गसेवासुखम्" ॥ १ ॥ एतत्परिभावने हि प्रायः शुभभाववृद्धेः, अत एव कामतृष्णां सन्तस्त्यजन्ति इति। उक्तं च–"चक्रेभकामान्धजनेषु साक्षाद्, दुरन्ततां कामतृषः समीक्ष्य । लोकेऽत्र चामुत्र च दीर्घकालां, कथं सकर्णो न विकर्णयेत्

ताम्" ॥१॥ तथा शक्तस्य कर्त्तव्याऽकरणं 'प्रमादः' स च मद्यादिपञ्चहेतुकत्वात् पञ्चप्रकारः, स एव सज्ज्ञानतिरोधायकत्वात् संसारदुःखनिमित्तप्रबलाशुभप्रवृत्तिहेतुत्वाद् वा 'घातो' रोगविशेषः, यो "दशभूतसमो घात" इति लौकिकैर्गीयते, तेन 'आहतः' ताडितो व्याप्त इति यावत्, यो जीवलोकः प्राणिवर्गस्तस्य 'जायमानः' संपद्यमानो यो 'दुःखौघो' असातप्रवाहस्तस्य 'विभावनं' चित्ते सततं पर्यालोचनम्। चः समुच्चये। तथाहि-"मज्जओ तियसकयकणय-पयरपागारगोउरा वि पुरी। बारवई जायवसंकुला वि मच्चुम्मुहं पत्ता ॥१॥ कम्मवसेणं उम्मुक्कविसयवंछा विणस्सिउं पावा। निवडन्ति दुग्गईए भागवतसुहंकरमुणि व ॥ २ ॥ कोहेण निहयमइणो, जं जीवा चरियदुक्करतवा वि। करडकुरुड्डव सत्तमनरयपुढवीए निवडंति ॥ ३ ॥ निद्दाए चउद्दसपुव्विणो वि निव्वड्डपवरसुयनाणा। मरिउं कालमणंतं, अणंतकाएसु निवसंति ॥४॥ मुत्तूण नियकज्जं, भोयणदेसित्थिरायसंबद्धा। कीरंति जेहि विकहा, कहं नो ते दुक्खिया होंति ॥ ५ ॥" एतद्विभावनमन्तरेण च न कदाचिद् निर्वेदः। यत उक्तम्-"पञ्चप्रकारेऽपि चिरं प्रमादे, प्रवर्त्त्य निःशङ्कतया दुरात्मा। गर्भीकृतासंख्यसुदुःखराशि-र्निर्विद्यते नैव कदाप्यभव्यः" ॥ १ ॥ इति वृत्तार्थः ॥ १६ ॥

संतोससारत्तमलज्जिरत्तं, विसिट्ठचिट्ठासु विणीययया य।
पियंवयत्तं नयसुंदरत्तं, आगामिकालस्स पलोयणं च ॥ १७ ॥

व्याख्या-'संतोषसारत्वं' धनादिवाञ्छानिवृत्तिप्रधानत्वं, तस्यैव समस्तसुखान्तरेभ्योऽभ्यधिकत्वात्। यदुक्तम्-"संतोषा-

मृततृप्तानां, यत् सुखं शान्तचेतसाम् । कुतस्तद् धनलुब्धाना-मितश्चेतश्च धावताम्" ॥१॥ तथा 'अलज्जावत्त्वम्' ह्रीविकलत्वं, मुखकोशकरणप्रच्छादिकादिपरिहारादौ, कासु इत्याह-'विशिष्टचेष्टासु' मुक्तिनिबन्धनपूजासामायिकादिषु क्रियमाणासु, लज्जावत्त्वे हि सम्यग् यथोक्तक्रियाया असिद्धेः फलाभावः स्यात्। तदुक्तम्-"चैत्यार्चनादौ मुखकोशबन्धन-त्यागोंऽशुकस्यापि च वन्दनादौ । चौरस्य धर्मग्रहवद् महाज्ञा, व्रीडावहो यस्य न तस्य सिद्धिः" ॥१॥ तथा 'विनीतता' गुर्वादीनामभ्युत्थानोपदेशकारित्वलक्षणा, अविनीततायां हि इहलोकेऽपि फलासाधकत्वात् । तदुक्तम्-"प्राहुर्दाहकमेव पावकमिव प्रायोऽविनीतं जनं, प्राप्नोत्येष कदाचनापि न खलु स्वेष्टार्थसिद्धिं क्वचित् । तस्मादीहितदानकल्पविटपिन्युल्लासिनिःश्रेयस-श्रीसम्बन्धविधानधाम्नि विनये यत्नं विदध्याद् बुधः" ॥ १ ॥ 'चः' समुच्चये, तथा 'प्रियंवदत्वं' श्रोत्रसुखदमधुरभाषित्वं, तस्य केवलस्यापि समस्तदोषापसारकत्वात्। तदुक्तम्-"साक्षात् तावदयं विजातिरपरं काकैश्च संवर्धितो, रागश्चक्षुषि दृष्ट एव वपुषः किं कालिमा कथ्यते । एतावत्यपि पश्य कस्य न मनः पुष्णाति पुंस्कोकिलः, प्रायेण प्रियवादिता भगवती दोषानपि प्रोञ्छति" ॥१॥ तथा 'नयो' न्यायो देशकुलाद्यविरुद्ध आचार-स्तत् 'सुन्दरत्वं' तन्मनोज्ञत्वं, न्यायविकलस्य हि सर्वोद्वेजकत्वेन असहायतापत्तेः। तदुक्तम्-"यान्ति न्यायप्रवृत्तस्य, तिर्यञ्चोऽपि सहायताम्। अपन्थानं च गच्छन्तं, सोदरोऽपि विमुञ्चति" ॥१॥ तथा 'आगामिकालस्य' प्रारब्धकार्योत्तरविपाकसमयस्य, 'प्रलोकनं' बुद्धिचक्षुषा निरीक्षणं, न चास्य पूर्वोक्तादनौत्सुक्यादविशेषः, तस्य क्रियमाणप्रस्तुतकार्यमात्रसाधकत्वात्, अस्य तु कार्यनिष्पत्तौ अनन्तरं विपद्भावाभावहेतुत्वात्। यस्तु आगामिकालं न निरीक्षते तस्यानेकानर्थसंभारभावः । तदुक्तम्-"आगामिनं कालमनाकलय्य, प्रारभ्यते येन गुरुस्व-

कार्यम् । पौलस्त्यवत्पस्त्यमसौ ध्रुवं स्यादकीर्त्यसुध्वंसकुलक्षयाणाम्" ॥ १ ॥ चः समुच्चये । इति वृत्तार्थः ॥ १७ ॥

स्वकार्यकृताकृतत्वपर्यालोचनमपि गुण इत्येषोऽपि देहे निवेशनीय इत्याह—

कयं मए किं करणिज्जजायं, किं नो कयं किं व कयं न सम्मं ।
किं वा पमत्तो न सरामि इण्हिं, इच्चाइ किच्चाणविभावणं च ॥ १८ ॥

व्याख्या–'कृतं' विहितं 'मया' इत्यात्मनिर्देशः, किमिति आत्मगताऽज्ञातपर्यालोचने, 'करणीयजातं', पूजासामायिकादिकृत्यवृन्दं, किं वा तदेव पूजादिकं कृत्यमपि समर्थेनापि 'नो' नैव कृतं, 'किंव' इति विकल्पे, ह्रस्वत्वं प्राकृतत्वात्, 'सम्यग्' यथावन्न कृतं दुष्प्रत्युपेक्षितत्वादिवत् कथंचिद् विधिविरहितत्वात्, 'किं वा प्रमत्तो' निद्रालस्याद्युपहतो 'न स्मरामि' नाऽनुचिन्तयामि, 'इदानीं' संप्रति कृत्यमिति योगः । 'इत्यादि' एवंप्रभृतीनां 'कार्याणां' धर्मसम्बद्धानां 'विभावनं' पर्य्यालोचनं, इत्यादि एवंप्रकारमिति विभावनविशेषणं वा, 'चः' समुच्चये । एवंविधपर्य्यालोचनं हि भावानुसरणं प्रभातसमयेऽपि कृत्यतयोपदिष्टम् । इति वृत्ताष्टकार्थः ॥ १८ ॥

तदेवं सामान्येन स्वात्मनि गुणविनिवेशमभिधाय अधुना तथाविधगुणवत्पुरुषदृष्टान्तेन तदनुसारेण प्रवर्त्तितव्यमित्याह—

गंभीरधीराण गुणायराणं, सणंकुमाराइमहामुणीणं ।
आणंदमाईण य सावयाणं, सयाणुसारेण पयट्टणं च ॥ १९ ॥

द्वादश-
कुलकम् ।

॥ १२ ॥

व्याख्या—'गम्भीराः' सुखदुःखहेतुसद्भावेऽपि अदर्शितमुखादिविकाराः, 'धीराः' [illegible] अपि अविचलितचित्तावष्टम्भाः, ततो गम्भीराश्च ते धीराश्चेत्यादिकर्मधारयस्तेषाम्। तथा 'गुणाकराः' सामान्यविशेषगुणनिधानं, तेषाम्। केषामित्याह—'सनत्कुमारादिमहामुनीनां' तुर्यचक्रवर्त्तिप्रभृतिमहाव्रतिनाम्, आदिशब्दाद् मेघकुमारादिग्रहः। तथा 'आनन्दादीनां' भगवन्महावीरश्राद्धविशेषप्रभृतीनाम्। 'चः' समुच्चये, 'श्रावकाणां' श्रमणोपासकानाम्, आदिशब्दात् कामदेवादिग्रहः। 'सदा' सर्वकालम् 'अनुसारेण' तदानुरूप्येण 'प्रवर्त्तनं' प्रवृत्तिः कार्यमिति शेषः, 'चः' समुच्चये। सनत्कुमारो हि भगवान् कर्मलाघवात् तावत् स्तोकमात्रेणाऽपि प्रतिबोधकारणेन तमाससाद, सौभाग्यातिशयाच्च दीक्षानन्तरमपि षण्मासान् यावद् अन्तःपुरचतुरङ्गसेनानिधानादिरूपराज्यलक्ष्म्याऽनुजग्मे, न तु तत्र प्रगलितचक्षुर्नासावंशश्वित्रिवदन इव सस्नेहं चक्षुरपि निचिक्षेप, येषु एकैकोऽपि प्राकृतजनस्य प्राणापहारी तादृशां कासश्वासज्वरादिव्याधीनां सप्तकं दवदहनदह्यमानदारुदरवद् दुर्विषहतापं च वर्षशतसप्तकं यावन्निरुद्वेगमतिः सेहे, शबरवैद्यरूपोपस्थितविजयवैजयन्ताभिधानत्रिदशद्वयेन नानासामवादपुरस्सरमाधीयमानामपि व्याधिप्रतिक्रियां नानुमेने, व्याधितोऽपि च खड्गधारासंचरणवद् दुरनुचरां समित्यादिरूपचरणचर्यां सततमाचचार, वर्षलक्षं यावत्षष्ठादि अष्टमासान्तं तपोऽपि निरन्तरं तप्तवान्, इति तच्चरितानुसारि उपदिश्यते। यथा च एतदेवं तथा अस्माभिः सर्गबन्धरूपे सनत्कुमारचक्रिचरित्रे विस्तरेणोक्तमस्तीति नेह प्रतन्यते, । तथा आनन्दश्रावकोऽपि महात्मा प्रतिबोधानन्तरं षोडश वर्षाणि यावत् सम्यक्त्वमूलस्थूलप्राणातिपातविरत्यादिरूपं श्राद्धधर्मं प्रतिपालयन् द्रव्यकोटिद्वादशक-

प्रथम-
कुलकम् ।
१

॥ १२ ॥

सद्भावेऽपि स्वशरीरेऽत्यन्तं संकीर्णगृहीतपरिग्रहपरिमाण एकादशश्रावकप्रतिमाप्रतिपत्तिमान् श्रावकत्वेऽपि अतिकमंला-घवत्वेनाऽवाप्तावधिज्ञानरत्न आसीदिति तदनुसारेण प्रवृत्त्युपदेशः । इति वृत्तार्थः ॥ १९ ॥

अथ संक्षेपोपदेशसर्वस्वमाह—

किं भूरिभेएण पयंपिएणं, जं दूसणं नो सकुलक्कमस्स ।
न यावि जं लोगदुगे विरुद्धं, तं सव्वजत्तेण निसेवणिज्जं ॥ २० ॥

व्याख्या–भो भव्या ! भवतां पुरतो 'भूरिभेदेन' नानाप्रकारेण 'प्रजल्पितेन' प्रकर्षतो भापितेन 'किं ?' न किंचिद्, निरर्थक-मेव इत्यर्थः। बहोरपि प्रजल्पितस्य इदमेव तत्त्वमित्याह–'यत्' कार्यं दानक्षमादिकं, दूष्यतेऽनेनेति करणे युट्प्रत्यये 'दूषणं' दूषकं 'नो' नैव 'स्वकुलक्रमस्य' तथाविधनेपथ्यादेरिव स्वगोत्राचारस्य । 'न चापि' नैव 'यल्लोकद्वये' इहलोकपरलोकलक्षणे 'विरुद्धं' विरोधभाग् भवतीति शेषः । किंचिद् नास्तिकवादाभ्युपगमादिकमिहलोकाऽविरुद्धमपि परलोकविरुद्धं भवतीति लोकद्वयग्रहणं, 'तत्' कार्यं 'सर्वयत्नेन' समस्तादरेण 'निषेवणीयं' कर्त्तव्यतया आश्रयणीयं, तदाश्रयणस्यैव समस्तसमीहित-साधकत्वेन तत्त्वरूपत्वात् । सर्वत्र चात्र एकादशाक्षरोपजातिलक्षणं छन्दः । इति वृत्तार्थः ॥ २० ॥

अथैवं गुणोपार्जनफलमुपदर्शयन्नाह—

इय विमलगुणाणं अज्जणंमी रयाणं, परमपयनिमित्तं बद्धलक्खाण तुम्हं ।

कासरस्सहमज्झे ठाइही सग्गमुक्खु-भवबरसुहलच्छी सग्गुणायट्टिय व्व ॥ २१ ॥

व्याख्या–'इति' उक्तप्रकाराणां 'विमलगुणानां' मिथ्यात्वादिकलङ्कवियोगेन निर्मलसम्यक्त्वादिगुणानाम्, 'कर्णे' सादरस्तिमतया श्रवणे, दीयतं प्रक्षेपणार्थात्, 'रत्नानाम्'–अनन्यसाधारणत्वेन सुकेलार्थालक्षणानां, पुनः कीदृशानामित्याह–'परमपरमेष्ठिनां' मोक्षप्राप्तिकारणेन 'सदलक्षणानां' विहितविधिकारणानां 'युष्माकं' भवतां, किमित्याह–'कामलोकमध्ये' हस्तकमलानां 'स्थास्यति' अवस्थिति करिष्यति 'स्वर्गमोक्षोद्भवा' सुरलोकापवर्गसंभवा, का चासौ 'वरसुखलक्ष्मीः' प्रधानानन्दसंपद्, कयोपेक्षयाह–'गुणाकृष्टा इव' शोभनसूत्रोत्कटतानुरागादिगुणाहृता इव । अयमत्र तात्पर्यार्थः–यथा [illegible] एतैर्गुणैः समाकृष्टा स्वर्गापवर्गसुखलक्ष्मीर्युष्माकं करकमले स्थास्यति । इति गाथार्थः ॥ २१ ॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

इति गुणचन्द्रगण्यग्रणी[illegible]विरचितायां द्वादशकुलकवृत्तौ प्रथमकुलकविवरणं समाप्तम् ॥

---

## द्वितीयं कुलकम् ।

प्रथमकुलके तावदपूर्वज्ञानाभ्यासादयो गुणा उक्ताः । सम्यग्ज्ञाने च सति जीवितधनादीनां चञ्चलत्वमिष्टसंयोगादीनां च दुःखमूलत्वं विचिन्त्य संसारनैर्गुण्यभावनार्थमिति द्वितीयकुलकाभिसंबन्धः, तस्य चेदं गाथात्रयमादिसूत्रम्—

पवलपवणप्पणुल्लिय—कयलीदललग्गसलिललवलोलं ।
अवलोइऊण जीविय—जुव्वण-धण-सयणसंजोगं ॥ १ ॥
संजोगमूलमिह्र पुण, पुणरुत्ताणंततिक्खदुक्खोहं ।
लक्खिय सत्ताण सदो—वउत्तचित्तेहि तुब्भेहिं ॥ २ ॥
चिंतेयव्वं भवनि—ग्गुणत्तणं दुल्लहत्तणं तह य ।
माणुस्सखित्तपमुहा—ण कुसलनिप्पत्तिहेऊणं ॥ ३ ॥

व्याख्या—'प्रबलपवनेन' गाढतरवायुना 'प्रणुन्नं' प्रेरितं, द्विर्भावः प्राकृतत्वात्, यत् 'कदलीदलं' रम्भापत्रं, तत्र 'लग्नः' संबद्धो यः 'सलिललवो' जलकणस्तद्वद् 'लोलं' चञ्चलं 'अवलोक्य' ज्ञानदृश्या दृष्ट्वा, किं तदित्याह—'जीवितं' प्राणितम्, आयु-

द्वादश-कुलकम् ।

॥ १४ ॥

रिति यावत्, 'यौवनं' सकलकृत्यकरणक्षमं तारुण्यं, 'धनं' वित्तं 'स्वजना' भ्रातृपितृव्यादयः, ततश्च जीवितं च यौवनं च इत्यादिद्वन्द्वः, तैः सह 'संयोगो' जीवस्य सम्बन्धस्तम् । सर्वेषामपि जीवितादीनामनित्यत्वेन तत्संबन्धस्यापि अनित्यत्वात्, न हि अनित्यसम्बन्धो नित्यो भवतीति ॥१॥ तथा 'इह' जगति 'पुनः' शब्दो विशेषणे, ततः 'संयोगमूलम्' अभीष्टवस्तुसम्बन्धकारणकं 'पुनरुक्तानन्ततीक्ष्णदुःखौघं' पुनः पुनर्जायमानापर्य्यन्तातितीव्रबाधासमूहं च 'लक्षयित्वा' सम्यगवगम्य, सम्बद्धे हि अभिमतवस्तुनि अवश्यं तत्र स्नेहातिरेकः, स च बन्धनं समाख्यात इत्यर्थः । 'सत्त्वानां' संसारिप्राणिनां 'सदा' सर्वकालम् 'उपयुक्तचित्तैः' सावधानमानसैः, इदं च पदं काकाक्षिगोलकन्यायेन चिन्तनीयपदेनापि योजनीयं, 'युष्माभिः' भवद्भिरिति ॥ २ ॥ जीवितप्रभृतीनां चञ्चलत्वमिष्टसंयोगस्य च दुःखौघहेतुत्वमवधार्य किं कर्त्तव्यमित्याह–'चिन्तनीयं' मनसि अवधारणीयं, 'भवनैर्गुण्यं' संसारविगुणभावोऽसारता इति यावत् । जीवितादयो हि भावाः सर्वदा संसारानुवर्त्तिनः, तेषामसारत्वे च संसारस्यापि असारता, ततोऽत्र निर्बन्धो न विधेय इति भावः । 'तथा चेति' समुच्चये, ततो 'दुर्लभत्वं च' चोलकादिदृष्टान्तदशकेन दुष्प्रापत्वं च, 'मानुष्यक्षेत्रप्रभृतीनां' श्रवणोपग्रहपर्य्यन्तानां 'कुशलनिष्पत्तिहेतूनां' पुण्योपार्जननिमित्तानाम् । भवस्तावद् निर्गुणः, पुण्योपार्जननिमित्तानि अत्यन्तं दुष्प्रापाणि, तदेवंविधेऽपि अत्रैतानि लब्ध्वा नाऽस्माकमेवमेव धर्मसाधनविकलानां स्थातुमुचितमिति रहस्यम् । इति गाथार्थः ॥ ३ ॥

ततः किं कर्त्तव्यम्? इत्याह—

भावेयव्वं भव्वं, निव्वाणसुहिक्ककारणमवंझं । सिद्धंततत्तमुज्झि–त्तु कुग्गहं निपुणवुद्धीए ॥ ४ ॥

द्वितीयं कुलकम् २

॥ १४ ॥

28

व्याख्या–सिद्धान्ततत्त्वं निपुणबुद्ध्या भावयितव्यमिति योगः। तत्र 'भावयितव्यं' मनस ऐकाग्र्येणानुचिन्तनीयं, 'सिद्धान्ततत्त्वं' श्रुतरहस्यमुत्सर्गापवादादिविषयत्वेन व्यवस्थापनीयमित्यर्थः, न पुनः श्रूयमाणाक्षरमात्रविषयत्वेन। यथा दशवैकालिके–"सुत्तस्स मग्गेण चरिज्ज भिक्खू"। तत्रापि नौघत एव यथाश्रुतग्राही स्यात्, अपि तु "सुत्तस्स अत्थो जह आणवेइ" सूत्रस्यार्थः पूर्वापराऽविरोधितन्त्रयुक्तिघटितः पारमार्थिकोत्सर्गापवादगर्भो यथाऽऽज्ञापयति नियुङ्क्ते तथा वर्त्तेत नान्यथा। यथेह अपवादतो नित्यवासेऽपि वस्त्रादेन परिभोगादि साधूनां संस्तारकगोचरादिपरिवर्त्तनेन, अन्यथा शुद्धापवादायोगाद्, इत्येवं प्रतिक्रमणवन्दनादिष्वपि तदर्थप्रत्युपेक्षणेनानुष्ठानेन वर्त्तेत, न तु तथाविधलोकहेर्या तत् परित्यजेत्, आशातनाप्रसङ्गादिति। तथा चोपदेशमालायाम्–"जणस्स धम्मं परिकहेइ" त्ति। एतत्पच्छाकडविषयम्। यथा वा "मग्गविभेओ विभीसियाओ य" इति, जिनकल्पिकविषयं कीदृशं तदित्याह–'भव्यं' श्रेयोभूतं, 'निर्वाणसुखैककारणं' मोक्षानन्दाद्वितीयहेतुम्। किंचित् कस्यचित् कारणमपि स्याद् जलवृष्टिरिव सस्यस्य, कदाचिद् व्यभिचरेद् इत्यत आह–'अवन्ध्यं' सफलमव्यभिचारीत्यर्थः, न हि सिद्धान्ततत्त्वावगमे तथैव सम्यक् प्रवृत्तौ कदाचिन्न निर्वाणं भवति। कुग्रहात् तदवगमोऽपि न श्रेयान् इत्याह–'उज्झित्वा' परित्यज्य 'कुग्रहम्' असदभिनिवेशं, विपर्यये हि न तत्त्वावगम इति। 'निपुणबुद्ध्या' मार्गानुसारिण्या मत्या। इति गाथार्थः ॥ ४ ॥

किमिति कुग्रहस्य परिहारोऽभिहित इति तद्दोषमाह–

जम्हा थेवो वि हु हो–इ कुग्गहो सयलकुसलपच्चूहो। तालउडविसलवो इव, महंतसंमोहहेऊ य ॥५॥

द्वादश-कुलकम्। ॥ १५ ॥

व्याख्या–यस्मात् कारणात् 'स्तोकोऽपि' अल्पोऽपि, आस्तां बहुः, 'भवति' संपद्यते, 'कुग्रहो' असदभिनिवेशः 'सकलकुशलप्रत्यूहः' समस्तस्वर्गापवर्गादिकल्याणान्तरायः। श्रूयते हि एकपदमात्राभिनिवेशोऽपि सम्यक्त्वभ्रंशे जमालेर्बहुः संसारः। तथा 'तालपुटविषलव इव' सद्योघातिगरललेशवत् 'महासंमोहहेतुश्च' मिथ्यात्वकारणत्वेन विपुलाज्ञाननिबन्धनं च स्यात्, तालपुटपक्षे तु संमोहो गाढमूर्च्छा, कल्याणानि तु वैषयिकसुखोपभोगाः, 'चः' समुच्चये। आग्रहे हि सति तत्त्वविषयां सद्युक्तिमपि अतत्त्वविषयत्वेनाध्यवस्यति। तदुक्तम्–"आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्य निविष्टा। पक्षपातरहितस्य तु युक्ति–र्यत्र तत्र मतिरेति निवेशम् ॥ १ ॥" इति गाथार्थः ॥ ५ ॥

अथ सिद्धान्तस्यैव तत्त्वं विमर्शनीयम् इति तत्कारणं विवक्षुः कुग्रहोत्पत्तौ गाथात्रयेण कारणमालामाह–

जइ वि हु बहुविहमयभे–यसवणओ समयअनिउणत्तणओ।
उस्सग्गऽववायविवे–गविरहओ अतहबुद्धिचा ॥ ६ ॥
समयत्थपईवोवम–सुहगुरुसंसग्गिलाभविगमाओ।
सिद्धंतविरुद्धपम–त्तसत्तठिइदंसणाओ य ॥ ७ ॥
निउणाण वि उप्पज्जं–ति कुग्गहा किमुय मुद्धबुद्धीणं। ॥ १५ ॥
तह वि हु विहुणिय धीरे–हिं ते लहुं चिंतियव्वमिणं ॥ ८ ॥

द्वितीयं कुलकम्। २

व्याख्या—यद्यपि निपुणानामपि उत्पद्यन्ते कुग्रहाः, तथापि एतत् चिन्तनीयमिति योगः। 'यद्यपि' इति अभ्युपगमे, 'तुः' पूरणे, 'बहुविधमतभेदश्रवणात्' जिनमतेऽपि नानाप्रकारस्वविकल्पशिल्पिनिर्मितदर्शनविशेषाकर्णनात्। तथाहि—केचिदाहुः पाक्षिकादिप्रतिक्रमणं पौर्णमास्यामेव कर्त्तव्यम्, अपरे तु श्राद्धानां प्रतिक्रमणमेव निषेधन्ति, द्वादशावर्त्तवन्दनकं तु वस्त्राञ्चलेनैव कर्त्तव्यमित्याहुः, जिनप्रतिमादिप्रतिष्ठां तु सूरीणां कर्त्तव्यतया उभयेऽपि न मन्यन्ते। केचित् पुनर्नमस्काराद्युपधानतपः श्राद्धानामकर्त्तव्यमेव इत्याहुः। अपरे तु अत्यन्तधर्मश्रद्धालुतया शुद्धभैक्षादिग्रहो गच्छवासे न निर्वहतीति तत्परित्यागमेव अभ्युपजग्मुः। इत्यादिश्रवणात् तावत् तत्रैव मनसो व्यवस्थितौ कुग्रहसंभवः। ननु सिद्धान्तात् तन्निश्चयो भविष्यतीत्याह—'समयानिपुणत्वात्' सिद्धान्तार्थविषयकौशलाभावात्, सत्यपि वा कथंचित् तत्कौशले 'उत्सर्गापवादविवेकविरहात्' तत्र हि किंचिदकृत्यमपि आधाकर्मादिकं कदाचिद् विधेयतयोपदिष्टमिति न सम्यगकर्त्तव्यमिति ज्ञायते। तथा—'तथा' मार्गानुसारिणी 'बुद्धिः' मतिर्यस्य स तथाबुद्धिः, न तथा इत्यतथाबुद्धिस्तद्भावोऽतथाबुद्धित्वं, तस्मात्। ह्रस्वत्वं प्राकृतत्वात्। तथा विशिष्टबुद्ध्यभावादपि कुग्रहभावः। इति गाथार्थः ॥ ६ ॥ ननु सद्गुरुसम्पर्कात्तदभावो भविष्यतीत्यत आह—'समयार्थप्रदीपोपमः' सिद्धान्ताभिधेयस्य प्रकाशकत्वेन प्रदीपकल्पः, स चासौ 'शुभगुरुश्च' गीतार्थाचार्यश्च, तेन 'संसर्गः' संपर्कस्तस्य 'लाभः' प्राप्तिस्तस्यापि ('विगमात्') अभावात्, । तथापि अप्रमत्तसुविहितक्रियावलोकनेन समीचीनमार्गनिश्चयात् तदभावो भविष्यतीत्यत आह—'सिद्धान्तविरोधिनी' श्रुतविरुद्धा या काचित् प्रमत्तसत्त्वानां विषयकषायाद्युपेतप्राणिनां दीक्षाग्रहणेऽपि 'स्थितिः' वृत्तिः, स्त्रीसंसर्गाशुद्धभोजनकलहादिरूपा 'तद्दर्शनादपि' तदवलोकनात्, 'चः' समु-

च्चये। इति गाथार्थः ॥ ७ ॥ अथैतन्निमित्तां कुग्रहोत्पत्तिमाह–'निपुणानामपि' शास्त्रश्रवणादिना संजाततदवगमानामपि, आस्तामनिपुणानां साध्वादीनामित्यपेरर्थः, 'उत्पद्यन्ते' प्रादुर्भवन्ति 'कुग्रहाः' नैतत् पाक्षिकप्रतिक्रमणादि एवं, किंतु एवमेवेति कदभिनिवेशाः। 'किमुत' इति विकल्पे, किं पुनः 'मुग्धबुद्धीनाम्' अतिमन्दमतीनां श्रावकादीनां, तेषां ते सुलभा एवेति भावः । ततः किमित्याह–'तथापि' एवमपि कदाचित् कथंचित् कदाग्रहभावेऽपि, हुः पूरणे, 'विधूय' शास्त्रज्ञजनसंपर्कादिना विक्षिप्य 'धीरैः'–बुद्धिमद्भिः सात्त्विकैर्वा 'तान्' कदाग्रहान्, 'लघु' शीघ्रं मकारोऽलाक्षणिकः, 'चिन्तनीयं' मनसि पर्यालोचनीयं 'इदं' वक्ष्यमाणं वस्तु । इति गाथार्थः ॥ ८ ॥

द्वितीयं कुलकम् । २

तदेवाह—

अहह असुहाण कम्माण, विलसियं जप्पभावओ अम्हे ।
संमोहतिमिरभीमे, काले इहइं समुप्पन्ना ॥ ९ ॥

व्याख्या–'अहह' इति खेदे, 'अशुभानां' पापप्रकृतीनां 'कर्म्मणां' कर्मांशानां 'विलसितं' विजृम्भितम् । 'यत्प्रभावाद्' यस्य कर्मविलसितस्य माहात्म्याद्, वयं 'संमोहतिमिरभीमे' अत्यन्तप्रबलाज्ञानान्धकाररौद्रे, 'काले' दुःषमारूपे 'इहइं'ति अत्र वर्त्तमानतया प्रत्यक्ष इव 'समुत्पन्नाः' संजाताः, एवमात्मकर्मण एव दोषो देयः, न तु कदाग्रहाधायिषु, तेषां तत्स्वभावत्वादेव । इति गाथार्थः ॥ ९ ॥ ॥ १६ ॥

यत्र काले किम् ? इत्याह—

नो पिच्छामो सव्व–न्नुणो सयं न मणपज्जवजिणाई ।
न य चुद्दसदसपुव्वि–पमुहे विस्सुयसुयहरे वि ॥ १० ॥

व्याख्या–'नो' नैव 'प्रेक्षामहे' अवलोकयामः, 'सर्वज्ञान्' सर्वविदः तीर्थकरादीन् 'स्वयं' साक्षात्। तथा अर्द्धतृतीयद्वीपसमुद्रवर्त्तिसंज्ञिपञ्चेन्द्रियाणां 'मनांसि' वस्तुचिन्तनव्यापाराणि 'पर्यवति' धातूनामनेकार्थत्वात् परि समन्तात् अवगच्छतीत्यचि प्रत्यये मनःपर्य्यवं, तत्सकाशादभिन्नादात्मनः आत्मापि मनःपर्य्यवं, तच्चासौ रागादिजेतृत्वाद् 'जिनो' मनःपर्य्यवजिनः, स आदिर्येषामवधिजिनादीनां ते तथा, तानपि न प्रेक्षामहे इति योगः, इदं च पदं सर्वत्र योज्यम्। एते त्रयोऽपि प्रत्यक्षज्ञानिनः, अत एतद्योगे स्यादपि कदाचित् कदाग्रहनिवृत्तिरिति भावः। 'न च' नैव 'चतुर्दशदशपूर्वधरप्रमुखान्' तदादीन्, प्रमुखशब्दाद् नवपूर्वधरादिग्रहः, कीदृशांस्तानित्याह–'विश्रुता' विख्यातास्ते च ते 'श्रुतधराश्च' ते तथा तान्, विशिष्टश्रुतज्ञानवत इत्यर्थः। अपिशब्दः समुच्चये। तेऽपि श्रुतज्ञानबलीयस्त्वेन कदाचित् कुग्रहानुच्छिन्द्युः। इति गाथार्थः॥ १० ॥

तथा च सर्वथा कुग्रहोच्छेदकपुरुषाभावात् का गतिरस्माकम्? इत्यपि अनुचिन्तनीयमित्याह—

एवं पि अम्ह सरणं, ताणं चक्खू गई पईवो य। भयवंसिद्धंतु च्चिय, अविरुद्धो इट्ठदिट्ठेहिं॥ ११ ॥

व्याख्या–यद्यपि सर्वज्ञादिभिः सह दर्शनं नास्ति, 'एवमपि' तथापि अस्माकं भगवत्सिद्धान्त एव शरणमिति योगः।

[illegible] इति गाथार्थः ॥ २१ ॥

यदा च [illegible] तदा किं कर्तव्यमित्याह—

[illegible] ॥

[illegible] ॥ २२ ॥

व्याख्या– [illegible]

णापर्वाऽपि पञ्चम्यामेव विधेयं स्यात्। अथ तस्य चतुर्थ्यामाचरितत्वेन तत् चतुर्थ्यामेव, तर्हि पाक्षिकादि अपि चतुर्दश्यामेव, यतस्तैरेव गीतार्थैः कालिकाचार्यप्रमुखैः पर्युषणापर्ववत् चतुर्दश्यामेव तदपि आचरितम्, अन्यथा हि सिद्धान्ताभिहितस्य पञ्चकदशकस्य दशमपञ्चकस्यापरिपूर्त्तौ तच्चतुर्थ्यां न निर्वहेदिति विचारः, तत् सिद्धमेतत् पाक्षिकादि प्रतिक्रमणं चतुर्दश्यामेव कर्त्तव्यं, गीतार्थाचरितत्वात्, चतुर्थ्यां पर्युषणापर्ववदिति। तथा प्रतिक्रमणस्यापि आवश्यकापरनाम्नः "समणेण सावएण य" इत्याद्यनुयोगद्वारवचने। तथा "जं णं इमे समणो वा समणी वा सावगो वा साविगा वा तच्चित्ते तम्मणे तल्लेसे तदज्झवसिए तत्तिव्वज्झवसाणे तदट्ठोवउत्ते तदप्पियकरणे तब्भावणभाविए एगग्गमणे जिणवयणधम्माणुरागरत्ते उभओ कालं आवस्सयं करेंति तं भावावस्सयं"। इति भावावश्यकलक्षणे च गीतार्थाचरणे च तन्निषेधकवचनाभावे च सति कथं निषेधः कर्त्तुं पार्यते इति। अत्र प्रयोगः-श्राद्धा उभयकालप्रतिक्रमणाधिकारिणः, सम्यक्त्वव्रताद्यतिचारशोधकत्वात्, सुविहितसुसाधुवदिति। यथा द्वादशावर्त्तवन्दनकमपि वस्त्राञ्चलेन श्राद्धानां न क्वापि सिद्धान्तेऽभ्यधायि, यत्र यत्र साध्वादीनां तदभिहितं तत्र तत्र मुखवस्त्रिकाप्रत्युपेक्षणपूर्वकमेव, श्रावकोऽपि च वन्दनाधिकारी उक्तः, ततस्तस्यापि तथैव तद् युज्यते। किञ्च, यथाजातत्वमुत्त-रीयाभावेनैव रजोहरणमुखवस्त्रिकासद्भावेनोक्तं, श्रावकस्य तु रजोहरणाभावे मुखवस्त्रिकैव अवशिष्यते, गीतार्थैः पूर्वाचार्यै-रेतावन्तं कालमित्थमेवोपदर्शितमिति मुखवस्त्रिकया एव वन्दनकमपि। अत्र प्रयोगः-श्रावका द्वादशावर्त्तवन्दनके मुखव-स्त्रिकोपकरणवन्तः, तत्साधनसाध्यसाधकत्वात्, ये यत्साधनसाध्यसाधकास्ते तदुपकरणवन्तो, यथा पटसाधकाः तुर्यादिमन्तः कुविन्दाः, तथा चैते, तस्मात् तथा। तथा जिनप्रतिमादिप्रतिष्ठाऽपि विश्रुतश्रुतधरैः सिद्धसेनार्यसमुद्रोमास्वातिहरिभद्रसूरिप्र-

भृतिभिः स्वस्वप्रतिष्ठाकल्पेषु त्रयोदशसु सूरिकृत्यत्वेनैवोपदर्शनात् , श्राद्धकृत्यत्वेन तु क्वापि अदर्शनात् सूरीणामेवासौ युज्यते,
गीतार्थाचरणाया अत्रैव भावादिति । अत्र प्रयोगः–जिनबिम्बादिप्रतिष्ठा सूरिणा कार्या, तस्य तत्राधिकारित्वात् , चैत्यपूजा-
धिकारिपूजकपूजावत् । नमस्कारादि उपधानतपोऽपि महानिशीथोक्तत्वाद् इन्द्रियजयाद्युपायत्वाद् निषेधकाऽऽगमाभावाद्
गीतार्थाचरितत्वाद् निरवद्यत्वाच्च न निषेद्धुमुचितम् । अत्र प्रयोगः–नमस्कारादि उपधानतपो भव्यानां विधेयं, सिद्धान्ता-
भिहितत्वात् , अङ्गोपाङ्गादितपोवत् । तथा शुद्धभैक्षादिलाभाभावभयेन गच्छवासत्यागोऽपि यूकाभयेन परिधानत्यागतुल्यः
प्रतिभासते, यत एतत्त्यागे परमार्थत आज्ञाया एव त्यागात् चरणस्यापि त्यागात् । यत उक्तम्–"आणारुइणो चरणं
आणाइ च्चिय इमं ति वयणा उ" । तथा–"एसा य परा आणा, पयडा जं गुरुकुलं न मुत्तव्वं" । ततश्च "एयम्मि परिच्चत्ते,
आणा खलु भगवओ परिच्चत्ता । तीए य परिच्चागे, दुण्ह वि लोगाण चागो त्ति" ॥ १ ॥ "ता न चरणपरिणामे एयं असमं-
जसं इहं होइ" ॥ किञ्च–"एयम्मि संठियाणं खंताईणं पि सिद्धीत्ति" ॥ तथा–"खंतादभावउ च्चिय नियमेण तस्स होई चागो
त्ति" ॥ १ ॥ पिण्डविशुद्ध्यादेस्तु आत्मायत्तत्वेन प्रत्युपेक्षणादिशुद्धिवद् गच्छस्थितौ एव सम्यग्भावात् , तस्माद् गच्छत्या-
गाभ्युपगमोऽपि असद्ग्रह एव । यत अत्रापि प्रयोगः–गच्छवासत्यागिनो न चरणपरिणामवन्तः, तद्विरुद्धाचरितत्वात् ,
यो यद्विरुद्धाचरितो नासौ तत्परिणामवान् , यथा सर्वविरतो न वधादिपरिणामवान् , तथा चैते, तस्मात् तथा । न च
तद् विरुद्धाचरितत्वमसिद्धं, स्मारणवारणाद्यसहनेन क्षान्त्याद्यभावस्य चरणपरिणामविरुद्धत्वात् , तेषां च क्षान्त्याद्यभा-
वस्य अवश्यंभावित्वात् । तथा चोक्तं भद्रबाहुस्वामिपादैः–"जह सागरम्मि मीणा, संखोभं सागरस्स असहंता । निंति

तओ सुहकामी, निग्गइमित्ता विणस्संति ॥ १ ॥ एवं गच्छसमुद्दि, सारणवाइहि पणुल्लिया संता । निंति तओ सुहकामी, मीणा व जहा विणस्संति ॥२॥" एवं चरणपरिणामाभावे दुष्करक्रियाकारित्वमपि लौकिकमुनिकष्टक्रियावद् अल्पफलमेवेति । एवं मध्यस्थभावेन विचारणीयः, 'चः' समुच्चये। न केवलं विचारणीयोऽपि तु तदनुसारेण प्रवर्त्तनीयमपि, इत्यत आह–'तत्परतन्त्रत्वेन' सिद्धान्ताज्ञायत्तत्वेनैव, एवकारो अवधारणे, 'यतितव्यं' क्रियायां यत्नः कार्यः, सर्वकार्येषु समस्तद्रव्यस्तवभावस्तवानुगतप्रयोजनेषु । इति गाथार्थः ॥ १२ ॥

किमित्येवं सर्वज्ञाद्यभावे आगमस्यैव सर्वप्रकारेण आश्रयणीयता प्रतिष्ठिता, यावता संप्रत्यपि अतिपाण्डित्यात् केचित् तत्त्वं विमृश्य प्रकाशयिष्यन्ति किं सिद्धान्तेन? इत्यत आह–

मार्गदर्शक : आचार्य श्री सुविधिसागर जी महाराज

जे भावा तत्तो वि हु, तद्देसगगीयसाहुवसओ वा ।
सम्मं कहवि न नाया, बहुसो चिंतिज्जमाणा वि ॥ १३ ॥
ते किं समइवियप्पण–परपुरिसवसेण निच्छयमुविंति ।
न हि सूराणुज्जोइय–नहमुज्जोविंति खज्जोया ॥ १४ ॥

व्याख्या–ये केचिद् 'भावाः' पदार्थाः, श्रावकप्रतिक्रमणनिषेधजिनप्रतिमाप्रतिष्ठाधिकारिसूरिप्रतिषेधप्रभृतयः, 'ततोऽपि' आगमादपि, आस्तां सर्वज्ञादेः, तदभावे आगमादेरपि इत्यपेरर्थः। 'हुः' पूरणे, 'तद्देशकगीतसाधुवशतो वा' सम्यगागमो-

द्वादश-कुलकम् । ॥ १९ ॥

द्वितीयं कुलकम् । २

पदेशकगीतार्थसुविहितायत्तत्वेनैव वा, वाशब्दः पक्षान्तरसंसूचकः, 'सम्यग्' यथावस्थिततत्वेन 'कथमपि' केनापि बुद्धिमान्द्यादिना प्रकारेण 'न ज्ञाता' नावगता 'बहुशो' अनेकशः, प्रतिपृच्छादिना 'चिन्त्यमाना अपि' पुनः पुनरवमृश्यमाना अपि, आस्तामचिन्त्यमाना इत्यपेरर्थः ॥१३॥ यदा च सिद्धान्ततद्देशकगीतार्थसम्यगनुचिन्तनादिभिः सर्वैरपि प्रकारैः प्रवर्तितैर्न सम्यगवगता भावाः केचित् पूर्वोक्तास्ते किमित्याह–'ते' भावाः 'स्वमत्या' आगमादिनिरपेक्षबुद्ध्या 'विकल्पनं' तत्तदसदर्थयोजनं, 'तत्पराः' तन्निष्ठा' ये सांप्रतिकपुरुषास्तेषां 'वश' आयत्तता तेन तदुपदेशेनेत्यर्थः । किं निश्चयम् 'उपयान्ति' निर्णीयन्ते, किमिति काका नैवेत्यर्थः । अत्रानुरूपमुदाहरणमाह–'न हि' नैव 'सूरानुद्योतितम्' आदित्याऽप्रकाशितं, 'नभ' आकाशम् 'उद्द्योतयन्ति' प्रकाशयन्ति 'खद्योता' अल्पद्योतवन्तः कीटविशेषाः, अयमभिप्रायो–ये सूर्यतुल्यैर्विश्रुतश्रुतधरादिभिः पूर्वं न सम्यगवगमिताः पदार्थास्ते सांप्रतिकैः खद्योतकल्पैर्नावगमयितुं शक्यन्ते । इति गाथार्थः ॥ १४ ॥

एवं च स्थिते यादृशैर्भवद्भिर्यत् कुर्वाणैर्यद् विधेयं तद् गाथात्रयेणाह–

इय सच्छंदपरूवण–करस्स कुग्गहपरस्स य जणस्स ।
संसग्गिं दावग्गिं, व वज्जयंतेहिँ कुसलेहिँ ॥ १५ ॥
कालवलोचियकिरिया–रईसु असढेसु अप्पमाईसु ।
सुगुरूसु पज्जुवासण–परेहिँ तक्कहियकारीहिँ ॥ १६ ॥ ॥ १९ ॥

जिणपूजण-वंदण-ण्हवण-पमुहकिच्चेसु निच्च जइयव्वं ।
तम्हा सुगुणे गुणं, दंसणमिह पढम मुक्खंगं ॥ १७ ॥

व्याख्या-'इति' उक्तेन प्रकारेण 'स्वच्छन्दा' आगमाचरणानिरपेक्षा या काचित् 'प्ररूपणा' देशना, यदुत श्रावकाणां प्रतिक्रमणसूत्राभावात् कथं प्रतिक्रमणम्, आचार्यस्यापि सर्वथा विभूषात्यागिनः कथं स्वर्णमयकङ्कणमुद्रिकादिसमलंकृतकरकमलसाध्यप्रतिष्ठाधिकारित्वमित्यादिका, तत्करणशीलस्याचार्यादेस्तदुपदेशवशेन 'कुग्रहपरस्य' प्रतिक्रमणादिकं न विधेयमेव श्राद्धेन इत्याद्यभिनिवेशपरस्य च 'जनस्य' श्राद्धादेर्लोकस्य 'संसर्गिम् आलापपरिचयादिरूपां 'दावाग्निमिव' आरण्यकवह्निमिवेत्युपमानं 'वर्जयद्भिः' परिहरद्भिः, यथा दावाग्निर्वह्निस्तापहेतुस्तथा तत्संसर्गोऽन्तस्तापहेतुरिति भावः । 'कुशलैः' निपुणबुद्धिभिः, ते हि चिन्तयन्ति-नूनं प्रतिष्ठाप्रस्तावे कथंचित् स्वर्णादिसम्बन्धोऽपि गुणान्तरहेतुत्वेन न दोषायेति श्रुतधरैस्तथोपदिष्टमिति । यथा चैतदित्थं तथा तैरेव स्वप्रतिष्ठाकल्पे समर्थितमस्तीति ॥ १५ ॥ एवं कुसंसर्गवर्जनमभिधाय अथ सुसंसर्गविधिमाह-'कालो' दुःषमादिः, 'बलं' सेवार्त्तसंहननरूपं शारीरसामर्थ्यं, 'तदुचिता' तद्योग्या 'क्रिया' चेष्टा तपोविधानपरीषहादिसहनरूपा, न हि यादृशी दुःषमसुषमादौ वज्रर्षभसंहननादौ चासीत् तादृशीदानीं निर्वहति, तादृशक्रियायां 'रतिः' प्रीतिर्येषां ते तथा (तेषु), दीर्घत्वमिह अग्रे च प्राकृतत्वात्, अनेन क्रियावत्त्वमुक्तं, क्रियावन्तोऽपि केचित् परवञ्चनादिशाठ्यभाजो भवन्ति इत्यत आह, 'अशठेषु' सर्वथा निर्मायेषु, तादृशा अपि केचित् निद्रादिप्रमादपरा भवन्ति

द्वादश-
कुलकम् ।
॥ २० ॥

इत्यत आह–'अप्रमत्तेषु' सर्वदा सर्वप्रमादवर्जकेषु, अनेन च निद्राद्यभावेन ज्ञाननैर्मल्यमभिहितम् । ततश्चैवंविधेषु क्रिया-ज्ञानवत्सु 'सुगुरुषु' शोभनाचार्यादिषु विषये 'पर्युपासनपरैः' निरन्तराराधननिष्ठैः, अनेन तेषां गुणवत्त्वमुक्तम् । ईदृशेष्वपि गुरुषु प्राप्तेषु केचिन्न तत्कथितकारिणः स्युः, अत आह–'तत्कथितकारिभिः' गुरूपदिष्टसमस्तधर्मानुष्ठानविधायिभिरिति [illegible] ॥ १६ ॥ गुर्वादिधर्मबन्धुभिः किं विधेयम् ? इत्यत आह–'जिनानां' तद्बिम्बानां 'पूजनं' विधिनाभ्यर्चनं, 'वन्दनं' गीतार्थो-पदर्शितक्रमेण नमस्कारस्तुतिस्तोत्रदण्डपञ्चकपाठपुरःसरं यथोक्तमुद्राक्षरादियुक्तपञ्चाङ्गप्रणामकरणम्, 'स्नपनं' क्षीरोदका-दिभिर्मज्जनं, 'तत्प्रमुखानि' तदादीनि यानि 'कृत्यानि' देवद्रव्यरक्षालेखकोद्ग्राहणिकादिकार्याणि तेषु, 'नित्यं' सर्वदाऽनु-स्वारलोपः प्राकृतत्वात्, 'यतितव्यं' यत्नो विधेयः । यत एते सर्वेऽपि सम्यक्त्वविशुद्धिहेतवः, तच्च सम्यक्त्वं 'यस्मात्' कारणात् 'सूत्रे' सिद्धान्ते 'उक्तं' प्रतिपादितं, 'दर्शनं' सम्यक्त्वम् 'इह' प्रवचने त्रिष्वपि मोक्षाङ्गेषु प्रथममाद्यं, (मोक्षाङ्गं) तथा च पठ्यते 'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इति । तदेवं सम्यक्त्वविशुद्धये जिनपूजनादि विधेयम् । इति गाथात्रयार्थः ॥ १७ ॥

एवं द्रव्यस्तवोपदेशमभिधाय अथ भावस्तवोपदेशमाह—

**एयंजुत्तेहिं चिय, तत्तो वरचरणकारणेसु सया । सम्मं पयट्टियव्वं, सामाइयमाइकिरियासु ॥ १८ ॥**

व्याख्या–'एतद्युक्तैरेव' पूजनादि कृत्यं कुर्वाणैरेव स्वकाले न तु साधुभिरिवाऽकुर्वाणैः, तेषां द्रव्यस्तवस्य सार्वदिकत्वात्,

द्वितीयं
कुलकम्
२
॥ २० ॥

'चिय' शब्दोऽवधारणे, 'ततः' तदनन्तरं द्रव्यस्तवविशोधितसम्यक्त्वोत्तरकालं, सन्ध्यादिसमये 'वरचरणकारणेसु' सर्वविरतिरूपप्रधानचारित्रहेतुषु तत्पूर्वसेवारूपत्वात् सामायिकादीनां, 'सामाइयमाइकिरियासु त्ति' मकारोऽलाक्षणिकः, ततः सामायिकादिक्रियासु, तत्र सामायिकं तावद् गीतार्थोपदर्शितमुखवस्त्रिकाप्रत्युपेक्षणनमस्कार-सामायिकसूत्रोच्चारणेर्यापथिकप्रतिक्रमण-स्वाध्याय-काष्ठासनादिसंदेशनपूर्वक-मनुष्ठानं तदादयस्तासु, आदिशब्दात् पौषधादिग्रहः, अस्यापि सामायिकवद् ग्रहणं, 'सदा' सर्वकालं, 'सम्यक्' समस्तातिचारपरिहारेण 'प्रवर्त्तनीयं' प्रवृत्तिः कार्या, एता हि सम्यगभ्यस्यमाना-श्चारित्रानुरागहेतवो भवन्ति इति कर्त्तव्या इति गाथार्थः ॥ १८ ॥

किमित्येतेषु सामायिकादिषु यतितव्यमित्यत आह—

एत्तेहिंतो वि जओ, निव्वुइगमणुम्मणाण भव्वाणं ।
अक्खेवकरणदक्खं, विज्जइ अन्नं न गुणठाणं ॥ १९ ॥

व्याख्या—'एतेभ्योऽपि' भावस्तवरूपेभ्यः सामायिकादिभ्योऽपि 'यतः' कारणात्, 'निर्वृतिगमनोन्मनसां' निर्वाणयानोत्कण्ठितानां 'भव्यानां' भविष्यत्कल्याणानाम् 'अक्षेपकरणदक्षं' अविलम्बितविधानपटु सामर्थ्यात् मोक्षस्य । 'न विद्यते' न संभवति, 'अन्यत्' अपरं 'गुणस्थानं' गुणोपार्जनाश्रयः । अयमभिप्रायः-ज्ञानदर्शनयोः सतोरपि न तावत् मोक्षो यावत् सर्वसंवररूपशैलेश्यवस्थाया अप्राप्तिः, सा च सर्वविरतिरूपसामायिक एवेति अक्षेपमोक्षसाधनता सामायिकस्येति गाथार्थः ॥१९॥

द्वादश-कुलकम्। ॥ २१ ॥

न केवलं सामायिकादिकमक्षेपमोक्षसाधकमपि तु पूर्वोक्तमनुजत्वादिसामग्र्या अपि साफल्यहेतुरित्याह—

एवं चिय सहलत्तं, उवेइ माणुस्समाइसामग्गी ।
एयविरहे य (पुण) सयलं, विहलमिमं कासकुसुमं व ॥ २० ॥

व्याख्या–'एवमेव' विशुद्धद्रव्यस्तवभावस्तवप्रवृत्त्यैव, 'चिय'शब्दोऽवधारणे, 'सफलत्वं' सार्थकत्वं 'उपैति' गच्छति 'मानुष्यादिसामग्री' मानुषत्वार्यक्षेत्रादिसमग्रवस्तुलाभः, मकारोऽलाक्षणिकः, व्यतिरेकमाह–'एतद्विरहे पुन'–मानुष्यादिलाभेऽपि द्रव्यस्तवभावस्तवादिकरणाभावे पुनः 'सकलं' समस्तं, 'विफलं' निरर्थकं 'इदं' मनुजत्वादिकं, 'काशकुसुममिव' इति उपमानं, यथा 'काशे' तृणविशेषे पुष्पाणि मनोहराण्यपि फलाभाववन्ति, तथा मनुजत्वादीनि शोभनान्यपि सर्वथा धर्मानुष्ठानाभावेन विफलानीति गाथार्थः ॥ २० ॥

अथ कुलकं परिसमापयन्नुपदेशं काका प्राह—

इय पवरमईणं कित्तियं किच्चजायं, सयमवि विउसाणं साहिमो तुम्हमित्थं ।
तह कह वि हु धम्मे वट्टियव्वं जएहिं, जह भववणमूलुम्मूलणं होइ झत्ति ॥ २२ ॥

व्याख्या–'इति' उक्तेन प्रकारेण 'प्रवरमतीनां' मार्गानुसारिप्रधानबुद्धीनां, 'कियत्' इति काका 'कृत्यजातं' अनेकभेदद्रव्यस्तवभावस्तवादिकार्यवृन्दं, न केवलं प्रवरमतीनां 'स्वयमपि' आत्मनैव उपदेशं विनापि 'विदुषां' जानतां कृत्यजातं किं

द्वितीयं कुलकम्। २

॥ २१ ॥

'साधयामः' कथयामो 'वयं' युष्माकम्। 'इत्थम्' अत्र कुलके लेखदेशनामात्ररूपे, अयमभिप्रायो–ज्ञाप्यं हि कार्यजातं प्रभूतं, ज्ञापनीयाश्च प्रधानबुद्धय–स्ततस्त एव च स्वयमेव ज्ञातारोऽतो वयं कियत् साधयामः ? समस्तस्य साधयितुमशक्यत्वाद् अनर्थकत्वाच्चेति । तथापि संक्षिप्याह 'तथा' तेन प्रकारेण 'कथमपि' शुद्धमानसत्वबुद्धिकौशलादिना, ह्रस्वत्वं प्राकृतत्वात्, 'हुः' पूरणे, 'धर्मे' धर्मसाधनानुष्ठाने, 'वर्त्तनीयं' प्रवृत्तिः कार्या, 'यतै'–र्यत्नपरै–र्यत्नवतां हि अनुष्ठानं सफलं न स्यादिति भावः । 'यथा' येन प्रकारेण 'भववनमूलोन्मूलनं' संसारगहनस्कन्दोच्छेदो 'भवति' संपद्यते, 'झटिति' शीघ्रं, तदुच्छेदे च अनायासं सिद्ध एव मोक्षः । अनिष्टोच्छेदेन इष्टप्राप्तिरूपत्वात् तस्येति मालिनीवृत्तार्थः ॥ २१ ॥

इति श्रीयुगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ द्वितीयकुलकविवरणं समाप्तम् ॥

## अथ तृतीयं कुलकम् ।

द्वितीयकुलके सम्यग्ज्ञानपूर्वकं जीवितेष्टसंयोगादीना–मनित्यत्व–मुपलक्ष्य भवनैर्गुण्यं चिन्तनीयमित्युक्तम् । तृतीये तु संसारासारताभावनापूर्वकं यौवनादीनां प्रत्येकं क्षणिकत्वं सोपमान–मुपदर्शयन्, प्रथमं तावत् संसारस्वरूपं नरत्वा-दिप्राप्तिं च वृत्तद्वयेनाह–

इत्थक्खंडियदुक्खलक्खसलिले कुग्गाहमालाउले, लोहागाहतलम्मि जम्ममरणावत्ते कुतित्थुक्कडे ।
इट्ठानिट्ठविओगजोगलहरीहीरंतजंतुच्चये, कोदुड्डामरवाडवग्गिविसमे संसारनीरागरे ॥ १ ॥

द्वादश-कुलकम्। ॥ २२ ॥

तुब्भेहिं मोहवेलावलवलनवसा-वुड्डणुव्वुड्डणाइ, काऊणं चुल्लगाईदसजिणवयणोदिट्ठदिट्ठंतसिद्धं। तृतीयं कुलकम्। ३

लद्धं सद्धम्मकम्मक्खममुडुवनिभं दुल्लहं माणुसत्तं, संपत्तं खित्तजाइप्पमुहमवि तहेक्कारसंगं समग्गं२

व्याख्या-'अत्र' मानसप्रत्यक्षे संसारसागरे युष्माभि-र्नरत्वं प्राप्तमिति योगः। कीदृशमित्याह-'अखण्डितदुःखलक्षाणि' एव परिपूर्णबाधाशतसहस्राण्येव बहुत्वात् 'सलिलं' जलं यत्र तत्र, द्विर्भावः प्राकृतत्वात्, तथा 'कुग्राहाः' कदभिनिवेशास्ते एव नानाबाधाविधायित्वात् कुग्राहाः कुत्सितजलचरविशेषा-स्तेषां 'माला' श्रेणि-स्तया 'आकुले' व्याप्ते। अत्र च-"विद्वन्मानसहंसवैरिकमलासंकोचदीप्तद्युते!, दुर्गामार्गणनीललोहितसमित्स्वीकारवैश्वानर!। सत्यप्रीतिविधानदक्षविजयप्राग्भावभीमप्रभो!, साम्राज्यं वरवीर! वत्सरशतं वैरंचमुच्चैः क्रियाः॥१॥" इत्यादिवत् परंपरितं नाम रूपकविशेषोऽलङ्कारः। तथा प्रमाणविरुद्धपरद्रव्यादानेच्छा-लोभः, स एव अप्राप्यमानपर्य्यन्तत्वात् 'अगाधतलं' अत्यन्तनिम्नाधोभागो यत्र तत्र। तथा प्रसिद्धानि जन्ममरणान्येव पुनः पुन-रावर्त्तनात् 'आवर्त्ता' जलभ्रमा यत्र तत्र, तथा 'कुतीर्थानि' भौतशाक्यादिकुत्सितदर्शनानि तान्येव महाकष्टसंचारहेतुत्वात् 'कुतीर्थानि' कुत्सितजलावतरणमार्गास्तैः, 'उत्कटे' उद्भटे, अत्रापि परंपरितरूपकम्। 'इष्टानिष्टवियोगयोगा एव' यथासंख्यमभिप्रेतासम्बन्धानभिप्रेतसम्बन्धा एव पुनः पुनरुत्पद्यमानविपद्यमानत्वाद् 'लहर्यः' कल्लोला-स्ताभिः 'ह्रियमाण' इतस्ततो विक्षिप्यमाणो 'जंतुचयः' प्राणिगणो यत्र तत्र विक्षेपश्च एकत्र ॥ २२ ॥
मनसोऽन्यत्र शरीरस्य, जन्तुचयोऽपि एकत्र पुरुषादिरन्यत्र मत्स्यमकरादिरिति, तथा 'क्रोध' एवातिदाहकत्वात् 'उद्दामरो-

ऽप्युद्भटो' 'रौद्रो' वडवाग्निः सामुद्रज्वलन–स्तेन 'विषमो' दुरवगाहस्तत्र, संसारः प्रसिद्ध–स्तेन न व्याख्यात, एवमन्यत्रापि क्वचित् किंचित् पदं न व्याख्यास्यते, स एव अनर्वाक्पारत्वात् 'नीराकरो' जलनिधि–स्तत्र, विशेष्यपदमेतदिति शार्दूलविक्रीडितवृत्तम् ॥ १ ॥ 'तुब्भेहिं–ति' युष्माभि–'र्मोह'श्चतुर्थं कर्म, 'वेला' जलवृद्धयस्तासां बहुलत्वाद्'बलं' सैन्यं, ततश्च मोह एव दुर्निवारप्रसरत्वाद् वेलाबल–स्त(लं त)स्य 'वलनं' व्यावर्तनं तस्य 'वश' आयत्तता ततो 'ब्रुडनोद्ब्रुडनानि' मज्जनोन्मज्जनानि कृत्वा, तत्र मज्जनानि नरकादौ पाता उन्मज्जनानि तु स्वर्गादौ उत्पत्तय–स्तानि कृत्वा, 'चोल्लकादयो' ये 'दश' दशसंख्या 'जिनवचनोद्दिष्टाः' सिद्धान्तप्रतिपादिता 'दृष्टान्ता' उदाहरणानि तैः 'सिद्धं' दुर्लभत्वेन प्रतीतं, तत्र स्वामिना भृत्यादेः प्रसादीक्रियमाणो भोजनविशेषश्चोल्लक–स्तदादिभि–स्तत्प्रभृतिभि–रादिग्रहणात् पाशकादिपरिग्रहः, तथाचोच्यते–"चुल्लग–पासग–धन्ने, जूए–रयणे–य सुमिणचक्के य। चम्मजुगे परमाणू, दस दिट्ठंता मणुयलंभे" ॥१॥ तथा 'सद्धर्मकर्माणि' पूजासामायिकादीनि तेषु 'क्षमं' समर्थं नरत्वं तावत् प्राप्तम्, 'उडुपो' लघुर्जलतारणतरण्डविशेषस्तेन 'निभं' सदृशमिति उपमानं, 'दुर्लभं' दुःप्रापं, लब्धं, तथा 'क्षेत्रजातिप्रमुखमपि' न केवलं नरत्वमित्यपेरर्थः, तथेति भिन्नक्रमो योजितश्च, एवं च सति एकादशाङ्गं,–"माणुस्सखित्त–जाई,–कुलरूवारोग्गमाउयं बुद्धी । सवणुग्गहसद्धासं–जमो य लोगम्मि दुलहाइं ॥१॥" इत्येवंरूप–मर्थाद् धर्मसाधनस्य 'समग्रं' संपूर्णं संप्राप्तमिति स्रग्धरावृत्तमिति वृत्तद्वयार्थः॥२॥ चोल्लकादिदृष्टान्ताश्चैवं–चक्रिणो द्वादशस्येह, काम्पिल्यपुरवासिनः । मित्रं कार्पटिकः कश्चि–दासीत् राजपदात् पुरः ॥ १ ॥ अभूदनेकावस्थासु, साहाय्योऽसौ विपत्सु च । निशम्य चक्रिणं प्राप्तराज्यं तत्पुरमागमत् ॥ २ ॥ द्वादशवार्षिकस्तत्र, प्रारब्धोऽस्ति तदा महान् । राज्याभिषेकः कार्पटिको, नाव-

द्वादश- कार्य-मपाप सः ॥ ३ ॥ निर्विण्णोऽसौ ततो दृष्ट्वाऽनुपायं नृपदर्शने । उपानहां ध्वजं चक्रे, द्राघीयांसं ततो ययौ ॥ ४ ॥ तृतीयं
कुलकम् । अन्तर्महाध्वजवतां, पुरतश्चक्रवर्तिनः । आहूय कौतुकाद् राजा, प्रत्यभिज्ञाय चादरात् ॥ ५ ॥ पप्रच्छ कुशलं मित्र!, कदा- कुलकम् ।
॥ २३ ॥ ऽऽगास्त्वं कथं च भोः! । सोऽप्याख्यद्भवदेव! द्वादशभि-र्वत्सरैरिदम् ॥ ६ ॥ महाध्वजादिकं चक्रे, तव दर्शनलिप्सुना । ३
अभवं कृतकृत्योऽहं, तावके दर्शने सति ॥ ७ ॥ सप्रश्रयं ततो राजाऽवोचत् तं परमादरात् । दीयते किमिदानीं ते
हस्त्यश्वस्यन्दनादिषु ॥ ८ ॥ पुरं मन्त्रिपदं चेति, वाञ्छितं शीघ्रमुच्यताम् । ततोऽवादाद् कार्पण्या-दतिनिर्भाग्यशेखरः
॥ ९ ॥ स्वगृहे भोजनं यावद्, दीनारं दक्षिणामपि । गृहे गृहे ततः पश्चाद्, यावद् राज्यं त्वदीयकम् ॥ १० ॥ प्रत्येकं तत्र
नगरे, ग्रामे सर्वकुटुम्बिनाम् । गृहे भुक्त्वा पुन-र्भोक्ष्ये त्वद्गृहेऽहं निराकुलः ॥ ११ ॥ एवमस्तु महाराज! कृतं मे श्रेयस-
स्तुभिः । विषादा-दवदत् भूप-स्त्वं ममा-त्युपकारकः ॥ १२ ॥ इति सर्वाधिकारित्वे, चिन्तितस्त्वं तु नेष्टवान् । चोल्लक
एव ते वाञ्छाऽथवा भाति कदाचन ॥ १३ ॥ न कूष्माण्ड्याः फलं धत्ते अजायाः मुखसारिते । कदा बद्धकिरीटानां
स्वर्परिच्छदसंयुजाम् ॥ १४ ॥ तथात्र कुलकोटीनां, नगरे केवलेऽपि हि । सहस्रसंख्यशेषेषु पत्तनादिषु सर्वतः ॥ १५ ॥
ग्रामेषु कोटिसंख्येषु, पर्यन्तं मुग्ध! यास्यसि । येन भूयोऽपि मद्गेहे, भोक्ष्यसे स्वेच्छया भवान् ॥ १६ ॥ इत्युक्त्वा
भोजितो राज्ञा, वस्त्रे च परिधापितः । एवं (कं) दीनार-मर्पित्वा प्रैषि रुष्टेन (तुष्टेन) भूभुजा ॥ १७ ॥ एवं सर्वत्र लेभेऽसौ
द्विजन्मा क्षेममन्दिरम् । अपि सोऽपि कदाचित्, स्याद् भूयो भूपाशनाशकः ॥ १८ ॥ अकृतसुकृतः प्राणी भूयोऽपि न ॥ २३ ॥
नरत्वभाक् । यतः किं प्राप्यते क्वापि भ्रष्टरत्नं महोदधौ ॥ १९ ॥

अथ पाशकाः ॥ नन्दं नरेन्द्र-मुत्पाट्य, पाटलीपुत्रपत्तने । चाणक्येन कृते चन्द्रगुप्ते भूभुजि सद्गुणे ॥ १ ॥ धनं विना न राज्यस्य, वृद्धि-रित्यवसाय सः । चाणक्यो विदधे योगपाशकान् कनकेच्छया ॥ २ ॥ देवताधिष्ठितान् केचित्, तानाहुः सूरयः परे । द्यूते पुनः पतंत्येते चाणक्यमनसः प्रियाः ॥ ३ ॥ चतुरः शिक्षित-स्तेन, द्यूतकारोऽथ तै-र्नरः । क्रीडितुं सोऽपि दीनारस्थालं भृत्वाऽव्रदद् भृशम् ॥ ४ ॥ यो मां जयति स स्थालं, दीनारपरिपूरितम् । गृह्णातु मम दद्यात् तु, जये दीनारमेककम् ॥ ५ ॥ इति श्रुतेऽथ भूयांसो, लोभात् क्रीडितु-मुद्यताः । केवलं पाशका-स्ते हि, न परावृत्तिवृत्तयः ॥ ६ ॥ अपि प्रतीच्यामुदिया-दादित्यो द्योतभारभाक् । न तु लब्धवराः पाशाः, पेतुः क्वाऽप्यन्यथा भुवि ॥ ७ ॥ कदाचिद् दैवत-स्तेऽपि स्युः प्रतीपप्रपातुकाः । नरत्वा-न्न नरो भ्रष्टो, नरत्वं पुनराप्नुयात् ॥ ८ ॥

अथ धान्यानि ॥ भरतक्षेत्रधान्यानि, सर्वाणि क्वापि यत्नतः । मिश्रितानि ततस्तत्र, क्षिप्तः प्रस्थोऽथ सार्षपः ॥ १ ॥ ततोऽतिवृद्धा काचित् स्त्री, दुर्बला शूर्पकोणके । गृहीत्वा तानि धान्यानि, सर्षपप्रस्थमादरात् ॥ २ ॥ कदाचित् पिण्डयेद् दैवयोगाद् देवानुभावतः । तथापि न नरो भ्रष्टां नरतां लभते पुनः ॥ ३ ॥

अथ द्यूतम् ॥ कस्यापि भूमिपालस्याऽऽसीत् सभास्थानहेतवे । अष्टोत्तरशत-स्तम्भसंनिविष्टा मनोहरा ॥ १ ॥ अथ तस्य सुतः कश्चिद्, राज्यकांक्षी व्यचिन्तयत् । हत्वातिवृद्धं पितर-माददे राज्यमात्मना ॥ २ ॥ कुतोऽपि मन्त्रिणा ज्ञात्वा वृत्तान्तोऽयं निवेदितः । राज्ञे स्यु-र्मन्त्रिणश्चारचक्षुःशतनिरीक्षकाः ॥ ३ ॥ राज्ञाऽप्याहूय स सुत, एवमूचे सुबुद्धिना । योऽस्माकं संततौ कोऽपि कदाचित् स्या-न्नृपात्मजः ॥ ४ ॥ राज्यार्थी तेन तद्राज्ञा द्यूतं कृत्वा ततः सभाम् ।

मार्गदर्शक
[illegible] जित्य राज्य-मुपादेयं स्थितिरेषा कुले मम ॥ ५ ॥ सुतोऽपृच्छत् कथं सापि, जेतव्येति निवेद्यताम् । ततोऽभाषिष्ट तृतीयं
कुलकम् । भूपालः श्रूयतां तज्जये विधिः ॥ ६ ॥ संसद्यष्टशतं स्तम्भाः स्तम्भे, स्तम्भेऽपि चास्रयः । प्रत्येकं शत-मष्टाग्रं विद्यन्ते कुलकम् ।
॥ २४ ॥ वत नन्दन ? ॥ ७ ॥ एकैकस्मिन्नपि स्तम्भे वारा अष्टाधिकं शतम् । एकैकापि च तत्रास्रिर्जेतव्या खेदभेदिभिः ॥ ८ ॥ एक ३
एव च ते दायो, शेषास्तु मम पुत्रक ! । यद्येवं जयसि स्तम्भान् साम्रीन् सर्वान् सभागतान् ॥ ९ ॥ तदा ते राज्यमेतत्
तु, कदाचिद् दैवतो भवेत् । भ्रष्टं सद्देहिनां भूयो मनुजत्वं सुदुर्लभम् ॥ १० ॥

अथ रत्नानि ॥ क्वचित् कस्यापि वणिजो, धनाढ्यस्य हि मन्दिरे । महामाहात्म्यसाधूनि, रत्ना-न्यासन्ननेकशः ॥ १ ॥
तन्माहात्म्यं परं ज्ञाता ह्यसौ वृद्धः कथंचन । अत्यर्थ-मर्थितोऽप्येतान्यतो रत्नानि नो ददौ ॥ २ ॥ पुरे तत्र च कुत्रापि
महे स्वगृहमूर्धसु । ऊर्ध्वीक्रियन्ते सत्कोटिपताका ईश्वरैः समैः ॥ ३ ॥ अथ प्रवयसि क्वापि, दूरे देशान्तरं गते । रत्नानि
तानि दत्तानि पताकाकीर्त्तिलोलुपैः ॥ ४ ॥ पुत्रै-र्देशान्तरायातप्राज्यनैगमसन्ततेः । कूलान्तरेऽपि प्राप्तानि, न्यायाद् भूत-
वले-स्ततः ॥ ५ ॥ सम्वत्सरेषु वहुषु, स्थविरो गृहमागतः । रत्नविक्रयवृत्तान्तं, श्रुतवानथ लोकतः ॥ ६ ॥ खराज्ञ-स्तीव्रसंर-
म्भोऽभाषिष्टाऽथ सुतान् निजान् । पापाः ! किमीदृशं चक्रे वैशसं स्वात्मघातकम् ॥ ७॥ किमहं नैव जानामि, विक्रेतुं कुल-
पांसनाः ! । रत्नानि किं तु केनापि हेतुना गृहतो वहिः ॥ ८ ॥ न कृतानि ततः पापा ! आनयध्वं विलम्बितम् । वर्जयन्तो- ॥ २४ ॥
ऽन्यथा नास्ति, मद्गृहे भवतां स्थितिः ॥ ९ ॥ इत्युक्ते ह्याकुला-स्तेऽपि, तानि प्रान्वेष्टु-मुद्यताः । तथापि तानि सर्वाणि कथं

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

पिण्डयितुं क्षमाः ॥ १० ॥ द्वीपान्तरेषु प्राप्तानि, कालोऽप्यतिबहु–र्गतः । कदाचित् तु प्रसादेन, संगम्यन्ते दिवौकसाम् ॥ ११ ॥ मनुजत्वा–च्च्युतोऽपुण्यो मनुजत्वं न चाप्नुयात् । न हि चिन्तामणि–र्भ्रष्टः, सागरे क्वापि लभ्यते ॥ १२ ॥

अथ स्वप्नः ॥ कार्पटिकेन केनापि, स्वप्ने शीतांशुमण्डलम् । ग्रस्तं तेन तदन्येषां, कथितं सहचारिणाम् ॥ १ ॥ तैरूचे चन्द्रसंकाशं, मण्डकं लप्स्यसे वरम् । स तेन लब्धः क्वापि, गृहस्थाऽदनिकोत्सवे ॥ २ ॥ घृतखण्डसमाश्लिष्ट–स्तत्रान्येनापि तादृशः । स्वप्नः श्रीमूलदेवेन, प्रैक्षि प्रेक्षावता पुनः ॥३॥ तेनाचिन्ति महास्वप्नो, नैष मण्डकमात्रदः । व्याख्याविशेषतस्त्वेवं, संपन्नं नूनमीदृशम् ॥ ४ ॥ तदहं कथयिष्यामि, स्वप्नपाठकसन्निधौ । स्वप्नं स्वं फलताम्बूल–पूजानिर्माणपूर्वकम् ॥ ५ ॥ ततः स्नात्वा तथैवासौ, कृत्वा सर्वमभाषत । तत्पुरस्तेऽपि तस्याहुः, साम्राज्यं सप्तमे दिने ॥ ६ ॥ तत्रापुत्रो धरित्रीशो, विपन्नः सप्तमे दिने । हस्त्यश्वचामरच्छत्र–कलशानध्यवासयन् ॥ ७ ॥ इति पञ्चापि दिव्यानि, मन्त्रिप्रभृतयो जनाः । दिव्यैरागत्य मुदितै–र्मूलदेवः कृतो नृपः ॥ ८ ॥ तं तथा मूलदेवस्य, श्रुत्वा वृत्तान्तमादितः । पूर्वोदितः कार्पटिको–ऽचिन्तयच्चारुचेतनः ॥ ९ ॥ अपश्यं यद्यहं भूयः, सुस्वप्नं तं महाफलम् । तदा व्याख्याप्य तैरेव, ले(ल)भे साम्राज्यमुत्तमम् ॥ १० ॥ बभ्राम गोकुलान्येष, गोरसप्राप्तिलालसः । तत्पाने मे कदाचित् स्यात्, सुन्दरस्वप्नदर्शनम् ॥ ११ ॥ न चासौ कथमप्याप, स्वप्नं तं दैवतः पुनः । लभेत सोऽपि तन्नैवं, नरत्वं नरताच्युतः ॥ १२ ॥

अथ चक्रं ॥ महेन्द्रपुरसंकाश–मस्तीन्द्रपुरमद्भुतम् । राजा तत्रेन्द्रदत्तोऽभूत्, तस्य द्वाविंशतिः सुताः ॥ १ ॥ इष्टानामतिकान्तानां, देवीनामभवन् वराः । अन्ये त्वाहुरिहैकस्या, महिष्याः सर्व एव ते ॥ २ ॥ एका पुनरमात्यस्य, सुता

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

द्वादश- देवी महीशितुः । उद्वाहे सा परं दृष्टा तत्पृष्ठे नैव भूभुजा ॥ ३ ॥ ऋतुस्नाता गवाक्षस्था, कदाचिदथ सा प्रिया । ददृशे तेन तृतीयं
कुलकम् । पार्श्वस्थः, पप्रच्छेऽत्यन्तसुन्दरी ॥ ४ ॥ कस्येयं वल्लभा देव ? तवैवेति स उक्तवान् । नक्तं नराधिपेनाथ, तया संवासमिच्छता कुलकम् ।
॥ ५ ॥ आहूता तत्र गर्भोऽस्याः, संलग्नः स्नानभावतः । राजाह्वानं तयामात्यस्योक्तमासीद् दिवैव हि ॥ ६ ॥ तेनापि शिक्षिता ३
॥ २५ ॥ पुत्रि ! यत् किंचिद् भूपति-र्वदेत् । तत् त्वया मम निःशेषमावेद्यं स्मृतिपूर्वकं ॥ ७ ॥ तयापि तत् तथा चक्रे, पत्रेऽलेखि तु
मन्त्रिणा । कालेनाथ सुतो जज्ञे, सुलग्ने दोषवर्जिते ॥ ८ ॥ सुरेन्द्रदत्त इति तन्नाम चक्रे दिने शुभे। तत्रैव च दिने तस्य, गृहे
दासीसमुद्‌भवम् ॥ ९ ॥ चतुष्कं डिम्भरूपाणां, जज्ञे सद्‌बुद्धिशालिनः । अग्निकः पर्वतकश्च, बहुला सागरस्तथा ॥ १० ॥
इति विख्यातनामानि, क्रीडन्त्येते हि पञ्च तु । बृहस्पतिमतिस्पर्द्धिबुद्धिना तेन मन्त्रिणा ॥ ११ ॥ कलानां ग्रहणायैव, सम-
स्तानां स धीधनः । कलाचार्याय वर्यायोपनिन्ये दुहितुः सुतः ॥ १२ ॥ प्रागेव क्ष्माधिनाथेन, स्वाङ्गजा हि कलानिधेः ।
पाठनायार्पिता आसंस्ते तु दुर्ललितत्वतः ॥ १३ ॥ नाभ्यस्यन्ति कलाः सम्यक्, तत-स्ताडनतत्परे । कलाचार्ये प्रयच्छन्ति
प्रहारान् सह गालिभिः ॥ १४ ॥ जननीनामपि प्रोचु-स्ताडनादि सुदुःखिताः । क्रुद्धा-स्ता अप्युपाध्यायमाचुक्रुशुरलं
मुहुः ॥ १५ ॥ उपेक्षिता-स्तत-स्तेन, न पेठुः स्वल्पमप्यहो । प्रतिकूले ह्युपाध्याये, क्व विद्याः सन्तु शिक्षि(शैक्ष)के॥ १६ ॥
अमात्येन कलाचार्यः, पूजयित्वैव-मुक्तवान् (मौच्यत) । ताडनीय-स्तथा बाढं, यथा गृह्णाति सत्कलाः ॥ १७॥ ततश्च पठत- ॥ २५ ॥
स्तानि, डिम्भरूपाणि तस्य तु । आत्यन्तिकात् परिचयात् , स्खलयन्ति मुहुर्मुहुः ॥ १८॥ अवज्ञाय च तान्येष, प्रादा-न्निःशेष-
सत्कलाः । राधावेधमुखाः सम्यक्, कालेनाल्पेन बुद्धिमान् ॥ १९ ॥ प्रशस्तेऽथ दिने सर्वेऽप्याजग्मुः स्वस्वधामसु । ततश्च

मथुरापुर्य्यां, पर्वतकः क्षमाधिपः ॥ २० ॥ निवृति–स्तस्य तनया, कलारूपादिशालिनी । संभूष्य तज्जनन्याऽसावानिन्ये भूपसन्निधौ ॥२१॥ तेनोचे सापि तुष्टेन, वत्से स्वस्य(स्या)वरम् वरम् । वृणु त्वं स्वमनोऽभीष्टं, त्वदिष्टे नास्ति बाधकः ॥२२॥ सः कलावान् महावीरो, रूपवान् मेऽस्त्वसौ वरः । प्रैषयत् तां ततो भूपोऽपीन्द्रदत्तपुरे लघु ॥ २३ ॥ सहितां भूरिसैन्येन, तनयां नयशालिनीम् । क्रमेण तत्पुरं प्राप, सा प्रहृष्टा कृशोदरी ॥ २४ ॥ अहो धन्योऽहमेवात्र, यस्यैवं दूरदेशतः । स्वयंवराः समायान्तीत्यतितुष्टेन भूभुजा ॥ २५ ॥ पुरप्रवेशेन तस्या, महोत्साहान्महोत्सवः । चक्रे ततः समाजग्मुः कन्यामात्या नृपान्तिके ॥ २६ ॥ प्रोचु–स्ते तव पुत्राणां, कलारूपादिभि–र्गुणैः । महती ख्यातिरित्येषां, कौतुकादियमागता ॥ २७ ॥ तदस्याः कौतुकं देव? राधावेधेन पूर्यताम् । वरैः स्वसूनुभिः शीघ्रं, विवाहः कार्यतां ततः ॥ २८ ॥ ततो हर्षभृता राज्ञा, कुंकुमद्रवसेचनैः । ध्वजै–र्वन्दनमालाभिः, पुष्पप्रकरतूर्यकैः ॥ २९ ॥ स्वःसंकाशं पुरं चक्रे, ततः पुत्रैः समं स्वयम् । निर्ययौ कृतशृंगारः, सपौरः सेनयावृतः ॥ ३० ॥ रङ्गं चक्रे महामन्त्री–स्तन्मध्येऽत्यन्तमायतः । ऊर्ध्वीकृतो महास्तम्भ–स्तदग्रे चक्रकाष्टकम् ॥ ३१ ॥ वामप्रदक्षिणावर्त्तं, भ्राम्यच्छिल्पप्रयोगतः । तस्या–स्युपर्यधो वक्रा स्थापिता काष्ठपुत्रिका ॥ ३२ ॥ अधस्तैलभृतं कुण्डं, तत्राधोवर्त्तिदृष्टिना । ऊर्ध्वं संहितबाणेन सा वेध्या वामचक्षुषि ॥ ३३ ॥ कन्याप्यलङ्कृता देवीवागमत् सपरिच्छदा । चेटीशतवृता श्वेतसुमनोमालधारिणी ॥ ३४ ॥ किं बहुना । अनुचक्रे तदा रङ्गः, स द्रौपद्याः स्वयंवरम् । स्वस्वस्थानोपविष्टेषु, भूपादिषु जनेष्वथ ॥ ३५ ॥ श्रीमालीति समाहूतः, पुत्र आद्यो महीभुजा । राधावेधं विधाय त्वं, कन्यां राज्यं समुद्वह ॥ ३६ ॥ इत्युक्तश्च समुत्तस्थौ, केवलं धनुरप्यसौ ।

द्वादश-
कुलकम् ।

॥ २६ ॥

न शशाक तदाऽऽदातुमाकुलो जनसंगमे ॥ ३७ ॥ किं पुन–र्बाण संधानं, तथापि गुरुसाहसात् । संधायेषुः परिक्षिप्तो यत्र तत्र प्रयात्वसौ ॥ ३८ ॥ इति बुद्ध्वा स चक्रान्तं, गत्वा स्फोटमवाप्तवान् । समं भूपावरोधादिचित्तै–रत्यन्तदुःखितैः ॥ ३९ ॥ राजा श्यामाननः सूनुमादिदेश तथापरम् । अनुजह्रेऽग्रजं सोऽपि, मूर्खाणां काऽपरा गतिः ॥ ४० ॥ एवं सर्वैरपि प्राज्यदत्तहासैः सभाजने । तथा सलज्जोऽभूद्भूपो यथा स्थगितवान् मुखम् ॥ ४१ ॥ अथामात्येन विज्ञप्तो देव ! किं खिद्यते मुधा । स प्राह पश्य पापिष्ठैः, सर्वैरेवं विगोपितः ॥ ४२ ॥ तत्रोचे मन्त्रिणा देव ? तवान्योऽप्यस्ति नन्दनः । कथमित्युदिते राज्ञा, मन्त्री पत्रमदर्शयत् ॥ ४३ ॥ सोऽपि स्यादीदृशो नूनं, तथाप्यानय कर्हिचित् । कुर्यादपि मुखं साधु प्रोज्वलं स हि पुण्यतः ॥ ४४ ॥ ततः कलाचार्ययुतो रौद्रखड्गिद्वयान्वितः । डिम्भैश्चतुर्भि–रुत्तालै–स्तर्ज्यमानः पदे पदे ॥ ४५ ॥ न चेद् भेत्स्यसि राधां, त्वं तदैतौ तव खड्गिनौ । छेत्स्यतो मस्तकं ह्येवं कलाचार्येऽपि जल्पति ॥ ४६ ॥ सुरेन्द्र-दत्त आयासीत्, सुवेषः स्थिरमानसः । नत्वा नृपं तदादिष्टश्चक्रे हस्ते शरासनम् ॥ ४७ ॥ आलीढासनमाधाय, तत्रेषुं समयोजयत् । ऊर्ध्वमुष्टि–रधोदृष्टिः क्षणं प्रैक्षिष्ट सोऽन्तरम् ॥ ४८ ॥ लब्धावकाशं झगिति, प्रचिक्षेप स सायकम् । तेन विव्याध चैतस्याः, पुत्र्या वामं विलोचनम् ॥ ४९ ॥ सर्वे संतुतुषुस्तत्र, जज्ञुरुत्फुल्ललोचनाः । उत्कृष्टि(ष्ट)सिंहनादादि कोलाहलपुरस्सरम् ॥ ५० ॥ जनेभ्यस्तोषपोषिभ्यः, प्राप्तसर्वस्ववत् तदा । आशीर्वादान् बहून् लेभे, किं न लभ्यं वरै–र्गुणैः ॥ ५१ ॥ अथातितोषतः कन्या, वरमालां न्यवेशयत् । तत्कण्ठकन्दले सार्धं, स्वकीयैः सन्मनोरथैः ॥ ५२ ॥ पर्य्यणायि च सा तेन, लेभे राज्यं च भूपतेः । अथ च चक्रवेधोऽस्य संपेदेऽत्यन्तकृच्छ्रतः ॥ ५३ ॥ तथाहि । द्वाविंशतिः कुमाराणां, डि-

म्भोपाध्यायखङ्गिनः । सर्वे बाधाकरा आसंस्तदा तच्छिद्रवीक्षकाः ॥ ५४ ॥ तथा लब्धे मनुष्यत्वे, प्रमादबहुलः पुमान् । पुनर्न लभते नृत्वं, कालेन बहुनापि हि ॥ ५५ ॥

अथ चर्म । अतिबहलत्वनिविडत्वाभ्यां चर्मेव चर्म शेवालसंचयः, तस्योदाहरणम् । यथा–लक्षयोजनविष्कम्भो, ह्रदः क्वापि समन्ततः । शैवलेनावबद्धोऽस्ति, तदन्तः कच्छपाद्यः ॥ १ ॥ सन्ति सत्त्वा हि भूयांसस्तेष्वेकेन कथंचन । कालेन बहुना छिद्रं, कच्छपेन निपातितम् ॥ २ ॥ तत्र ग्रीवां प्रसार्यैष, यावदूर्ध्वं विलोकते । कौमुदीसन्महे तावद्, वीक्षते चन्द्रमण्डलम् ॥ ३ ॥ ग्रहनक्षत्रताराभि–रति(भि)रामं तथाद्भुतम् । दृष्ट्वा वि(व्य)चिन्तयत् सोऽथ, किमिदं महदद्भुतम् ॥ ४ ॥ आजन्मादृष्टपूर्वं च, तदिदं दर्शयाम्यहम् । स्निग्धानां स्वस्य बंधूनां, किं दृष्टस्यापरं फलम् ॥ ५ ॥ आचकर्ष च स ग्रीवां, स्वजनानयनोत्सुकः । तावच्छैवलजालेन, छिद्रमापूरितं लघु ॥ ६ ॥ बन्धूनाहूय निःशेषान्, यावदायाति तत्र सः । तावन्न लभते छिद्रं, यत्नेनान्वेषयन् मुहुः ॥ ७ ॥ महाप्रमाणके तत्र, यथा छिद्रं सुदुर्लभम् ॥ कच्छपस्य तथा विद्धि, मानुषत्वं पुनर्भवे ॥ ८ ॥

अथ युगम् ॥ कौतुकी त्रिदशः कश्चिद्, युग–मन्त्यमहोदधेः । पूर्वान्ते न्यक्षिपच्छिद्रात् समिलामपरान्ति(न्त)के ॥ १ ॥ ततः सा वेगतः क्वापि, धावति स्रोत्तरामुखी । अपाच्यामपि च क्वापि, क्वापि मत्स्येन गिल्यते ॥ २ ॥ तत्र चास्ते बहुं कालं, निर्गताऽथ ततोऽपि सा । खण्ड्यते तीक्ष्णदंष्ट्राग्रै–र्मत्स्यप्रभृतिजन्तुभिः ॥ ३ ॥ युगमप्येवमेवेह, किंतु क्वापि द्वयं सह । स्थित्वा क्षणाद् विघटते, सौहार्दमसतोरिव ॥४॥ एवं मुहुर्विघटनं, पुनः संघटनं क्वचित् । कलाभिरिव शीतांशुरनन्तं

द्वादश-कुलकम् । ॥ २७ ॥

कालमासदत् ॥ ५ ॥ केवलं तस्य विवरे, प्राविशन्न कथंचन । राधाक्षिवेधवद् दैवाद् विशेत् कल्पान्तरे तु सा ॥ ६ ॥ न च्युतं मानुषं जन्म, जायते पुनरीदृशम् । न हीन्दोरमृतासाराः, पुनस्तत्र विशन्ति ते ॥ ७ ॥

अथ परमाणवः ॥ महीयांसं शिलास्तम्भं, संचूर्ण्यातीव सूक्ष्मताम् । नीत्वाणुरूपतां देवो, नालिकां क्वाप्यपूरयत् ॥ १ ॥ अणुभिस्तैरसंख्यातै-र्लोकाकाशप्रदेशवत् । पूर्णां स तामथादाय, स्वःशैलशिखरं ययौ ॥ २ ॥ फूत्कृत्य महतः प्राणात् समन्तधूलकनवद् दिशः । सर्वा अपि महावेगात् प्रात-रंशूनिवार्यमा ॥ ३ ॥ किं ते भूयोऽपि नीयन्तेऽणवस्तां स्तम्भ-रूपताम् । अपि स्यात् कथमप्येतन्न नरस्तु पुनर्नरः ॥ ४ ॥ एकैकश्चौल्लकादे-र्मनुजभवदुरापत्वविज्ञप्तिहेतु-र्भूयांसस्त्वेत इत्थं ध्रुवमतिसुलभान्यत्व-मावेदितुं नुः । नृत्वस्यासादितस्यातिबहलसुकृतैः प्रच्युतस्यैवमेव प्राज्ञा विज्ञाय चैतत् कथमपि सुकृते न प्रमादो विधेयः ॥ १ ॥

तदेवं मनुजत्वक्षेत्राद्येकादशाङ्गं युष्माभिर्दुर्लभमपि प्राप्तमित्युक्तम्, संप्रति किं कर्त्तव्यमित्यत आह—

तृतीयं कुलकम् । ३

ता सिद्धंतपसिद्धिओ समइओ पच्चक्खलक्खेण वा,
भो ! लक्खेह वियक्खणा पइखणं दुक्खाण खाणिं भवं ।
जम्हा संतमसंतमित्थ सयलं माइंदजालोवमं,
सत्तू मित्तमहो सुही वि असुही सव्वं खणेणाउलं ॥ ३ ॥ ॥ २७ ॥

व्याख्या–यत एतदेवं 'ततः' तस्मात् कारणात् 'भो' विचक्षणा ? दुःखखानिं भवं लक्षयत, इति योगः, कुतस्कुत इति हेतुत्रयमाह–'सिद्धान्ते' आगमे भवस्य दुःखखानिहेतुत्वेन 'प्रसिद्धिः' प्रख्यातिः, तत्र तत्र तस्य तथाभिधानात्, भवतां वा सिद्धान्तस्य प्रसिद्धिः प्रतीतिस्ततः, तथा स्वस्यात्मनो मतिर्यथावस्थितवस्तुपरिच्छेदिनी बुद्धिः ततोऽपि, तथा प्रत्यक्षेण साक्षात्कारिज्ञानेन लक्षणं लक्षः प्रतीति–स्तेनापि कारणभूतेन इति हेतुत्रयं, वाशब्दो विकल्पार्थः, 'भो' इत्यामन्त्रणे, 'लक्षयत' प्रतिपद्यध्वं, 'विचक्षणा' विद्वांस इति श्राद्धानां संबोधनं, 'प्रतिक्षणं' निरन्तरं 'दुःखानां' मानसादिबाधानां, खानिम्–आकरं, 'भवं' चातुर्गतिकं संसारं, सर्वत्राप्यसुखभावात्, कुतः पुन–रेतदेव–मित्याह। यस्मादत्र भवे 'सकलं' समस्तं वस्तु सद् विद्यमानमायु–र्यौवनलक्ष्म्यादिक–मसत् क्षणिकत्वेन नश्वरम्। अत एव माया अन्याकर्तृकहरिश्चन्द्रपुर्यादे–रसद्वस्तुन उल्लेखः, 'इन्द्रजालम्' ऐन्द्रजालिकेन मन्त्रमूलादिप्रयोगेण भुजगपारापतकचोलकादिजीवाजीवदर्शनं ताभ्या–मुपमा क्षणिकत्वेन सादृश्यं यस्य वस्तुन–स्तत् तथा, न केवलं क्षणिकमेवेदम्, अपि तु विपरीतपरिणतिस्वभावमपि किंचित्, शत्रुर्वैरी–सोऽपि कथंचिदानुकूल्यं भजन् मित्रं सुहृज्जायते, 'अहो' इत्याश्चर्ये, 'सुख्यपि' आनन्दवानपि ईश्वरादि–रसुखी व्याधिदौर्गत्यादिदुःखवान्, तथा चोच्यते–"सुखी दुःखी रङ्को नृपतिरथ निःस्वो धनपतिः, प्रभु–र्दासः शत्रुः प्रियसुहृदबुद्धि–र्विशदधीः। स्वमत्यभ्यावृत्त्या चतसृषु गतिष्वेवमसुमान् हहा संसारेऽस्मिन् नट इव महामोहनिहतः ॥ १ ॥" एवं प्रायः सर्वं वस्तु क्षणेनापि अन्यथा परिणामादाकुलं स्वस्वभावानवस्थितमिति वृत्तार्थः ॥ २ ॥

द्वादश-
कुलकम् ।
॥ २८ ॥

तृतीयं
कुलकम् ।
३

सामान्येन सर्वास्थिरतामभिधाय अथ प्रत्येकं सोपमां तामाह—

गुंजावायसमुद्धुयद्धयवडाडोवुब्भडं जोव्वणं, संसारीण तणग्गलग्गसलिलुत्तालं तहा जीवियं ।
लच्छीओ सुवणोवमा उ पवणुविल्लुप्पईवप्पहा,—लोलं भोगसुहं तरंगचवलं लावन्नवन्नाइयं ॥४॥

व्याख्या—'गुञ्जावातः' सशब्दप्रबलोत्कलिकावायुः, तेन 'समुद्धूतः' प्रकम्पितो यो 'ध्वजपटो' देवकुलादिपताकारूप—स्तस्याटोप आडम्बरं तद्वदुद्भट—मतिचपलं, 'यौवनं' तारुण्यं तावत् 'संसारिणां' प्राणिनां, तथा 'तृणाग्रलग्नसलिलोत्तालं' दर्भाद्यग्रभागवर्त्तिजलातिचपलं, 'तथेति' समुच्चये योजित एव, 'जीवितम्' आयुः, तथा 'लक्ष्म्यः' संपदः पुनः स्वप्नोपमाः दिवानुभूतादीनामर्थानां संस्कारविशेषवशाद् इन्द्रियानपेक्षः साक्षात्कारः स्वप्नस्तत्सदृश्यः, 'तुः' पुनरर्थे योजित एव । तथा 'पवनेन' वायुना उद्वेल्लन्ती प्राबल्येन चलन्ती या 'प्रदीपप्रभा' दीपच्छाया तद्वद् 'लोलं' चपलं 'भोगसुखं' स्त्र्यादिविषयोपभोगजन्य आनन्दः, तथा 'तरङ्गचपलं' कल्लोलतरलं, लावण्यवर्णादिकं 'लावण्यं' सौन्दर्यं 'वर्णः' शरीरच्छाया गौरत्वादिरूपः, आदिशब्दात् बलाज्ञादिपरिग्रह इति वृत्तार्थः ॥ ४ ॥

तथा—

कामालंकियकामिणीयणविलासुल्लासिनेत्तुप्पलु—त्तालं निज्जियदुज्जयारिविसरं रज्जं पि संसारिणं । ॥ २८ ॥
संजोगा वि विओगसोगबहुला सोक्खा वि दुक्खावहा, हा सव्वे जलबुब्बुय व्व विसयासंगा सया भंगुरा ५

व्याख्या–'कामालङ्कृतः' स्मरविभूषितः सकाम इति यावत्, यः 'कामिनीजनः' स्त्रीवर्गस्तस्य विलासेन प्रियदर्शनकाल-समुद्भूतशरीरक्रियाविकारविशेषेण 'उल्लासि' सविकारदर्शनप्रवृत्तं यद् 'नेत्रोत्पलं' लोचनकमलं तद्वद् 'उत्ताल'–मतिचपलं, तथा 'निर्जितदुर्जयारिविसरं' वशीकृतातिबलिष्ठशत्रुसमूहं, किं तदेवंविधमित्याह राज्यमपि प्रसिद्धं वर्त्तते इति शेषः। 'संसारिणां' प्राणिनां, तथा 'संयोगा' इष्टसम्बन्धा अपि, 'वियोगः' सम्बन्धविच्छेदः, इष्टवियोगे तल्लाभानर्हणज्ञानं शोकस्ताभ्यां 'बहुलाः' प्रचुराः, संयोगेष्वपि वियोगादिबाहुल्यमित्यर्थः। 'सुखान्यपि' विषयोपभोगजा आनन्दा अपि 'दुःखावहानि' पर्य्यन्तबाधाकारीणि, अत्र च "नीयालोचमभूया य आणिया दोवि बिंदुदुब्भा" इति प्राकृतलक्षणाद् द्विर्भावः, पुल्लिङ्गता च, अपिशब्दाः सर्वेऽपि समुच्चयार्थाः, 'हा' इति खेदे 'सर्वे' समस्ता अपि 'विषयासङ्गाः' रूपाद्यभिष्वङ्गा 'जलबुद्बुदा इव', वेगवद्वृष्टिसमुद्भवसलिलस्फोटका इव सदा 'भङ्गुरा' नश्वराः, पूर्वं हि जनितस्य सुखस्य अनित्यमभ्यधायि, अत्र तु विषयसम्बन्धस्यैवेति न पौनरुक्त्यमिति वृत्तार्थः ॥ ५ ॥

विज्जुज्जोयचलं बलं जलचलच्चंदाउलं राउलं, संमाणं करिकन्नतालतरलं लीलाविलासाइ वि।
संज्झारायसमा य तायजणणीजायाइसंगे रई, पच्चक्खं खणदिट्ठनट्ठमखिलं जं वत्थुमित्तं भवे ॥ ६ ॥

व्याख्या–'विद्युदुद्द्योतवत्' क्षणिकसंपाप्रकाशवत् च[श्च]लं तरलं 'बलं' शारीरसामर्थ्यं, वर्त्तते इति शेषः। तथा जले प्रतिबिम्बिततया चलन् प्रकम्पमानो यश्चन्द्रस्तद्वद् 'आकुलो'ऽतितरलो राजकुलः, राजकुलस्यायं राजकुलोऽण् प्रत्ययः,

द्वादश-कुलकम्। ॥ २९ ॥

राजकुलसम्बन्धी प्राकृतत्वादीयप्रत्ययाभावो जकारलोपश्च, 'संमानः' राजामात्यादिजनितः सत्कारः, नपुंसकत्वमिह प्राकृतत्वात्, तथा 'करिकर्णतालतरलं' तालशब्दः शोभावचनः तैस्तैर्वचनाङ्गविन्यासादिभिः प्रियानुकरणं लीला विलासः पूर्वव्याख्यातः, ततश्च लीलाविलासौ आदी यस्य मोट्टायितकुट्टमितादेः सुखितशृंगारचेष्टितस्य तल्लीलाविलासादिकं, अत्र द्वन्द्वानन्तरं बहुव्रीहिः, तथा 'सन्ध्यायां राग' आकाशाभ्रादीनां लौहित्यरूपः क्षणमात्रभावी, तेन 'समा' तुल्या 'चः' समुच्चये, कासावित्याह–'तातः' पिता 'जननी' माता 'जाया' भार्या, आदिशब्दात् पुत्रपुत्रिकादिपरिग्रहः, तैः 'सङ्गः' संयोग–स्तत्र 'रतिः' प्रीतिः सापि अस्थिरा इत्यर्थः, पित्रादिष्वपि कुतश्चित् प्रतिकूलवर्त्तिषु, अतथाभूतेष्वपि चेलणायामिव श्रेणिकस्य विपर्य्ययात् प्रतिकूलबुद्धिविषयेषु प्रीतेरभावात्, तथा चात्र भवे यद् वस्तु किंचित् पूर्वोक्तं जीवितादिकं कियद् वा प्रत्येकमभिधीयतामित्याह 'अखिलं' सर्वमपि प्रत्यक्षं साक्षात्कारिज्ञानप्रतीतं, तदिति शेषः, 'क्षणदृष्टनष्टं' दर्शनक्षणाद् द्वितीयक्षणे नश्यत्येव इत्यर्थः । पर्य्यायान्तरापत्ते–रवश्यंभावित्वादिति । एवं च सर्वभावानां क्षणिकत्वमवगम्य क्वापि प्रतिबन्धो न विधेय इति भाव इति वृत्तार्थः ॥ ६ ॥

तृतीयं कुलकम्। ३

प्रतिबन्धाभावेऽपि यद् विधेयं तदाह—

ता संसारमसारमेवमखिलं नाऊण तं छिंदिउं,
मोक्खं तविवरीयमक्खयसुहं लद्धुं च सोक्खत्थिणो । ॥ २९ ॥

भो तुब्भे भिलसेह तस्स य परो हेऊ जिणिंदोदिओ,

धम्मो तस्स उ साहणे किल विही सिद्धंतसिद्धो इमो ॥ ७ ॥

व्याख्या–यत एते भावाः सर्वेऽपि क्षणिकत्वेन असाराः, तत–स्तन्मयत्वेन संसारोऽपि असार एव, न हि नीलतन्तुनिर्मितः पटः कदाचित् शुक्ल इति, 'तस्माद्' भवद्भिरेवम्–असारं तुच्छं संसारम्–अखिलं संपूर्णं 'ज्ञात्वा'ऽवगम्य ततस्तं 'छेत्तुं' विनाशयितुमिति यावत्, न केवलं तं छेत्तुं किं तु मोक्षं च लब्धुं तत्प्राप्तयेऽपीत्यर्थः । 'चः' समुच्चये भिन्नक्रमश्च योजित एव, कीदृशमित्याह, तद्विपरीतमसारसंसाराद् अन्यथास्वभावं सारमित्यर्थः कथमेतदेवमित्याह "अक्षयसुखं" शाश्वतानन्दं, भवत्येवंविधस्य मोक्षस्य दुःखैकरूपात् संसारात् विपरीततेति, तं लब्धुं भो भव्या ? 'यूयं' सुखार्थिनः शाश्वतानन्दसस्पृहा 'अभिलषत' वाञ्छत, तस्य मोक्षस्य संसारोच्छेदस्य च 'परः' प्रकृष्टो हेतुः कारणं, चोऽवधारणे तेन हेतुरेव इत्यर्थः । क एवंविधमि(इ)त्याह–'जिनेन्द्रोदितो' वीतरागोपदिष्टो धर्मः संसारगर्त्तनिपतज्जन्तुजातधारणाप्रवणोऽध्यवसाय(यः)तत्पूर्वकमनुष्ठानं च, 'तस्य' तु धर्मस्य पुनः 'साधने' निष्पादने किलेत्याप्तवादे, सिद्धान्तसिद्धः श्रुतप्रतीतोऽयं वक्ष्यमाणो विधिः प्रवृत्तिप्रकारः, एवं प्रवर्त्तमानानां धर्मो जायते इति भाव इति वृत्तार्थः ॥ ७ ॥

अथ तमेव विधिमुपदर्शयिष्यन् प्रथमं तावद् विध्युपदेष्टृषु साधुसेवामाह–

संविग्गे कुग्गहुग्गगहरहियतणू सुद्धसिद्धंतधारी, साहू सेवेह तत्तो जिणमयमणहं भत्तिजुत्ता सुणेह ।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

द्वादश-कुलकम् । ॥ २० ॥

**चित्ते चिंतेह तत्तं तदवगमवसा सव्वकज्जे कुवोहं, हंतुं मोहं च निच्चं जयह नियमणे काउमाणं जिणाणं ८**

व्याख्या–'संविग्नान्' मोक्षाभिलाषुकान्, तादृशा अपि कुग्रहवन्तो न सुसाधव इत्याह, 'कुग्रहाः' पूर्वोक्ताः कदभिनिवेशाः, ते एव जन्तुस्वभावान्यथाकरणप्रवणत्वाद् 'उग्रग्रहा' रौद्रभूताद्यावेशा–स्तै 'रहिता' वर्जिता 'तनुः' शरीरं येषां ते तथा, उपलक्षणं चैष मनोऽपि तादृशमेव येषां, तेन मनसा तन्वा च कदाग्रहाविधायिन इत्यर्थः । एवंविधा अपि अवहुश्रुता उपदेशाक्षमत्वेन न सेवार्हाः स्युरिति अत आह–शुद्धमुत्सूत्रव्याख्यालेशमात्रेणापि अस्पृष्टं सिद्धान्तमागमं धारयन्ति सूत्रार्थाभ्यामधिगच्छन्ति ये तान्, 'साधून्' सुविहितान्, सेवत(ध्वं) नियमेन समाराधयत, ततस्तेभ्यः साधुभ्यः जिनमतं तीर्थकरप्रवचनम्, 'अनघं' समस्तदोषरहितत्वेन निरवद्यं, कीदृशाः सन्तः शृणुत भक्तियुक्तास्तत्र पञ्चाङ्गप्रणिपातशिरोनमनाञ्जलिप्रग्रहादिरूपा वाह्या प्रतिपत्ति–र्भक्तिस्तत्सहिताः 'शृणुत' आकर्ण्णयत एवं तावद् विधिप्रवृत्ते–रादिकारणं सद्गुरुसेवा–त्रोक्तेति । ततः किमित्याह–'चित्ते' मनसि चिन्तयत पुनः पुनरनुध्यायत, 'तत्त्वं' श्रुतजिनमतरहस्यम् उत्सर्गापवादलोकविरोधादिकृत्याकृत्यत्वरूपेण न तु अक्षरमात्रपरतया इतिभावः, ततस्तदवगमवशात् सम्यक्त्वावगमपारतन्त्र्येण, सर्वकार्य इति जातावेकवचनम् तेन 'समस्तेषु' सर्वेषु 'कार्येषु' चैत्ययतिसाधर्मिकादिप्रयोजनेषु 'कुबोधं' चैत्यार्थं स्थावरगृहादिविधानमपि समीचीनमेव इत्यादिकं 'मोहं', चाज्ञानं विपर्य्ययज्ञानरूपं 'हन्तुं' हत्वा विध्वस्य आज्ञां कर्त्तुं यतेत(यतध्वं) अथवा न केवलमेतद् द्वयमेव हन्तुं ध्वंसितुं यतध्वमपि तु 'निजमनसि' स्वकीयचित्ते 'कर्त्तुं' विधातुं जिनानामाज्ञां च तीर्थकरोपदेशं च विधातुं यत्नं कुरुत, तेन यतध्वमिति क्रिया काकाक्षिगोलकन्यायेन उभयत्रापि योजनीयेति वृत्तार्थः ॥ ८ ॥

तृतीयं कुलकम् । ३

॥ २० ॥

अन्यत्र—

सम्मदंसणमूलयं गुणवओमिल्लंतसाहासुहं, तुंगाणुव्वयखंधबंधकलियं सिक्खापसाहाउलं।
चित्तक्खित्तरुहं अभिग्गहदलं सद्धम्मकप्पद्दुमं, सद्धासुद्धजलेण सिंचह लहुं जिं होइ मुक्खो फलं ॥१॥

व्याख्या—सद्धर्मकल्पद्रुमं श्रद्धा(शुद्ध)जलेन सिञ्चत इति योगः, कीदृशमित्याह—चित्तमेव विचित्राध्यवसायाङ्कुरोत्पादननिमित्तत्वात् क्षेत्रं कर्षणभूमिस्तत्र आरोहति जायते इति "नाम्युपधानात्" कप्रत्यये चित्तक्षेत्ररुह—स्तं। तथा 'सम्यग्दर्शनं' सम्यक्त्वं तदेवादिभूतकारणत्वात् 'मूलं' जटाकलापो यस्य स तथा, स एव स्वार्थिककप्रत्ययान्तत्वात् मूलकः, सम्यग्दर्शनमूलाद् वा जातस्तन्मूलज—स्तम्। तथा सम्यक्त्वमूलोत्तरकालभावित्वात् विशिष्टतरक्षयोपशमसंपाद्यत्वाच्च अणुव्रतानि स्थूलप्राणातिपातादिविरमणप्रभृतीनि पञ्च तान्येव गुरुकर्माङ्घ्रिपङ्कदुरारोहत्वात्, 'तुङ्ग' उच्चः 'स्कन्धबन्धो' दृढप्रकाण्डनाल—स्तेन कलितो युक्त—स्तुङ्गाणुव्रतस्कन्धबन्धकलितस्तम्। तथा पूर्वोक्तहेतोरेव अणुव्रतप्रकाण्डोत्तरकालभावित्वाद् 'गुणव्रतानि' त्रीणि दिग्व्रतादीनि, तान्येव महत्त्वाद् 'उन्मीलन्त्यो' विकसन्त्यः 'शाखा' लता—स्ताभिः 'शुभं' प्रशस्तम्। तथा शिक्षेति भीमो भीमसेन इति न्यायात् शिक्षाव्रतानि चत्वारि सामायिकादीनि तान्येव प्रशाखाः शाखोद्भवलघुशाखा—स्ताभिराकुलं व्याप्तम्। तथा 'अभिग्रहा' देव—गुरु—साधर्मिकादिविषयाः पूजाऽतिथिसंविभागग्लानौषधदानादयो नियमा—स्त एवातिप्रचुरत्वाद् दलानि यत्र तम्। दाक्षिण्यौदार्यादयश्च कुसुमरूपतया स्वयमेव द्रष्टव्याः, कमेवंविधमित्याह—

'सद्धर्मः' प्रतिश्रोतोऽनुगामी श्राद्धधर्मः स एव समस्तकल्पितार्थदायकत्वात् कल्पद्रुमः सुरतरुविशेषः तम् । केन किं कुरुतेत्याह–श्रद्धा–सातिशय–तत्करणस्पृहा सा एव दुरध्यवसायपङ्कादूपितत्वात् 'शुद्धजलं' निर्मलसलिलं, तेन 'सिञ्चत' उक्षत । अतिश्रद्धया श्राद्धधर्मविधानमेव तत्सेचनमिति भावः। सेकफलमाह 'जिमिति' प्राकृतत्वाद् येन सेकेन 'लघु' शीघ्रं, भवति संपद्यते मोक्षः परम्परया कृत्स्नकर्मक्षयलक्षणः, फलं कार्यं विपाक इति यावत्, इति वृत्तार्थः ॥ ९ ॥

न केवलं द्वादशविधश्रावकधर्म एव कर्त्तव्यः किन्तु अन्यदपि इत्याह—

निच्चं विच्चम्मि सामाइयनवपढणज्झाणसज्झायमाईं, तिकालं चेइयाणं दसतियकलियं वंदणं चायरेह।
दाणं सक्कारसद्धाकमविहिसहियं देह चारित्तजुत्ते, पत्ते पत्ते ससत्तिं सइ कुणह तवं भावणाभावणं च १०

व्याख्या–'नित्यं' सर्वदा 'विच्चंमि त्ति' श्राद्धधर्मानुपालनान्तराले एव सामायिक–नवपठन–ध्यान–स्वाध्यायादीनि अपि प्रसिद्धानि आचरत इति योगः, तथा 'त्रिकालं' त्रिसन्ध्यं 'चैत्यानाम्'–अर्हद्बिम्बानां 'वन्दनं' स्तुतिस्तोत्रादियुक्तप्रतिपत्तिविशेषरूपं, कीदृशमित्याह 'दशत्रिककलितं', दशदशसंख्यानि त्रिकाणि परिवृत्त्याचारत्रयलक्षणानि प्रसिद्धि(द्ध)नैषेधिकीप्रभृतीनि क्रियाविशेषरूपाणि तैः 'कलितं' युक्तम् । तथाहि–जिनभवनप्रवेशे तावत् त्रिर्नैषेधिकीशब्दोच्चारणं, त्रिश्च प्रदक्षिणावर्त्तपरिभ्रमणं, त्रयश्च प्रणामाः । प्रदक्षिणाः कुर्वाणैरेव त्रिः शिरोनमनानि, प्रवेशसमये एव वा भूमौ ललाटस्पर्शनानि, त्रिविधा पूजा पुष्पनैवेद्यस्तुतिरूपा, तथा छद्मस्थसमवसरणस्थमोक्षपदस्थि(स्थे)तिरूपाऽवस्थात्रयं च भावनीयम् । ऊर्ध्वाध- ॥ ३१ ॥

स्तिर्यगूलक्षणदिक्त्रयनिरीक्षणं न कार्यं, त्रिर्भूमिप्रमार्जनसंवलादिना कर्त्तव्यं चैत्यवन्दनभूमेः, चैत्यवन्दनसूत्राक्षराणि तदर्थश्च वन्दनीयप्रतिमामुखावलोकनं च विधातव्यं, चैत्यवन्दनं कुर्वाणै-र्जिनयोगमुक्ताशुक्तिलक्षणा-स्तिस्रो मुद्राः कर्त्तव्यास्ताश्च अङ्गन्यासविशेषरूपाः । प्रणिधानमपि चैत्यवन्दनपर्य्यन्ते इष्टाशंसनरूपं मनोवचनकायै-स्त्रिविधमिति दश त्रिकाणि, तथा चोच्यते—

तिन्नि निसीहि य तिन्नि य पहा(या)हिणा तिन्नि चेइयपणामा । तिविहा पूया य तहा अवत्थतियभावणं चेव ॥ १ ॥

तिदिसि निरिक्खणविरई तिविहं भूमीपमज्जणं चेव । वन्नाइ तियं मुद्दातियं च तिविहं च पणिहाणमिति ॥ २ ॥

आचरत कुरुत इत्यर्थः । दानादिविधानमप्याह-तथा ('पात्रे') सुपात्रे चारित्रगुणोपेते, इह चारित्रग्रहणेन ज्ञानसम्यक्त्वयोरपि ग्रहणं, तयोरभावे तस्यापि अभाव एव इति कृत्वा, प्राप्ते कथमपि संघटिते दानं दद्ध्वं, न्यायोपार्जितवित्तवितरणं कुरुत, कथमित्याह-'सत्कारो'ऽभिमुखगमनादिः-द्विधः, 'श्रद्धा' तत्करणातिशयवाञ्छा, 'क्रमो' दातव्यवस्तूनां परिपाटिः, पूज्जनीयं वा गुणतारतम्यं, विधि-रागमोक्तप्रकारो देयदायकपात्रशुद्धिलक्षणः, तैः सहितं दद्ध्वं वितरत, शीलं तु देशविरतिलक्षणमनवरतमनुष्ठीयमानमेव आस्त इति नोक्तं, तथा स्वशक्तिमिति प्राकृतत्वात् तृतीयार्थे द्वितीया, ततश्च स्वशक्त्या आत्मशरीरसामर्थ्यानुसारेण इत्यर्थः, तपोऽनशनादिकं, तथा भाव्यन्ते पुनः पुनर्मनसा परामृश्यन्ते इति भावनास्तासा-मनित्यत्वाद्यनुचिन्तनरूपाणां भावनं परिभावनं च कुरुत । ताश्चेमाः-"भावयितव्यमनित्यत्वमशरणत्वं तथैकता-

आचार्य श्री सुविधिसागर जी महाराज

न्यत्वे। अशुचित्वं संसारः कर्मास्रवसंवरविधिश्च ॥ १ ॥" "निर्जरणलोकविस्तरधर्मस्वाख्याततत्त्वचिन्ताश्च। बोधेः सुदुर्लभत्वं च भावना द्वादश विशुद्धाः ॥ २ ॥" इति वृत्तार्थः ॥ १० ॥

एवमनन्तरालेऽपि सामायिकादिकृत्यमभिधाय अधुना परिहरणीयमित्याह—

**मा यायन्नह मा य मन्नह गिरिं कुत्तित्थियाणं तहा, सुत्तुत्तिन्नकुबोहकुग्गहगहग्घत्थाणमन्नाण वि ।**
**नाणीणं चरणुज्जुयाण य सया किच्चं करेहायरा, नीसेसं जणरंजणत्थमुचियं लिंगावसेसाण वि ॥ ११॥**

व्याख्या-माशब्दो निषेधवाची तेन माऽऽकर्णयत शृणुत यूयं, मा योगे क्वचित् पञ्चम्यपि, यथा मा भवतु तस्य पापमिति, तथा 'मा च' मन्यध्वं गिर-मसदर्थप्ररूपणपरां वाचं, कुतीर्थिकानाम्-अन्यदर्शनिनां बौद्धादीनां, गुरुत्वं प्राकृतत्वात्, तदाकर्णने मनने च मिथ्यात्वसंभवात्, 'तथेति' समुच्चये अन्येषामपि स्वदर्शनिनां, कीदृशानामित्याह-सूत्राद् गणधराद्युपदिष्टश्रुताद् 'उत्तीर्ण्णो' भ्रष्टस्तदननुमतो यः पदार्थसार्थः चैत्यनिमित्तस्थावरादिविधान(विघात)रूपः, उत्सूत्र इतियावत्, तथा 'कुबोधः' क्रियमाणाकृतत्वादिरूपो विपरीतार्थावगमः। तथा कुग्रहाः पौर्णमासी-पाक्षिकादि-प्रतिक्रमणादिरूपा-स्ते एव अन्यथात्वकारित्वाद् गृह्णन्ति स्वकीयं कुर्वन्ति पुरुषमिति 'ग्रहाः' पिशाचादय-स्ततश्च सूत्रोत्तीर्णश्च कुबोधश्चेत्यादि द्वन्द्वस्तैर्ग्रस्ता व्याप्ताः, अथवा सूत्रे सर्वथाऽनयोर्निषेधात् सूत्रोत्तीर्ण्णौ च तौ कुबोधकुग्रहौ च ताभ्यां ग्रस्ता-स्तेषामपि वचो न श्रोतव्यं, न ह्यत्र स्वमतपरमते उपयोगिनी । अपि तु वचनस्य शुद्धिः, सा चोभयत्रापि नास्तीति भावः, एवमसमीची-

नपरिहारमभिधाय, अथोत्कृष्टमध्यमजघन्यसाधुविषयं कृत्यविशेषमाह–'ज्ञानिनां' सम्यग्बोधभाजां 'चरणोद्यतानां' संपूर्णशुद्धक्रियाकारिणां च शुद्धसुविहितानामिति भावः। 'सदा' कृत्यं ग्लानाद्यवस्थासु पथ्यौपधादिदानरूपं, 'कुरुत' विधत्त, आदरात् सर्वथापि एषां कर्त्तव्यमित्यध्यवसायात्, 'निःशेषं' समस्तं कदाचिदशुद्धमपीति भावः। उपलक्षणं चैतत् तेन क्वचिद् ज्ञानाधिके पात्रे किंचित्क्रियाविकलेऽपि कृत्यं किंचित् कर्त्तव्यमेव। तथा 'जनरञ्जनार्थं' लोकचित्तावर्जनाय पुनर्लिंगावशेषाणामपि ज्ञानक्रियावैकल्येन लिङ्गमेव रजोहरणमुखवस्त्रिकादिमात्रमेव यतित्वमध्यादवशिष्यते इत्यवशेषो येषां ते तथा तेषाम्। अपिशब्दोऽरुच्युपदर्शकः, अयमभिप्रायः–ये तावत् ज्ञानक्रियावन्तस्तद्विषये तावत् शुद्धमशुद्धं वा पथ्यादिकं चिन्तनीयं। यस्तु ज्ञानमात्रवान् शुद्धप्ररूपकश्च तद्विषयं शुद्धमेव। यस्तु लिङ्गमात्रावशेषस्तद्विषये शुद्धमपि यत् क्रियते तल्लोकरञ्जनार्थमेव, एते हि श्राद्धाः स्वदर्शनेऽपि मत्सरिण इति मा ज्ञासिषुर्लोकाः। न चैतदनार्षं, तथा चागमः–"निच्चं पवयणसोहाकराण चरणजुयाण साहूणं। संविग्गविहारीणं सव्वपयत्तेण कायव्वं ॥१॥ हीणस्स विसुद्धपरूवगस्स नाणाहियस्स कायव्वं। जणचित्तग्गहणत्थं करेंति लिंगावसेसेऽवि ॥ २ ॥" इति वृत्तार्थः ॥ ११ ॥

अथ मैत्र्यादिचतुष्टयप्रभृतिकं कृत्यमाह—

कारुन्नं दुक्खिएसुं गुणिसु पहरिसं सव्वसत्तेसु मित्तिं, दोसासत्तेसुविक्खं कुणह तह अकल्लाणमित्ताण चायं।
सव्वत्थामं जिणिंदप्पवयणपडणीयाण माणप्पणासं, पूयं पुज्जेसु साहम्मियसयणजणे वच्छलत्तं विहेह १२

द्वादश-कुलकम् । ॥ ३३ ॥

तृतीयं कुलकम् । ३

व्याख्या–'कारुण्यं' निराशंस–परदुःखप्रहाणेच्छा, तत् यावद् 'दुःखितेषु' व्याधितेषु सर्वेष्वपि कुरुत इति योगः, 'गुणिषु' ज्ञानादिगुणोपेतेषु आचार्यादिषु प्रहर्ष–स्तद्दर्शनात् प्रकृष्ट–स्तद्विषय–स्तद्गुणानुमननरूपः प्रमोद–स्तम् । तथा 'सर्वसत्त्वेषु' तिर्यगादिषु अपि 'मैत्रीं' सौहार्दं, 'दोषासक्तेषु' वधादिप्रवृत्तेषु व्याधादिषु उपेक्षां हेयोपादेयतापराङ्मुखीं बुद्धिं माध्यस्थ्य-मित्यर्थः, कुरुत इत्युपदेशः, 'चेति' समुच्चये, अकल्याणमित्राणाम्–असदुपदेशप्रवृत्तपापमित्राणां 'त्यागं' परिहारं कुरुत इति सर्वत्र वृत्तप्रथमार्धे योज्यम् । तथा 'जिनेन्द्राणाम्'–अर्हतां 'प्रवचनं' द्वादशाङ्गं, तदाधारा आचार्यादयश्च तेषु 'प्रत्यनीकाः' परिपन्थिनो विनाशप्रवृत्ता इति यावत्, तेषां दुरात्मनां, 'सर्वस्थाम्ना' सर्वबलेन "अनुस्वारः प्राकृतत्वात्", स्वयं तावत् सामदानदण्डादिना परेण वा राजादिना, पर्य्यन्ते जीवितसंशयारोपणेनापि मानप्रणाश–महंकारखण्डनं निराकरणमिति यावत् । तथा 'पूजां' सपर्यां पूज्येषु तीर्थकृत्सु साधुसंघादिषु, तथा साधर्म्मिकाः ये प्रवचनतः समानधर्माणो नतु लिङ्गत एव, त एव 'स्वजनजनो' बन्धुवर्ग–स्तत्र 'सह धम्मरया (परा) मह बंधव त्ति' वचनात्, अथवा साधर्मिकाश्च स्वजनजनाश्चेति एकवद्भावः, तत्र वत्सलत्व–माहारादिदानेन चित्तसमाधानोत्पादकत्वं, 'विधत्त' कुरुत इति वृत्तद्वितीयार्द्धे क्रियान्त-रसम्बन्ध इति वृत्तार्थः ॥ १२ ॥

अथ मनोवचनकायानां शुद्धत्वमभिधातुं तेषां दोषविकलत्वं तावदाह—

सच्छं मच्छरमोहलोहरहियं निक्कामकोहं मउमु(म्मु)क्कंनिकवडं करेह हिययं हीलेह मा केइ वि । ॥ ३३ ॥

**दक्खिन्नं च कयन्नुयं च विणयं गंभीरिमं धीरिमं जं चन्नं कुलधम्मसंमयमहो सेवेह तं सव्वहा ॥१३॥**

व्याख्या–हृदयं तावदीदृशं कुरुत इति योगः, 'स्वच्छं' दुरध्यवसायपङ्कवैकल्येन निर्मलं, तथा क्षीयमाणवस्त्वपरित्यागेच्छा–मत्सरः, अथवा परसंपदसहनं सति विभवे त्यागाभावो वा, तथाचाहुः शाब्दिकाः "परसंपदामसहनं वित्तात्यागश्च मत्सरो ज्ञेयः"। 'मोहः' स्वजनादिषु आत्यन्तिकः स्नेहः, 'लोभः' पूर्वोक्तस्वरूप–स्ततो द्वन्द्वस्तै रहितं वर्जितं, तथा 'निष्कामक्रोधं' तत्र कामः कामिनीविषयोऽभिलापः, क्रोधः प्रज्वलनात्मको भावः, निर्गतौ कामक्रोधौ यस्मात् तन्निष्कामक्रोधम्, तथा जात्यादि-भिरष्टाभिरपि आत्मोत्कर्षप्रत्ययो मद–स्तेन मुक्तं रहितं वर्जितं, वचनवैपाद्यन्यथादर्शनेन परव्यंसनं कपटं मायाविशेषः, ततो निर्गतं कपटं यस्मात् तत्तथा, 'कुरुत' विधत्त 'हृदयं' चित्तं, अत्र कामस्य वेदोदयरूपस्य उपलक्षणत्वा–दन्येऽपि नोक-षायभेदा द्रष्टव्यास्ततश्च कषायचतुष्टय–नोकषायनवकस्यापि यथाशक्ति मनसि रोधो विधेय इति भावः, तथा वचसापि मा कांश्चन हीलयत तत्र हीलनं सद्भिरसद्भिर्वा दोषैः परेषां दूषणम्। उपलक्षणम् चैतत्तेन खिंसनपारुष्यादिकमपि वचसि परिहार्यं। कायेन पुनः कर्त्तव्यं कथयन्नेवाकर्त्तव्यनिषेधं दर्शयति–'दाक्षिण्यम्'–अनुकूलता, 'कृतज्ञता' विहितोपका-राविस्मरणं, चशब्दौ तुल्ययोगख्यापकौ, 'विनयो' नम्रत्वं 'गंभीरिमा' गाम्भीर्यं, 'धीरिमा' धैर्यम्, एतत् सर्वं कायेनापि सेवत (सेवध्वं), किमेतावदेवेत्याह, 'यच्चान्यदपि' एतस्माद् दाक्षिण्यादे–रपरमपि पापजुगुप्सा–निर्मलबोधादिकं, कीदृशमि-त्याह, 'कुलस्य' गोत्रस्य 'धर्मस्य' श्राद्धसम्बन्धिनः 'संमतं' तदविरुद्धम्, 'अहो' इति संबोधने तत् सेवत ( सेवध्वं ) आद-रेणानुतिष्ठत, 'सर्वदा' सर्वकालं सर्वप्रकारेण वा। इति वृत्तार्थः ॥ १३ ॥

मार्गदर्शक :- आचार्य श्री

अथात्र सर्वस्मिन्नसारे कथमेतत् कृत्यं कार्यमित्याह—

दूरे जाव जरा परावइ न जा मच्चू सरीरं च जा, सत्थं जा पडिहाइ इंदियवलं जाव त्थि सामग्गिया।
ता तुब्भे भववासनासणकए जं लोयलोउत्तरा–णुत्तिण्णं पकरेह तं वहुगुणं सग्गापवग्गावहं ॥ १४ ॥

व्याख्या–यावदिति कालपरिमाणे, ततो 'यावद्' यावन्तं कालं, 'जरा' वयोहानिलक्षणा, 'दूरे' वहुतरकालविलम्बभाविनी, तथा पराप्नोति यावन्न मृत्युः युष्मान् सोऽपि दूर एवेत्यर्थः। तथा 'शरीरमपि' यावत् स्वस्थं प्रभूततरवाताद्यनुपहतं 'प्रतिभाति' परिस्फुरति, तथा 'इन्द्रियवलमपि' चक्षुःश्रोत्रादीनां दर्शनश्रवणादिपाटवं यावत् प्रतिभाति, सत्यपि च जराद्यभावे यदि देवगुरुसाधर्मिकादिसामग्री न भवति, तदा किं क्रियत इत्यत आह–'यावदस्ति सामग्री' सैव स्वार्थिककप्रत्यये सामग्रिका, समस्तधर्मसाधनसामग्र्यं तत्संपूर्णता इति यावत्, 'तावत्' तावन्तं कालं 'तुब्भेत्ति' यूयं यत् किंचित् कृत्यं लोकलोकोत्तराभ्यां व्यवहाराभ्या–मनुत्तीर्ण्णं तदनुयायि दाक्षिण्यौदार्यकारुण्यादिकं पूर्वोक्तमन्यदपि च प्रकर्षेणातिशयेन कुरुत, तदिति कार्यजातं, कीदृशमित्याह–वहुगुणं विधीयमानं सत् प्रभूततरचारित्रादिगुणान्तरहेतुमत एव स्वर्गापवर्गावहं क्रमेण मोक्षस्यापि हेतुमित्यर्थः। किमर्थमीदृश–मनुष्ठीयता–मित्याह–'भववासस्य' संसारावस्थानस्य 'नाशनं' क्षयः–तत्कृते तन्निमित्तं प्रकर्षेण तत्करणेऽवश्यं भववासनाशनमिति भाव इति वृत्तार्थः ॥ १४ ॥

ननु एवं प्रभूतलोकस्याप्रवृत्तौ कथमेतदनुष्ठीयतामित्यत आह—

हुंडो–सप्पिणिदूसमाइवसओ जीवाण जोग्गत्तओ, कम्माणं च गुरुत्तणेण वहुसो लोए कसायाउले।

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

मुत्तूणं अणुसोयपट्ठियजणं भूरिं पि मुक्खत्थिणा, होयव्वं पडिसोयमग्गमइणा एसोवएसो मम ॥१५॥

व्याख्या–हुंडं सर्वत्र शरीरावयवेषु अनवस्थितं प्रमाणानुपेतसंस्थानविशेषः, प्रायस्तत्र तस्यैव भावात्, तत्प्रधानः कालविशेषो हीयमानसमस्तद्रव्याद्यनुभाव उत्सर्पिणीतो विपरीतस्थिति–रवसर्पिणी । अथवा 'हुंडा' असंपूर्णसंख्या महापुरुषा यस्यां सा तथा तदुक्तम्–'हुंडत्ति असंपुण्णा उत्तमपुरिसा हवंति तेवट्ठी । जीइ अवसप्पिणीए सा हुंडवसप्पिणी नेया ॥ १ ॥' तथा दुःखमा तस्या एव षडारकरूपायाः पुनः पुन–र्भ्रमणेन चक्राकारायाः पञ्चमो आरकः, आदिशब्दाद् वक्र–जडत्व–भस्मक–ग्रहादिग्रह–स्तदुक्तं–"हुंडो–सप्पिणी–दूसम–वक्र–जडत्तं च अंतसंघयणं । दसमच्छरियं भसमग्गहो य छहि सन्निवाएहिं ॥ १ ॥" हुडाऽवसर्प्पिणी च दुःषमादयश्च तेषां वश आयत्तता ततः, जीवानामयोग्यत्वात् कल्याणभाजनताया अनुचितत्वात्, 'कर्मणां च' ज्ञानावरणादीनां जीवसम्बन्धिनां गुरुत्वेन बहुकालवेद्यतया महत्त्वात्। लघुकर्म(र्मा)णो हि कदाचित् कषायेषु न प्रवर्त्तेरन्निति कर्मगुरुत्वग्रहणम्, एवं तावद् हेतुत्रयसद्भावे सति 'बहुशो' बाहुल्येन 'लोके' सामान्येनैव जने कषायाकुले क्रोधाहंकार–मान–मत्सरादिव्याप्ते, यद्यपि एवं प्रायो लोक–स्तथापि युष्माभिः श्रुतसद्गुरूपदेशैः किं कर्त्तव्यमित्यत उपदेशसर्वस्व–माह–एवंविधे प्रायो लोके सति धर्म्मार्थिनामपि बाहुल्येनानुश्रोतोमार्ग्गे नद्या अनुकूलप्रवहत्प्रवाह इव प्रायः प्रवृत्तिरित्यत आह–'मुक्त्वा' परित्यज्य 'अनुश्रोतसि' अविचारितरमणीयबहुजनप्रवृत्तिमार्गे गड्डरिकाप्रवाहे 'प्रस्थितं' चलितं, कीदृशं 'भूरिमपि' प्रभूतमपि, न हि धर्मानुष्ठाने बहुजनप्रवृत्तिः प्रमाणमपि तु आगमानुसारिणी स्तोकाऽपीति अत–स्तं बहुजनमपि परित्यज्य प्रतिश्रोतोमार्गमतिना केवलागमानुसारिबुद्धिना, 'भवितव्यं' संपादनी-

द्वादश-कुलकम्। ॥ ३२ ॥

तृतीयं कुलकम्। ३

मार्गदर्शक – आचार्य श्री …

यं केन इत्याह–'मोक्षार्थिना' मुक्त्यभिलाषुकेण पुरुषेण। ततश्च भवद्भिरपि मोक्षार्थिभि–रनुश्रोतोमार्गत्यागेन प्रतिश्रोतोमार्ग एवाङ्गीकार्य इति भावः। अथ उपदेष्टा करुणया स्वाभिप्रायमाह–एषोऽनन्तरोक्त उपदेशो हिताहितप्राप्तिपरिहारप्रतिपादकं वाक्यं, 'ममेति' कर्तु–रात्मनिर्देशः। इह च प्रायेण शार्दूलविक्रीडितस्रग्धरे एव वृत्ते इति वृत्तार्थः ॥ १८ ॥

अथ उपदेशविधानफलमाह–

**जिणवल्लभवयणरसायणं इमं जे कुणंति तेसिं धुवं। धुय–जर–मरणकिलेसं सिद्धत्तमणुत्तरं होइ ॥१६॥**

व्याख्या–जिनानां तीर्थकृतां वल्लभं सर्वजन्तुसुखहेतुत्वा–दभीष्टं वचनरसायनमिदं, वचन–मुपदेश–स्तदेव 'रसायनं' व्याधिवलीपलितादिनाशकः सदौषधविशेषः, तद्वदेतदपि अजरामरत्वहेतुत्वाद् रसायनम्। अथवा 'जिनवल्लभो' ग्रन्थकार एव मुनिपुङ्गव–स्तस्य वचनं, ये केचन पुण्यभाजः कुर्वन्ति तदर्थानुष्ठानेन सततमुपयुञ्जते, तेषां 'ध्रुवम्' अवश्यं न खलु सम्यक्प्रयुक्तं साधनं साध्यसिद्धिं व्यभिचरतीतिभावः। 'सिद्धत्वं' कृत्स्नकर्मक्षयलक्षणं, किंविशिष्टमित्याह–धूतं (ता) निर्नाशिताजरामरणक्लेशा यत्र तत्तथा। क्लेशास्तु अत्र रागद्वेषाभिनिवेशा मानसा व्याधयश्च शारीरा द्रष्टव्याः, ह्रस्वत्वं प्राकृतत्वात्, अत एव न विद्यते उत्तरं प्रधानं यस्मात् तत् तथा। न हि संसारे एवंविधसिद्धत्वादपि अन्यत् प्रधानं वस्तु अस्तीतिभावः। 'भवति' संपद्यते इति गाथार्थः ॥ १६ ॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ तृतीयकुलकविवरणं समाप्तमिति ॥

॥ ३५ ॥

70

## चतुर्थं कुलकम् ।

तृतीयकुलके तावत् प्रायः सर्वसांसारिकभावानां सोपमानमनित्यत्वमुक्तं, चतुर्थे तु संसारसमुद्रे मनुष्यत्वादे-रेव दुर्लभत्वं गाथापंचकेनाभिधाय अप्रमादोपदेशमाह—

जाइजरामरणजले उद्ग्गकुग्गाहवग्गदुग्गम्मि । दुव्वारवसणसंचयमहल्लहल्लंतकल्लोले ॥ १ ॥
रागदोसभुजंगे रोगुग्गमनक्कचक्कलह्वके । बहुविहकुतित्थदुत्थे रुंदे रुद्दे भवसमुद्दे ॥ २ ॥
नर–नरय–तिरिसुराइसु अरहट्टघडिव्व तिव्वकम्मबला । इह माजवंजवीभावओ चिरं भूरि भमिऊण ३
कहकहवि तुडिवसा चुल्लगाइदिट्ठंतदुल्लहं तुमए । मणुयत्तं पत्तं सुत्तसवणसद्धाविरियजुत्तं ॥ ४ ॥
ता दुल्लहमिमं चिंतामणिं व चउरंगियं लहेऊणं । मा सुद्धधम्मकरणे पमाय–मायरसु अप्परिउं ॥५॥

व्याख्या–इह संसारसमुद्रे चिरभ्रमणेन कथमपि मानुषत्वादिकं प्राप्य प्रमादं मा कार्षीरिति सम्बन्धः, कीदृशे तस्मि-न्नित्याह–जातिजरामरणान्येव प्रचुरत्वात् जलं यत्र, 'उदग्रा' उद्भटाः 'कुग्रहाः' कदभिनिवेशा–स्त एव कुत्सिता ग्राहा-स्तंतुरूपा जलचरविशेषास्तेषां 'वर्गः' समूह–स्तेन 'दुर्गे' विषमे, तथा 'दुर्वाराणि' निरोद्धुमशक्यानि यानि व्यसनानि राज-

द्वादश-कुलकम् । ॥ ३६ ॥

चौरज्वलनाद्युपद्रवा-स्तेषां 'संचयाः' समूहा-स्त एव पुनः पुनरुत्पत्तिविनाशधर्मकत्वात् महान्तोऽतिगुरवश्चलन्तः 'कल्लोला' वीचयो यत्र स तथा तत्र ॥१॥ तथा रागद्वेषा एवातिकटुकविपाकापत्तिनिमित्तत्वात् भुजङ्गो यत्र, तथा 'रोगोद्गमा' ज्वरादिव्याध्युद्भवा-स्त एव 'नक्रचक्रं' जलचरविशेषवृन्दं तेन 'ललके' रौद्रे, 'बहुविधकुतीर्थानि' प्रभूतकुमतानि तान्येव कुमतानि सुगतिगमनपरिपन्थित्वात् कुत्सितजलावतारमार्गा-स्तैर्दुःस्थे दुर्गमे, 'रुन्दे' विस्तीर्णे, 'रौद्रे' महाभीषणे भवसमुद्रे प्रसिद्धे ॥ २ ॥ इह नरनरकतिर्यक्सुरादिषु प्रसिद्धेषु आदिशब्दः स्वगतानेकभेदसंसूचकः, भ्रांत्वा इति सम्बन्धः, कथमित्याह-'अरहट्टघटीव' जलयन्त्रस्थितघटिकेव, यथा सा कदाचिद् ऊर्ध्व-मायाति कदाचिदध-स्तथा जीवोऽपि कदाचित् नरके कदाचित् सुरादिषु इत्यर्थः । कस्मात् 'तीव्रकर्मबलात्' अतिगाढबन्धनबद्धज्ञानावरणादिसामर्थ्यात्, पुनः कथं भ्रांत्वा इत्याह-'आजवंजवीभावतः' नरत्वात् नरत्वे अथवा नरत्वात् सुरादिषु पुनः पुनरुत्पत्ति-राजवंजवीभाव-स्तस्मात्, 'चिरं' प्रभूतपुद्गलावर्त्तान् यावत्, 'भूरि' बहुवारं भ्रान्त्वा पर्य्यट्य ॥ ३ ॥ 'कथं कथमपि' महता क्लेशेन अनुस्वारादिलोपः प्राकृतत्वात्, 'तुडिवशात्' देशीभाषया दैववशात्, चोल्लकादयो दृष्टान्ता दश प्रागुक्ता-स्तैर्दुर्लभं दुरापं भोः श्राद्धवर ! इति गम्यते, त्वया भवता मनुजत्वं प्रसिद्धमेव प्राप्तं कीदृशमित्याह-सूत्रश्रवणम्-आगमाकर्णनं, श्रद्धा तदर्थेषु एवमेवैते इति, 'रुचि'-रभिलाषः, 'वीर्यं' शक्तिर्मानसशारीरावष्टम्भविशेषः, ततः सूत्रश्रवणं चेत्यादि द्वन्द्वे, तत्र श्रवणश्रद्धावीर्याणि तैर्युक्तं सहितम्, एतत्त्रितयाभावे हि मनुजत्वं प्राप्तमपि अकिंचित्करमेव स्यादिति तद्युक्तमभिहितं ॥४॥ यत एतच्चतुष्टयं भवता प्राप्तं तत् तस्माद् 'दुर्लभामिमां' चिन्तामणिमिव चिन्तारत्नमिव 'चतुरङ्गिकां' धर्मसाधनाङ्गचतुष्टयरूपां, 'लब्ध्वा'

चतुर्थ कुलकम् । ४

॥ ३६ ॥

प्राप्य, तथा चोच्यते–"चत्तारि परमंगाणि दुल्लहाणीह जंतुणो। माणुसत्तं सुई सद्धा संजमंमि य वीरियं" ॥ १ ॥ मा प्रमाद–माचारीः शैथिल्यं कार्षीः, क्व विषये इत्याह–'शुद्धधर्मकरणे' विधिधर्ममार्गविधाने कीदृशं तमित्याह–'आत्मरिपुं' स्वस्य शत्रुभूतं, प्रमादो हि महानर्थहेतुतया शत्रुरेव, ततः सर्वथा दूरे वर्जनीय इति गाथापञ्चकार्थः ॥ ५ ॥

किमित्येवं प्रमादाचरणं निषिध्यते इति प्रमादस्यानर्थहेतुतां गाथाद्वयेनाह–

जम्हा समत्थसत्थत्थजाणगा सव्वपुव्वपारगया। पत्तअमत्तट्ठाणा समग्गसामग्गिकलिया वि ॥ ६ ॥
हिंडंत णंतकालं तदणंतरमेव नरयरयपडिया। पावप्पमायवसओ गहि(ही)रभवावत्तगत्तम्मि ॥ ७ ॥

व्याख्या–यस्मात् प्रमादवशतो जीवा अनन्तं कालं भवे हिण्डन्त इतियोगः, कीदृशा इत्यत आह–'समस्तशास्त्रार्थज्ञातारो' लक्षणसाहित्यतर्कादिग्रन्थविदः, न केवलमेतद्विदोऽपि तु 'सर्वपूर्वपारगताः', पूर्वाणि द्वादशाङ्गावयवविशेषाः तेन चतुर्दशपूर्वधरा अपि, एतावता संपूर्णश्रुतोपयोगित्वमुक्तं, तथा 'प्राप्ताप्रमत्तस्थाना अपि' लब्धसप्तमगुणस्थानविशुद्धयोऽपि, अनेनापि संपूर्णक्रियाकलितत्वं व्यञ्जितं, किं बहुना 'समग्रसामग्री–कलिता अपि' अपिर्विस्मये, अक्षेपमोक्षसाधननिःशेषसाधना अपि, न हि एवं विशुद्धज्ञानचारित्रयो–रन्यत् किमपि तत्साधनं, परमेवंविधा अपि अनन्तं कालं हिण्डन्ते 'गम्भीरभवावर्त्तगर्त्ते' बहुकालवेदनीयदुःखागाधसंसारजलभ्रमणश्वभ्रे, कीदृशाः सन्त इत्याह–'नरको' दुर्गति–रुपलक्षणं चैतत् कुमानुषत्वादीनां तस्य 'रयो' वेगः पुनः पुनः शीघ्रतरा तत्प्राप्ति–स्तत्र 'पतिताः' कृतावस्थितयो भ्राम्यन्ति कुव

इत्यत आह–'पापो'ऽत्यन्तजुगुप्सितो यः 'प्रमादो' निद्राविषयकषायादि–प्रसङ्गलक्षणः 'तद्वशतः' तत्पारतन्त्र्येण, 'तदनन्तरमेव' प्रमादविधानोत्तरकाललक्षण एव, अयमभिप्रायो–यत्प्रभावादेवंविधा अपि चतुर्गतिकं संसारम् अनन्तं कालं भ्राम्यन्ति (तर्हि)तस्यावकाशः स्तोकोऽपि कथं देय इति गाथाद्वयार्थः ॥ ६–७ ॥

यत एवं महारौद्रविपाकः प्रमाद–स्ततः किमित्याह—

**तम्हा पमायमयरामयं पमुत्तूण कुणसु तं निच्चं । धम्मं संमं सम्मत्तमाइ तस्साहणत्थं च ॥ ८ ॥**

व्याख्या–यत ईदृशः प्रमादः 'तस्मात्' कारणात् प्रमाद एव पूर्वोक्तस्वरूपश्चैतन्यापहारित्वात् 'मदिरा' मद्यं तया मदः क्षीवता तत्स्थानीयं कलहविषयव्यासङ्गादिकं 'प्रमुच्य' मुक्त्वा ( त्यक्त्वा ) 'कुरु' विधेहि, त्वमिति त्वच्छब्देन प्रतिपाद्यश्रावकपरामर्शः, 'नित्यं' सर्वदा धर्म्मं पूर्वोक्तं, सम्यग् यथावस्थितत्वेन सम्यक्त्वादि सम्यक्त्वाणुव्रतादिरूपं, तथा 'तत्साधनार्थं' धर्मसिद्धये च वक्ष्यमाणं विदध्यादि(इ)ति गाथार्थः ॥ ८ ॥

किं तदित्याह—

**संविग्गे गीयत्थे जहसत्तिं कयविहारपरिहारे । सययं पयओ सेविज्ज संजए निज्जियकसाए ॥ ९ ॥**

व्याख्या–'संविग्नान्' गीतार्थान् साधून् सेवेत भवानिति संबोधनीयश्राद्धोपदेशः, कीदृशानित्याह–'यथाशक्ति' स्वकीयबलवीर्यानुसारेण कृतौ विहारपरिहारौ यैस्ते तथा तान्, तत्र विहरणं विहारः, सम्यक्–समस्तयतिक्रियाकरणं, परिहार

इति सामयिकी भाषा, स च द्विविधः परिभोगधारणारूपतया, तत्र यद् वस्त्रादिकं प्रत्युपेक्ष्य तदैव परिभुज्यते एष
परिभोगपरिहारः, यच्च प्रत्युपेक्ष्य ध्रियते कम्बलादिकं न तु तदैवोपभुज्यते, स धारणापरिहारः, तथा चोक्तम्–'निशीथविं-
शोद्देशके–"लोउत्तरपरिहारो दुविहो परिभोगे परिभुज्जइ पाउण इत्यर्थः ॥ धारणापरिहारो नाम तं संगोविज्जइ । पडिले-
हिज्जइ तं न य परिभुज्जइ त्ति" ॥ १ ॥ तथा 'निर्जितकषायानिति', प्रसिद्धमेव, 'सततं' सर्वदा 'प्रयतः' प्रयत्नवान् सेवेत
भक्त्या पर्युपासीत, ननु संविग्नसेवनतच्छ्रुतश्रवणादिकं च पूर्वकुलकेऽभ्यधायि अत्रापि चेति पौनरुक्त्यमिति चेन्न, भिन्न-
भिन्नश्रावकाणां भिन्नभिन्नोपदेशरूपत्वाद्, एषामयमदोषोऽथवा एकस्यापि पुनः पुनरुपदेशेन न पौनरुक्त्यं । तदुक्तम्–"स-
ज्झाय–झाण–तव–ओसहेसु उवएसथुइपयाणेसु । संतगुणकित्तणासु य न हुंति पुणरुत्तदोसा य ॥१॥" इति गाथार्थः ॥९॥

ततोऽपि किमित्याह—

**निसुणिज्ज सुद्धसिद्धंतमंतिए तेसिं सम्ममुवउत्तो । तत्तं नाउं कुग्गहरहिओ वट्टिज्ज तव्विहिणा ॥ १० ॥**

व्याख्या–तेषां पूर्वोक्तगुणानां सुविहितानाम् 'अन्तिके' समीपे 'निशृणुयात्' नियमेन आकर्णयेत् 'शुद्धसिद्धान्तं' सर्वदोष-
विनिर्मुक्तं श्रुतम् । अनेन तद्विपरीतोत्सूत्रभाषकागीतार्थात् तच्छ्रवणनिषेधमाह, तदुक्तम्–"तित्थे सुत्तत्थाणं गहणं तित्थं तु
इत्थ नाणाई । गुणगणजुओ गुरू खलु सेससमीवे न तग्गहणं ॥१॥" "सम्यगुपयुक्तो' दत्तावधानोऽनेनापि निद्राविकथादि-
परिहार–प्रबद्धाञ्जलित्वत्रिगुप्तत्वादिरूपं श्रवणविधिमाह, तदुक्तम्–"निद्दाविकहापडिवज्जिएहिं गुत्तेहिं पंजलउडेहिं । भत्तिबहु-

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

द्वादश- कुलकम् । ॥ ३८ ॥

चतुर्थ कुलकम् । ४

माणपुव्वं उवउत्तेहिं सुणेयव्वं ॥ १ ॥" किमर्थमित्याह–'तत्त्वं' परमार्थं ज्ञातुम्–अवबोद्धुम्। अथवा श्रुते सति सिद्धान्ते तस्य तत्त्वं ज्ञात्वा तद्विधिना अवधारिततत्त्वानुसारेण प्रवर्त्तेत समस्तचैत्यवन्दनादिक्रियासु 'कुग्रहरहितः' कदभिनिवेशत्यागी, कुग्रहस्य हि तालपुटविषवत् महानर्थहेतुत्वात्तद्धारणादिति गाथार्थः ॥ १० ॥

अथ दानोपदेशमाह—

वत्थपडिग्गहमाई सद्धासक्कारसारमाणाए । सुद्धं सिद्धंतधराणं दाणमवि दिज्ज सत्तीए ॥ ११ ॥

व्याख्या–'वस्त्रम्' और्णक्षौमादिरूपं, 'पतद्ग्रहः' पात्रं, समस्तौघिकोपध्युपलक्षणं चैतत्, आदिशब्दादौपग्रहिकसंस्तारक-दण्डकादिग्रहः, श्रद्धासत्काराभ्यां सारं प्रधानम् । एतौ च पूर्वं व्याख्यातौ, अत एवाह–'आज्ञया' दातृदेयग्राहकशुद्धिरूपेण सिद्धान्तोपदेशेनेत्यर्थः । तत्र श्रद्धेत्यादिना दातृशुद्धिः, शुद्धमाधाकर्मादिदोषरहितमित्यनेन देयशुद्धिः, 'सिद्धान्तधरेभ्यः' सम्यक्श्रुतवेत्तृत्वेन तदुक्तानुष्ठानपरेभ्योऽनेनापि ग्राहकशुद्धिः प्रत्यपादि । आगमेऽपि एवमभ्यधायि–"सड्ढेणं सइ विभवे साहूणं वत्थमाइ दायव्वं । गुणवंताण विसेसो तुच्छस्स दिसादविक्खाए ॥ १ ॥" "णंतगघयगुलगोरसफासुयपडिलाहणं समणसंघे । असइ गणिवायगाणं तदसइ गच्छस्स सव्वस्स ॥ २ ॥" इत्यादि । 'दानमपि' वस्त्रादिवितरणमपि, आस्तां श्रुतश्रवणादिकमित्यपेरर्थः । 'दद्याद्' वितरेत् श्राद्धः शक्त्या 'शक्तितस्त्यागतपसी' इति वचनात्, चित्तवित्तानुरोधेन इति गाथार्थः ॥ ११ ॥ ॥ ३८ ॥

अथ शीलतपोभावनोपदेशमाह—

सीलं सीलिज्ज तवं तविज्ज भाविज्ज भावणाओ य । दुक्करकरे सुयधरे धरिज्ज चित्ते सया साहू ॥ १२ ॥

व्याख्या–'शीलं' श्राद्धसद्धर्माचरणलक्षणं सदाचारं शीलयेद्–भ्यसेत्, कुर्यादिति यावत्, तपोऽनशनादिकं 'तप्येत' अनुतिष्ठेत्, 'भावयेद्' अनुचिन्तयेद्, 'भावनाः' पूर्वोक्ता अनित्यत्वाद्याः, 'चः' समुच्चये, तथा 'दुष्करकरान्' दुरनुचरतपःक्रियाद्यनुष्ठायिनः, तथा 'श्रुतधरान्' सिद्धान्तसागरपारदृश्वनः साधून् सदा धारयेत् चित्ते, विशिष्टक्रियाज्ञानवत्त्वेन तच्चिन्तनस्यापि भावनाविशेषत्वेनौचित्याद्–इति गाथार्थः ॥ १२ ॥

ननु उक्तविशिष्टगुणाः सुविहिताः नोपलभ्यन्त एव तत् किंविषयोऽयं दानाद्युपदेश इत्यत आह—

कालाइदोसओ कहवि जइवि दीसंति तारिसा न जई ।
सव्वत्थ तहवि नत्थि त्ति नेव कुज्जा अणासासं ॥ १३ ॥

व्याख्या–'कालः'–अवसर्पिणीरूपः, आदिशब्दाद् दुःखमादिसमस्तसन्निपातग्रहः, तेषां दोषोऽसत्प्रवृत्तिहेतुत्वलक्षणस्ततो यद्यपि 'कथमपि 'केनापि प्रकारेण परीक्षापटुबुद्धिमान्द्यादिना न दृश्यन्ते तादृशा यथोक्तगुणा यतयः, तथापि सर्वत्रापि भारतवर्षे न सन्तीति 'अनाश्वासो' भगवद्वचनाप्रतीतिलक्षणो न कार्यः, दुःप्रसभान्तस्य चरणस्य भगवता सिद्धान्तेऽभिधानादिति गाथार्थः ॥ १३ ॥

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज





तदहो भोजनभाजननिष्ठीवनकारिकुट्टिनीवचनप्रमाणाभ्युपगमेन स्वदृष्टे-रप्रामाण्याभाणकमेतदनुकुरुते इत्याशङ्क्य स्वदृष्टेरन्यथासिद्धत्वेन भगवद्वचनस्यैवात्रार्थे प्रामाण्यमुपदर्शयन्नाह—

कुग्गहकलंकरहिया जहसत्ति जहागमं च जयमाणा । जेण विसुद्धचरित्त त्ति वुत्तमरहंतसमयम्मि ॥१४॥

व्याख्या-'कुग्रहः' कदभिनिवेशः स एव निर्मलश्वेतपटकल्पजीवस्वभावदूषकत्वात् कलङ्कः कज्जलस्तवककल्प-स्तेन रहिता, अनेन विशुद्धबोधत्वमुक्तं, 'यथाशक्ति' शक्त्यनतिक्रमेण, 'यथागमं च' आगमानतिक्रमेण च 'यतमाना' यतनया प्रवर्त्तमाना येन कारणेन 'विशुद्धचारित्रा' गौतमादिवद् इत्युक्तम् 'अर्हत्समये' भगवत्प्रवचने, अयमभिप्रायः—न हि षण्मासादितपोऽनुष्ठातारः सनत्कुमारादिवत् सर्वथा निःप्रतिकर्मशरीरा एव साधवः, किन्तु निश्छद्मानः, स्वबलागोपनेन समस्तक्रियासु प्रवर्त्तमानाः कुग्रहत्यागिनः परामत्सरिणश्च चेद् भवन्ति तदाऽत्र काले तेऽपि सुसाधव एवेति, ततो यत् तथाविधानामदर्शनं तत्कालसंहननाभावप्रयुक्तं सुविहितत्वं च शक्त्यनुसारिप्रवृत्तिकृतमिति अधुनापि सुसाधवः सन्त्येव इत्युक्तमागमे ॥ तथाचागमः-"कालोचियजयणाए मच्छररहियाणमुज्जमंताणं । जणजत्तारहियाणं होइ जइत्तं जईण सया ॥ १ ॥" तत् सिद्धमेतत्, संप्रति अपि केचित् सुसाधवः सन्ति विशुद्धाध्यवसायत्वे सति कालबलाद्यनुसारियतिक्रियानुष्ठायित्वात् कूरगड्डुकादिवदिति गाथार्थः ॥ १४ ॥

सांप्रतं सम्यक्त्वादिगुणपूजनलक्षणं धर्मकृत्यमाह—

सम्मत्त-नाण-चरणाणुवाइमाणाणुगं च जं जत्थ । जाणिज्ज गुणं तं तत्थ पूयए परमभत्तीए ॥१५॥

व्याख्या—यं गुणं यत्र जानीयात् तं तत्र पूजयेदिति योगः । यत्र क्वापि साधुसाधर्मिकादौ सम्यक्त्वज्ञानचरणानुपातिनं तदनुगतं गुणं यं कंचन क्षमादिकं, कश्चित् तदनुगतो गुणः तपो-व्याख्यानादिको न गुर्वाज्ञानुगतः स्यात्, तद्व्यवच्छेदार्थमाह—'आज्ञानुगतं' गुर्वादेशकलितं तदाज्ञावैकल्ये तपश्चरणादेरपि अनन्तसंसारहेतुत्वेन श्रवणात्, 'जानीयात्' स्वबुद्ध्या विद्यात्, तं गुणं तत्र साध्वादौ पूजयेत् प्रशंसादिना पुरस्कुर्यात्, 'परमभक्त्या' प्रकृष्टगुणबहुमानेन, अयमभिप्रायो यस्य वैयावृत्त्यकरादेः सद्गुणस्यैव यं वैयावृत्त्यकरणादिकं (गुणं) पश्येत् तं तत्र विशेषतो बहुमानेन पूजयेत्, न तु निर्गुणस्य सतस्तद्गुणमात्रं, तदुक्तम्—'नाणं दंसणचरणं तवविणयं जत्थ जत्तियं पासे । भावं जिणपन्नत्तं तु पूयए परमभत्तीए ॥ १ ॥' इति गाथार्थः ॥ १५ ॥

मध्यस्थभावेन गुणागुणविभागः कर्त्तव्यः इत्याह—

**काऊण रागचागं मणे मुणिज्जा गुणागुणविभागं । भाविज्ज कडुविवागं च कामरागं सयाकालं ॥ १६ ॥**

व्याख्या—'कृत्वा 'विधाय 'रागस्य' प्रेमानुबन्धस्य त्यागं, द्वेषोपलक्षणं चैतत्, ततो 'मनसि' चित्ते ('मुणिज्जा' जानीयात्) गुणागुणविभागम्, अमध्यस्थो हि नैतत् कुर्यात्, तदुक्तम्—"रत्ता पिच्छंति गुणा दोसा पिच्छंति जे वि रच्चंति । मज्झत्था पुण पुरिसा दोसे वि गुणे वि पिच्छंति ॥१॥" मध्यस्थीभूय साध्वादीनामपि गुणागुणौ चिन्तनीयौ इति भावः । तथा भावयेद्—अनुचिन्तयेत् 'कडुविपाकम्' अत्यन्तदुःखदायि पर्य्यन्तं, कमित्याह—'कामः' पूर्वोक्त-स्तद्रूपो रागोऽभिष्वङ्गः, तद्भा-

मार्गदर्शक : आचार्य श्री सुविधिसागर जी महाराज

द्वादश-कुलकम् । ॥ ४० ॥

वनस्यैव प्रायः संसारवैराग्यहेतुत्वात्, अनेनाचार्यादिविषयं रागं प्रशस्तमेवाह–'सदाकालं' सर्वदेति गाथार्थः ॥ १६ ॥ चतुर्थं कुलकम् । ४

अन्यच्च–

दक्खिन्नमपेसुन्नं भवनिग्गुणणं च दुहियकारुन्नं । मन्निज्जन्नंपि मणम्मि निम्मले निच्चमिच्चाइ ॥ १७ ॥

व्याख्या–दाक्षिण्यम्–अपैशून्यम्–अदौर्जन्यं भवनैर्गुण्यं च दुःखितकारुण्यमिदं सर्वं प्रसिद्धमेव, मनसि निर्मले कषायाद्यदूषिते, न केवलमेतत् किन्तु अन्यदपि इत्यादि एवं प्रकारं संसारवैराग्यनिमित्तमशरणत्व–कायाशौचादिकं नित्यं सर्वदा मन्येत परिभावयेदिति गाथार्थः ॥ १७ ॥

अथ रूपकालङ्कारेण सपरिकरमोहध्वंसमुपदिशन्नाह–

हणिऊण कोहजोधं माणगिरिं दलिय मलिय मायलयं । दहिउं लोहपरोहं मोहपिसायं विणासिज्जा १८

व्याख्या–'हत्वा' विनाश्य क्रोध एवातिवलवत्त्वाद् योधः सर्वयुद्धनिपुणः पदाति–स्तम् । तथा मान एवातिगौरवदर्शनहेतुत्वाद् 'गिरिः' पर्वत–स्तमपि 'दलयित्वा' संचूर्ण्य तथा 'मलियत्ति' मृदेर्मलादेशे 'मृदित्वा' निःपिष्य 'मायालतां' निकृतिवल्लीं, तथा दग्ध्वा भस्मसात्कृत्य 'लोभप्ररोहं' गाढ्यांङ्कुरम् । एवं समस्तसप्रभेदकषायान्, उपलक्षणतया चैषां नोकषायानपि तत्परिकरभूतान् विध्वस्त(स्य)मोहश्चतुर्थं कर्म स एवातिदारुणदुःखदायित्वात् चिन्त्य(न्तय)मानस्यापि अतिभयहेतुत्वात् 'पिशाचो' व्यन्तरविशेषः, तं विनाशयेत् क्षयं नयेत्, क्षपितसमस्तसैन्यराजवत् तस्य सुविनाशत्वादिति गाथार्थः ॥ १८ ॥ ॥ ४० ॥

एवमप्रशस्तनिषेधमभिधाय प्रशस्तप्रवृत्तिमाह—

माणिज्ज माणि(ण)णिज्जे हीलिज्ज न केइ लोय मणुयत्ते। वसणे धणि व्व पत्ते गंभीरधीरं मणं कुज्जा १९

व्याख्या–'मनुजत्वे' मानुषत्वे वर्त्तमानान् लोकान् मान्यान् मातापितृप्रभृतीन् राजामात्यादीनपि मानयेत्, वचनदानादिना सत्कारयेत्, तथा कांश्चिद् दुर्गतादीन् 'न हीलयेत्' सदसद्दूषणोद्घट्टनेन न विगोपयेत्, तत्करणस्याशिष्टताव्यञ्जकत्वात्, तथा व्यसने राजचौरादिजनितायामापदि अपि 'गम्भीरधीरं मनः कुर्यात्' बहिरलक्ष्यमाणदुःखं ससत्त्वं चेत्यर्थः॥ 'धने' द्रव्य इवेति दृष्टान्तः, प्राप्ते लब्धे, यथा धने प्राप्ते सर्वथापि अर्त्तिर्न क्रियते तथा व्यसनेऽपीति भाव इति गाथार्थः॥ १९॥

एवं मानसिकं शुद्धव्यापारमभिधाय अथ वाचनिकं तमाह—

पन्नविज्जं गुणिजणमुचियं चोइज्ज दिज्ज उवएसं। सयमवि सारणवारणचोयण–मन्नेसिमिच्छिज्जा ॥२०॥

व्याख्या–'गुणिजनं' श्राद्धादिलोकं 'चोइज्जत्ति' क्वचित् स्खलिते शिक्षाविशेषेण प्रेरयेत् श्राद्धादिकं, किमविशेषण सर्वमपि इत्यत आह–'प्रज्ञापनीयं' कुग्रहत्यागेन प्रज्ञापनायोग्यं, तदितरस्य तु आग्रहिणो नोदनाया नैरर्थक्यात्, तत्रापि उचितमेव बहुपराधस्यापि यावत् क्रोधाद्युत्पादकं न भवति तावदेव नोदनं कुर्याद्, शेषस्य तु नोदनस्यापि परस्य क्रोधोत्पादकत्वात्, तथा चोच्यते–"चोयणं पि हु से देइ जो दाउं जाणई तयं। परदुव्वयणं सोच्चा जो रोसेण न जिप्पई ॥ १ ॥" न केवलं प्रेरयद् 'दद्याच्च' वितरेत् उपदेशं धर्मप्रतिबद्धं वचनं तदपि उचितं प्रज्ञापनीयस्य चेति योज्यम्। तथा चोच्य-

द्वादश-कुलकम्। ॥ ४१ ॥

चतुर्थं कुलकम्। ४

ते–'उपदेशो न दातव्यो यादृशे तादृशे नरे' इति, न केवलं परस्मिन्नुपदेशप्रेरणे कर्त्तव्ये, किन्तु 'स्वस्यापि' आत्मनोऽपि कैश्चिदन्यै–र्गीतार्थप्रायैः क्रियमाणं स्मारण–वारण–नोदनमिति समाहारद्वन्द्वः 'इच्छेद्'–अभिलषेद् अङ्गीकुर्यादित्यर्थः। तत्र स्मारणं विस्मृते प्रत्युपेक्षणादौ, वारणम् अनाभोगात् पृथिव्याद्युपमर्दप्रवृत्ते, नोदनं वाक्कलहादिप्रवृत्ते मनाग् निष्ठुर-शिक्षादानम्, उपलक्षणत्वात् प्रतिनोदनमपि प्रहारादिप्रवृत्ते गाढतरशिक्षादानरूपं द्रष्टव्यं, तदुक्तम्–"पम्हुट्ठे सारणा वुत्ता अणायारस्स वारणा। चुक्काणं चोयणा भुज्जो निट्ठुरं पडिचोयणा" ॥ १ ॥ यो हि अन्येषु स्मारणादिकं करोति स्वयं चान्यैः क्रियमाणं न क्षमते नासौ श्राद्ध इति भाव इति गाथार्थः ॥ २० ॥

शुद्धव्यापारोपदेशादिकमुक्त्वा सांप्रतं यादृशं वचनमभिधेयं तादृशमाह—

**सच्चमघट्टियमम्मं सम्मं सइ धम्मकज्जसज्जं च। हियमियमहुरमगव्वं सव्वं भासेज्ज मइपुव्वं ॥ २१ ॥**

व्याख्या–सर्वं वचनं भाषेत इति योगः, कीदृशमित्याह–'सन्तो' जीवादय–स्तेभ्यो हितं सत्यं सत्यभाषावर्गणानि-ष्पन्नं वा सत्यं, येन यदुत्कोचाग्रहणादिकं गुप्ततयैव क्रियते तत् तस्य मर्म, ततश्च 'घट्टितं' चालितं प्रकाशितं मर्म येन तत् तथा, ततोऽन्यदघट्टितमर्म, तथा सम्यग् यथावस्थिताक्षराभिधेयं, तथा 'असकृत्' सर्वदा धर्मकार्य्ये साधुसाधर्मिकवात्स-ल्यादिप्रतिबद्धे सज्जं प्रगुणं तत्साधकमित्यर्थः, 'चः' समुच्चये, तथा हितं सर्वस्यानुकूलं, मितम्–अल्पं, मधुरम्–अपरुषम्, अगर्वं स्वोत्सेकाप्रकाशकं 'सर्वं' समस्तं व्यवहारादिविषयमपि 'भाषेत' जल्पेत् श्रावकः, 'मतिपूर्वमिति' मत्या पूर्वं युक्तायु- ॥ ४१ ॥
क्तत्वेन विमृश्य इति गाथार्थः ॥ २१ ॥

एवं विस्तरतः कृत्यमभिधाय अथ संक्षेपेण सारमभिधातुमन्तरा तत्प्रस्तावनावाक्यं तावदाह ॥ किं बहुनेति भोः श्राद्धाः ! भवतां पुरतः किं प्रयोजनं बहुना प्रभूतेन वक्तव्येन स्वल्पमपि एतत् सारभूतं कर्त्तव्यमित्याह—

जं लोए अपडिकुट्ठं विसिट्ठसिट्ठं जिणागमुद्दिट्ठं । तं सव्वं चिय उचियं ससत्तिसरिसं करिज्ज जओ २२

व्याख्या—यत् कार्यं दयादानादिकं 'लोके' शिष्टजने 'अप्रतिकुष्टम्' अप्रतिषिद्धं, तथा विशिष्टैः सज्जनैरपि शिष्टं धर्माङ्गतया कथितं, तथा 'जिनागमेऽपि' सर्वज्ञप्रवचनेषु 'उद्दिष्टं' कर्त्तव्यतया प्रकाशितं तत्सर्वं, चियशब्दोऽवधारणे तत्सर्वमेव कुर्यात्, ननु तत्र श्रावकप्रतिमाप्रतिपत्त्यादिकमपि श्रूयते अत आह—'उचितं' द्रव्यक्षेत्रकालाद्यपेक्षया श्रावककरणयोग्यं यत्, ननु तथापि सुश्रावकाणां महाव्रतादिकमुचितमेवातः प्राह—'स्वशक्तिसदृशम्' आत्मसामर्थ्यानुसारेण तादृक्कर्मक्षयोपशमानुरूप्येण कुर्यादिति भावः । कुत एवमेतदित्यत आह—'यतो' यस्मात् कारणादिति वक्ष्यमाणगाथासम्बन्धः, तदनेन कायिकोपि शुद्धव्यापार उपदर्शित इति गाथार्थः ॥ २२ ॥

चलइ बलं खलइ मणं जलइ कसायानलो वओ गलइ ।
निच्चं मच्चू परिकलइ दलइ जीयं टलइ कालो ॥ २३ ॥

व्याख्या—यतः कारणात् 'चलति' दिने दिने हीयते 'बलं' शारीरं सामर्थ्यं, तथा 'स्खलति' चिन्तितार्थानुसंधानं प्रति

द्वादश-कुलकम् । ॥ ४२ ॥

विह्वलीभवति मनः-चित्तं, तथा 'ज्वलति' दीप्यते 'कषायानलः' संपरायवैश्वानरः, तथा 'वयः' तारुण्यलक्षणोऽवस्थाविशेषो 'गलति' नश्यति, तथा 'नित्यं' सर्वदा 'मृत्युः परिकलयति' समासन्नीभूय गृह्णाति, ततश्च 'दलति' विशरारु भवति 'जीवनं' जीवः प्राणधारणम्, अयमभिप्रायः-शारीरबलमनःसामर्थ्यक्रोधाद्यभावादयः षड् धर्मकरणहेतवस्ते च दिने दिने मन्दायन्ते इति, 'टलति' अतिक्रामति 'कालो' धर्मविधानसमयः, एते हि षडपि धर्मसाधनात्यन्तोपकारिण-स्ते च सर्वेऽपि अनित्या इति, यथाशक्ति धर्मविधानोपदेश इति गाथार्थः ॥ २३ ॥

चतुर्थं कुलकम् । ४

यत एवं दिने दिने ह्रासः सर्वस्य सुकृतसाधनस्य ततः किं कर्त्तव्यमित्यत आह—

तम्हा खणमवि न खमं विलंबिउं जं च कुसलसामग्गी । सहसत्ति दिट्ठनट्ठा हरिचंदउरि व्व सव्वावि ॥२४॥

व्याख्या-यस्मादेतदेवं 'तस्मात् क्षणमपि' अतिसूक्ष्मकालमात्रमपि परमाणुव्यतिक्रान्तिकाल एकः क्षणो मतः, यावता कालेन परमाणुना परमाणुरतिक्रम्यते स क्षण-स्तमपि आस्तां मुहूर्त्तादिकमित्यपेरर्थः । 'न क्षमं' नैवोचितं 'विलम्बितुं' विक्षेपं कर्त्तुं, ग्रन्थकारोऽतिकारुणिकतया कारणान्तरमपि उपदर्शयन् त्वरयति-'यच्च' यतश्च 'कुशलसामग्री' पुण्यसाधनसमग्रता सद्गुरुसाधर्मिकादिसंसर्गरूपा, 'सहसा' झगिति 'दृष्टनष्टा' दृष्टा सती क्षणेनैव नश्वरी, उपमानमाह 'हरिश्चन्द्रपुरीव' शीतकाले प्रातःक्षणे क्वचित् कदाचित् कस्यापि प्राकारजनसंचारादिदर्शनं लोके हरिश्चन्द्रपुरीति निर्दिश्यते, सा च क्षणमात्रदर्शना-नन्तरमुपरमते इति तया उपमानं सामग्र्याः, 'सर्वापि' समस्तापि इति गाथार्थः ॥ २४ ॥ ॥ ४२ ॥

उपदेशसर्वस्वं सामान्योक्त्याह—

इय नाउमाउयं थेवमेव मज्झं बहुं च धम्मधणं । गुरुलाभमप्पच्छेयं सेयं ति करिज्ज जं जोग्गं ॥२५॥

व्याख्या–'इति' पूर्वोक्तं सर्वानित्यत्वादिकं ज्ञात्वा तथा 'आयुः स्तोकमेव' स्वल्पं साध्यं च कार्यं 'बहु' प्रभूतं, 'धर्मधनं' सुकृतद्रविणं स्वल्पेन बहोरुपार्जनमिति महती वैदग्धी, तेनोक्तं–'गुरुलाभमल्पच्छेदं' च श्रेय इति, यत्र कार्ये क्रियमाणे महान् लाभः स्तोकश्च च्छेदः तदपि श्रेयो, यत्र पुनः सर्वथा छेदो नास्त्येव तत्र किं वक्तव्यम्? तदतिशयेन श्रेयः, इति एतद् ज्ञात्वा 'कुर्याद्' विदध्यात् विवेकी यत् कार्यं 'योग्यम्'–उचितं तद् भवद्भिरपि धर्म एव विधेय इति तात्पर्य्यमिति गाथार्थः ॥२५॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ चतुर्थकुलकविवरणं समाप्तमिति ॥

## अथ पञ्चमं कुलकम् ।

एवं तावत् चतुर्थे कुलके चतुरङ्गकप्राप्तिपुरस्सरं प्रमादादिनिषेधोऽभिहितः पञ्चमे तु आदित एवारभ्य कथं कथं किं किं जीवस्थानकं गुणस्थानकं वा प्राप्नुवन्ति पुण्यैः, अपुण्यैस्तु तदेव–उद्भ्रमन्ति इत्युपदिदर्शयिषुः पूर्वं तावत् सामान्येनैव संसारावस्थानमाह—

इह भवकारागारे गुरुमोहकवाडरुद्धसुहदारे । कालमणंताणंतं वसंति जीवा तमंधारे ॥ १ ॥

द्वादश-
कुलकम् ।
॥ ४३ ॥

व्याख्या–'इह' इति प्रत्यक्षोपलभ्यमानस्वरूपे 'भवः' संसारः स एव नानादुःखावष्टब्धावस्थानत्वात् 'कारागृहं' गुप्तिभवनं तत्र, जीवा वसन्तीति सम्बन्धः, कीदृशे ? इत्याह–'गुरुणा' महता बृहत्स्थितिकेन मोहश्चतुर्थं कर्म स एव समस्तशुभद्वारनिरोधकत्वात् 'कपाटम्'–अररं तेन 'रुद्धं' निषिद्धं शुभद्वारं सुखद्वारं वा यस्य तत् तथा तस्मिन्, कारायां हि द्वारं कपाटेन रुध्यते, अत्र तु शुभं कल्याणं सुखं वा प्रमोद–स्तन्मोहेन निरुध्यते इति भावः, कियन्तं कालं वसन्तीत्यत आह–अनन्तानन्तम्, अनन्तत्वसंख्या हि असंख्यातसंख्यावत् त्रिधा, तथाहि–परीतानन्तकं युक्तानन्तकम्–अनन्तानन्तकं चेति, तदत्रानन्तानन्तकस्य सर्वोत्कृष्टरूपस्य पर्य्यन्तवर्त्तिनो [illegible] ततोऽप्यनन्तकालत्वात्, 'वसन्ति' अवतिष्ठन्ते 'जीवाः' प्राणिन–स्ते चेहासांव्यवहारिका अनन्तकायिकवनस्पतयो गोलकरूपा द्रष्टव्याः, सांव्यवहारिकभावलाभस्य अग्रे वक्ष्यमाणत्वात्, कीदृशे ? इत्याह–'तमो'ऽज्ञानं मिथ्यात्वलक्षणं तदेव सम्यग्दृष्टिनिरोधकत्वात् 'अन्धकारो' ध्वान्तं यत्र तत्रेति गाथार्थः ॥ १ ॥

पञ्चमं
कुलकम् ।
५

अथ सांव्यवहारिकभावलाभं कारणोपदर्शनपूर्वकमाह—

**अह कहवि कम्मपरिणामओ तहाकालपरिणईए य । संववहारियभावं केइ वि पावंति तत्थ वि य ॥२॥**

व्याख्या–अथेति आनन्तर्य्ये असांव्यवहारिकेषु अनन्तानन्तकालावस्थानानन्तरं 'कथमपि' कृच्छ्रेण सांव्यवहारिकभावं प्राप्नुवन्तीति योगः, कुत इत्यत आह–'कथमपि' गिरिसरिदुपलघर्षणघोलनन्यायेन कर्म्मणां ज्ञानावरणादीनां परिणामः तत्तत्कालाद्यपेक्षः परिपाकविशेषस्ततः, तथा तेन विशिष्टाध्यवसायहेतुत्वेन (तुना) प्रकारेण या 'कालपरिणतिः' विशिष्टः ॥ ४३ ॥

कश्चित् काल-स्ततश्च, तेनैतस्मात् कारणद्वयात् संव्यवहरणं संव्यवहारः पृथिवीकायिकत्वादिना प्रकारेण ज्ञानं व्यपदेशश्च संव्यवहारः प्रयोजनमेषाम् इति "इकणि" सांव्यवहारिकास्तद्भावस्तम्। केचिदल्पा मनाक्शुभतरकर्मवशात् 'प्राप्नुवन्ति' लभन्ते, तत्रापि चेति एतत्पदमग्रे योजनीयमिति गाथार्थः ॥ २ ॥

सांव्यवहारिकत्वेऽपि न सुखिन इत्याह—

होउं भूजलतेउवाउसु पुढो अस्सङ्खउस्सप्पिणी, ता णंता उ तरूसु सागरसए वीसं तसत्ते हिए।
गाढारूढपरूढमोहमहिमायत्ता दुहत्ता इमे, जंतू जंति इहासमंजसमहो संसारचक्के चिरं ॥ ३ ॥

व्याख्या—तत्रापि सांव्यवहारिकत्वलाभेऽपि 'भूत्वा' समुत्पद्य 'भूः' पृथिवी 'जलं' तोयं तेजोऽग्निर्वायुर्वात-स्तेषु, एते चत्वारोऽपि एकेन्द्रियप्रत्येकजीवरूपाः स्थावराश्च, ततश्च तेषु प्रत्येकमेकैकस्मिन् पृथिव्यादिनिकाये असंख्याताः संख्याति-क्रान्ता उत्सर्पिण्यः सिद्धान्तप्रसिद्धाः कालविशेषा, एता अवसर्पिणीसंवलिता द्रष्टव्याः, तदभावे तासां केवलानामसंख्यात-त्वाभावात्, सर्वदापि संबद्धत्वेनैव भावात्, तथा ता एव उत्सर्प्पिण्यवसर्पिण्योऽनन्ता अनन्तत्वाख्यासंख्योपेता-स्तुरेव-कारार्थो योजित एव, 'तरुषु' वनस्पतिकायिकेषु तेष्वपि अनन्तकायिकेषु इति द्रष्टव्यम्, प्रत्येकतरुषु अनन्तकालानव-स्थानात्, तथा सागराणां सागरोपमानां शतानि विंशतिः सहस्रद्वयमित्यर्थः, 'त्रसत्वे' द्वित्रिचतुःपञ्चेन्द्रियरूपे तान्यपि पूर्व-कोटिपृथक्त्वेन अधिकानि यान्ति गच्छन्ति भ्राम्यन्तीत्यर्थः, के जन्तवो जीवाः, कीदृशाः? इत्यत आह—'आरूढः' समुत्पन्नः

द्वादश-कुलकम् ।

॥ ४४ ॥

'प्ररूढो' वृद्धिं गतस्ततश्च 'गाढं' तीव्रतरं यथा भवति एवमारूढश्चासौ प्ररूढश्च स चासौ मोहश्चतुर्थं कर्म तस्य 'महिमा' माहात्म्यं तस्य 'आयत्ता' वशवर्त्तिनोऽत एव 'दुःखार्त्ता' जातिप्रत्यय[illegible] 'इमे' एते, इह संसारे असमंजसमिति वचनपथातिक्रान्तायुक्तनीत्या पृथिव्यादिवनस्पत्यादिषु अपि प्रज्वलनप्रचलनाद्यनेकदुःखसद्भावादित्यर्थः, 'अहो' इति संबोधने, क्व भ्राम्यन्तीत्याह–'संसरणं' संसारः स एव पुनः पुनस्त्वरितप्राप्तेः 'चक्रं' प्रसिद्धं कुम्भकारोपकरणविशेषः तत्र 'चिरं' बहुकालम्, अयमभिप्रायो–ऽसांव्यवहारिकेभ्यो व्यावृत्ता अपि उक्तरूपतया भ्राम्यन्तः सर्वदा दुःखिन एवेति शार्दूलविक्रीडितवृत्तार्थः ॥ ३ ॥

पञ्चमं कुलकम् । ५

मानुषत्वादौ सुखित्वं भविष्यतीत्याशंक्य तत्रापि तदभावमाह—

सयलकुसलहेउं माणुसत्तं लहेउं, जणणमरणलक्खे फासमाणा अलक्खे ।
पुण वि गुणियकम्मा होइउं पावकम्मा–तुलभरमनिवारं लिंति तो णंतवारं ॥ ४ ॥

व्याख्या–'सकलकुशलहेतुं' समस्तस्वर्गापवर्गादिकल्याणनिबन्धनं मानुषत्वमपि 'लब्ध्वा' प्राप्य ततोऽपि आयुषः क्षये भ्रष्टा नानाभवेषु जननमरणानां 'लक्षाणि' शतसहस्ररूपाणि 'स्पृशन्तः' पुनः पुनरनुभवन्तो लक्ष्यन्ते इयन्तीति ज्ञायन्ते इति लक्ष्याणि न तथेति अलक्ष्याणि अतिप्रभूतत्वादगणनीयानीत्यर्थः । ततः क्व सुखं ? एवं तावत् सामान्यप्राणिन आश्रित्य सुखाभाव उक्तः, अथ केचिद् विशेषेणाशातनापरा भवन्ति–"तित्थयर–पवयणसुयं आयरियं गणहरं महिड्ढीयं । आसा- ॥ ४४ ॥

यंतो वहुसो अणंतसंसारिओ होइ ॥ १ ॥" त एवं विधाः पुनर्भूयोऽपि 'गुणितकर्माणो' भूत्वा संपद्य गुणितानीव गुणितानि अतिप्रचुरत्वं प्राप्तानि कर्माणि मोहनीयादीनि यैस्ते तथा, कुतः? यतः पापकर्माणस्तीर्थकराद्याशातनादिभिरेव अशुभतर-प्रकृतिबन्धकाः सन्तोऽतुलभरं निरुपमप्राग्भार-मर्थादशुभकर्मणामेव, अथ पापकर्मणामतुलभरः पापकर्मातुलभरः तमिति समस्तं पदं कीदृशमित्याह-'अनिवारं' सर्वथाऽनुभवमन्तरेण निषेद्धुमशक्यं, 'लान्ति' गृह्णन्ति उपार्जयन्तीत्यर्थः, ततो गुणि-तकर्मत्वोपादानानन्तरमनन्तवारमिति प्रसिद्धमेव, गुणितकर्मस्वरूपं चैवं बोद्धव्यं-यो जीवो वादरपृथिवीकायि(क)त्वेन उत्पद्य त्रसकायोत्कृष्टस्थित्या वर्षपूर्वकोटिपृथक्त्वाभ्यधिकद्विसहस्रसागरोपमलक्षणया न्यूनां सप्ततिसागरोपमकोटीकोटिप्रमाणां पुनः पुनः पृथिवीकायिकभवेष्वेव जघन्योत्कृष्टायुरतिवाहनयुतामुत्कृष्टयोगस्थानेषूत्कृष्टकाषायिकस्थानेष्वपि वर्त्तित्वा पर्या-प्तापर्याप्तकतया यथासंख्यं बहुषु स्तोकेषु च भवेषु परिभ्रम्य ततो निर्गच्छति, इह च शेषैकेन्द्रियापेक्षया वादरपृथिवी-कायस्य प्रभूतकर्मपुद्गलोपादानं भवति, तथास्वाभाव्यात्, तेनात्र ग्रहणं, निर्गत्य च वादरपृथिवीकायिकेभ्यस्त्रसेष्वपि द्वीन्द्रियत्रीन्द्रियादिष्वेवमेव जघन्योत्कृष्टायुःसम्बन्धेन अत्युत्कृष्टयोगस्थानकषायस्थानेष्वपि पूर्ववत् परिभ्रम्य परिभ्राम्य (भ्रम्यत) तच्च त्रसेषु यावतो वारान् सप्तमनरकपृथिवीगमनयोग्यता भवति तावतो वारान् तासु गच्छति, एवं सर्वत्र वादरत्रसकायिकेष्वपि प्रभूतं कालं पर्यटति, तदुक्तम्-"जो वायरतसकालेणूणं कम्मट्ठिइं तु पुढवीए। वायरपज्जत्तापज्जत्त-गदीहेयरद्धासु ॥ १ ॥ जोगकसा उक्कस्सो वहुसो निच्चमवि आउवंधं च ॥" इति संक्षेपतो गुणितकर्मजीवस्वरूपं वोद्धव्यं, विस्तरस्तु कर्मप्रकृतिसूत्राद् वृत्तेश्चावधारणीयमिति गाथार्थः ॥ ४ ॥

द्वादश-कुलकम् । ॥ ४५ ॥

पञ्चमं कुलकम् । ५

केचित्तु लघुकर्माणः सम्यक्त्वमपि आसादयन्ति, तत्र को विधिरित्येतत् गाथापञ्चकेनाह—

अह गिरिसरिउवलमाइनायओ अहपवत्तकरणेण । चउगइगया वि बहुतमकालेण विसुद्धतरभावा ५
एगूणवीसमेगूणतीसमेगूणसत्तरिं कमसो । वीसगतीसगमोहाणं सलिलनिहिकोडिकोडी उ ॥ ६ ॥
खविय ठिइसंतमेगा देसूणा धरइ जाव ता गंठिं । पाविय केइ वलंति वि अन्ने उ अपुव्वकरणेण ७
घणकम्मपरिणइमयं भिंदिय चिररूढगूढदढगंठिं । मिच्छत्तंतरकरणं काउं अनियट्टिकरणेण ॥ ८॥
तो भवसागरतरणे तरीसमं असमसोक्खमोक्खकरं । पावंतुवसमसम्मं जीवा अंतोमुहुत्तद्धा ॥ ९ ॥

व्याख्या—एतच्च कर्मणामुत्कृष्टस्थितौ क्षपितायां करणैर्ग्रन्थिभेदे च सति अवाप्यते, तत्स्वरूपं चैवं—"मोहे कोडाकोडी-उ सत्तरिं वीस नामगोयाणं । तीसिं यराणं चउण्हं तेत्तीसयराइं आउस्स ॥ १ ॥ करणं अहापवत्तं अपुव्वमनियट्टि चेव भव्वाणं । इयरेसिं पढमं चिय भन्नइ करणं ति परिणामो ॥ १ ॥ जा गंठी ता पढमं गंठिं समइच्छओ भवे बीयं । अनियट्टी-करणं पुण समत्तपुरक्खडे जीवे ॥ २ ॥ गंठि त्ति सुदुब्भेओ कक्खडघणरूढगूढगंठिव्व । जीवस्स कम्मजणिओ घणरागदो- ॥ ४५ ॥

१ चतुर्णां ज्ञानवरणीय १ दर्शनावरणीय २ वेदनीया ३ न्तरायाणां ४ त्रिंशत्कोटाकोट्यः । २ करणमिति कोऽर्थः ? जीवस्य परिणाम एव करणमिति, तत् त्रिधा भिन्नभिन्नस्वभावत्वात्, भव्यानां त्रिविधं भवति, अभव्यानां प्रथममेकमेव स्वभावविशेषत्वात् ।

सपरिणामो ॥ ३ ॥ एवं च स्थिते अथेति पूर्वोक्तयुक्त्याऽनन्तसंसारपरिभ्रमणानन्तरं, गिरिसरितः पर्वतनद्या अतिवेगवाहिन्याः पाषाणौघनिचितायाः कश्चिदुपलस्त्रिकोणादिरूपः स च तत्र पाषाणान्तरैर्घृष्यमाणः कथंचिद् वृत्तत्वं कोमलत्वं च यथा लभते, एवमनन्तसंसारे शीतवातादिभिर्नारकादिवेदनाभिश्चाकामनारूपैश्च यत् कर्मनिर्जरणामेष गिरिसरिदुपलन्यायो दृष्टान्तः ततः, आदिशब्दात् पल्लकादिदृष्टान्तग्रहः, तत्रानाभोगनिर्वर्त्तितेन यथाप्रवृत्तकरणेनेति, यथा येन प्रकारेण अनादौ संसारे प्रवृत्तं कर्मक्षपणाय सव्यापारमभूत् तच्च तत्करणं चाध्यवसायविशेष–स्तेन, विशुद्धतरभावाः शुभतरपरिणामभाजो भवन्ति, कीदृशाः सन्तः? 'चतुर्गतिगता अपि' अनेन चतसृष्वपि गतिषु सम्यक्त्वावाप्तियोग्यता दर्शिता, अथवा चतसृष्वपि गतिषु गिरिसरिदुपलन्यायेन दुःखमनुभवन्त इति 'बहुतमकालेन' प्रभूतपुद्गलपरावर्त्तानन्तरमन्तिमपुद्गलपरावर्त्ते विशुद्धतरभावाः सन्तः ॥ ५ ॥ यथासंभवं विंशतिः सागरोपमकोटीकोट्यः स्थितिर्ययोः कर्मणो–र्नामगोत्रयोस्ते विंशके, एवं त्रिंशत्सागरोपमकोटाकोट्यः स्थितिर्येषां ज्ञानदर्शनावरणान्तरायवेदनीयानां तानि त्रिंशकानि, मोहश्च सप्ततिसागरोपमकोटीकोटीप्रमाणो भिन्न एव, ततश्च क्रमशो यथासंख्यं विंशकयोरेकोनविंशतिं त्रिंशकानां च चतुर्णामेकोनत्रिंशतं, मोहस्य तु एकोनसप्ततिं, ततो द्वन्द्वः, 'सलिलनिधयः' सागरास्तेषां कोटीकोटीः क्षपयित्वा इत्यग्रेतनगाथापदेन योगः ॥६॥ 'ठिइसंतमिति', प्राकृतत्वात् सत्ता स्थिता यावदेका सागरोपमकोटीकोटिः सापि पल्योपमासंख्येयभागेन न्यूना भ्रियते इति कर्तरि प्रयोगोऽवतिष्ठते, एतत्पर्य्यन्तं सर्वं प्रथमकरणकार्यं, ता इति तावत्, तत्रान्तरे ग्रन्थिं वक्ष्यमाणरूपं प्राप्य केचिद् मन्दपुण्याः वलन्तेऽपि व्यावर्त्तन्तेऽर्थात् शुभतराध्यवसायात्, न ततः शुभतरोऽध्यवसायः प्रवर्द्धतेऽपि तु मन्दा-

द्वादश-कुलकम् । ॥ ४६ ॥

पञ्चमं कुलकम् । ५

यते, 'अन्ये तु' अपरे पुनः केचित् सुकृतकर्माणः, अपूर्वमनादौ संसारे कदाचिदपि एतावन्तं कालमनुत्पन्नमीदृश(शं)करणमध्यवसायविशेषमासाद्य तेन ॥ ७ ॥ 'घनानि' निविडानि बन्धनविशेषाद्यानि कर्माणि ज्ञानावरणादीनि तेषां 'परिणतिः' परिपाक-स्तथाविधमहासंक्लिष्टाध्यवसायरूपग्रन्थिलक्षणकार्यनिष्पादकः तया निर्वृत्तो घनकर्मपरिणतिमय-स्तं चिररूढगूढदृढदवरकादिग्रन्थिस्तत्र 'चिरं' बहुकालं रूढ उत्पन्नः स्तोककालोद्भवो हि सुमोचः स्यात्, तत्रापि गूढोऽलक्ष्यरूपतया कृतोऽस्ति दृढोऽत्यन्तनिविड एवंविधो हि ग्रन्थिः प्रायो दुर्मोच एव भवतीति एतदर्थख्यापनार्थानि बहूनि विशेषणानि, ततश्चैवंविधग्रन्थितुल्यत्वात् चिररूढगूढदृढग्रन्थिः तं 'भित्त्वा' विदार्य, अत्र च यद्यपि ग्रन्थेः कर्ममयत्वं सामान्येनैवोक्तं, तथापि घातिकर्ममयत्वं बोद्धव्यं, तथा चोच्यते-"स ज्ञानदर्शनावरणकारणो मोहनीयसंजनितः । विततान्तरायहेतु-र्ग्रन्थि-रयं दुर्भिदो भवति ॥ १ ॥" एनं च ग्रन्थिप्रदेशं यावदभव्या अपि आयान्ति अनेकशः तत्र चागतानां देशविरतिसर्वविरतिलाभो द्रव्यतोऽपि भवति, एतद् द्वितीयकरणकार्य, ग्रन्थिभेदानन्तरं च मिथ्यात्वमोहनीयकर्मस्थिते-रन्तर्मुहूर्त्तमुदयक्षणादुपर्य्यतिक्रम्यापूर्वकरणानिवृत्तिकरणलक्षणविशुद्धिजनितसामर्थ्योऽन्तर्मुहूर्त्तकालप्रमाणं तत्प्रदेशवेद्यदलिकाभावरूपमन्तरकरणं करोति, तदुक्तं सूत्रकृता-मिथ्यात्वस्य मिथ्यात्वमोहनीयस्थितेरन्तरकरणं द्विखण्डतारूपं कृत्वाऽनिवृत्तिकरणेन विशुद्धतरेण तृतीयकरणेन, एतस्मिंश्चान्तरकरणे कृते तस्य मिथ्यात्वमोहनीयस्य कर्मणः स्थितिद्वयं भवति, अन्तरकरणादधस्तनी प्रथमस्थिति-रन्तर्मुहूर्त्तमात्रा, तस्मादेवोपरितनी शेषा द्वितीया स्थितिरिति, स्थापना चेयं, तत्र प्रथमस्थितौ मिथ्यात्वदलिकवेदनादसौ मिथ्यादृष्टिरेव, अन्तर्मुहूर्त्तेन पुनस्तस्यामपगतायामन्तरकरणप्रथमसमये ॥ ४६ ॥

एवौपशमिकं सम्यक्त्वमाप्नोति मिथ्यात्वदलिकवेदनाभावाद्, यथाहि–वनदावानलः पूर्वदग्धेन्धनमूषरं वा देशमवाप्य विध्यायति तथा मिथ्यात्ववेदनाग्नि–रन्तरकरणमवाप्य विध्यायति शून्यान्तरालप्राप्तौ, तदुक्तं श्रावकप्रज्ञप्तौ—"ऊसरदेसं दड्ढिल्लयं व विज्झायइ वणदवो पप्प। इय मिच्छस्स अणुदए उवसमसम्मं लहइ जीवो ॥ १ ॥" ॥ ८ ॥ ततोऽन्तरकरणानन्तरं तेनैवानिवृत्तिकरणेन समुल्लसितप्रचुरतरदुर्निवारवीर्यप्रसरा औपशमिकसम्यक्त्वं प्राप्नुवन्ति जीवा इति योगः, कीदृशमित्याह–'भवसागरतरणे' संसारसमुद्रपारगमने 'तरीसमं' द्रोणीकल्पं, तथा 'असमसौख्यमोक्षकरं' निरुपमानन्दनिर्वृतिविधायि, अवश्यमेतस्मिन्नेकदाऽपि लब्धे पुनः कथंचित् प्रतिपतितेऽपि अपार्द्धपुद्गलावर्त्तमध्ये एव मोक्षप्राप्तेः, 'प्राप्नुवन्ति' लभन्ते, उपशमेन मिथ्यात्वोदयविष्कम्भणलक्षणेन निर्वृत्तमौपशमिकं केवलविशुद्धभावरूपं न तु क्षायोपशमिकवत् विशुद्धमिथ्यात्वदलिकमयं, कियन्तं कालमित्याह–अन्तर्मुहूर्त्ताद्धा अद्धा कालः ततोऽन्तर्मुहूर्त्तप्रमाणमिति गाथापञ्चकार्थः ॥ ९ ॥

एवं कृच्छ्रेण प्राप्तमपि सम्यक्त्वं केचिद् वमन्तीत्याह—

**पुण केइ कम्मपरिणइवसेण अइसुंदरं पि सम्मत्तं। संपत्तं पि अजोग्गा चिंतामणिमिव विमुंचन्ति १०**

व्याख्या–एवं कृच्छ्रसंप्राप्तमपि सम्यक्त्वं पुनर्भूयोऽपि केचिद् अयोग्या अपुण्याः, कुतो वमन्तीत्याह–'कर्मपरिणतिवशेन' अतितीव्रकषायादिपरिपाकायत्तत्वेन, 'अतिसुन्दरमपि' समस्तार्थप्रसाधकत्वेन कल्पतरोरपि मनोज्ञं, 'चिन्तामणिमिव' इत्युपमानं, यथा अत्यन्तदुरापमपि चिन्तारत्नं कुतोऽपि देवताप्रसादादिना लब्धमपि निःपुण्यास्त्यजन्ति, तद्वदिदमपि विमुञ्च-

न्तीति, अयमभिप्रायः—आन्तर्मु(र्मौ)हूर्त्तिक्यामौपशमिकाद्धायां परमनिधिलाभकल्पायां जघन्येन समयशेषायामुत्कृष्टतः षडावलिकाशेषायां कस्यचिन्महाविभीषिकोत्थानकल्पोऽनन्तानुबन्ध्युदयो भवति, तदुदये चासौ सास्वादनसम्यग्दृष्टिगुणस्थानके वर्त्तते, उपशमश्रेणिप्रतिपतितो वा कश्चित् सास्वादनत्वं यातीति, तदुक्तम्—“उवसमसम्मत्ताउ चयउ मिच्छं अपावमाणस्स । सासायणसम्मत्तं तदंतरालंमि छावलियं ॥ १ ॥” सास्वादनोत्तरकालं चावश्यं मिथ्यात्वोदयाद् मिथ्यादृष्टि-र्भवतीति गाथार्थः ॥ १० ॥

ततः किमित्याह—

**मिच्छत्तुक्कोसठिइं पि बंधिउं अह पुणो परिभमंति । जीवा बहुकालमहो दुरंतसंसारकंतारे ॥ ११ ॥**

व्याख्या—मिथ्यात्वमोहनीयस्योत्कृष्टस्थितिं सप्ततिसागरोपमकोटीकोटिरूपां, बद्ध्वा निकाचनादिगाढबन्धेन संयम्य, अपिर्विस्मये, आस्तां जघन्यमध्यमस्थिती इत्यपेरर्थः, यो हि तथाशुभतराध्यवसायेन किंचिन्न्यूनसागरोपमकोटीकोटिप्रमाणां कृतवान् स कथमुत्कृष्टां बध्नाति ? इति विस्मयः । अथेति प्रतिपतनानन्तरं पुनर्भूयोऽपि परिभ्राम्यन्ति जीवा बहुकालम्—संख्यातोपसर्पिण्यादिरूपम्, ‘अहो’ इति सम्बोधने ‘दुरन्तसंसारकान्तारे’ दुःखावसानभवारण्ये, अयमभिसन्धिः—उत्कृष्टा हि स्थितिर्ग्रन्थिभेदादर्वागेव बध्यते, तद्भेदे तु न पुनर्ग्रन्थिबन्धस्तदभावे तु नोत्कृष्टस्थितिबन्ध इति कार्मग्रन्थिकाः, तथा चोच्यते—“सम्मद्दिट्ठीणं पि हु गंट्ठिं न कयावि बोलए बंधो । मिच्छादिट्ठीणं पुण उक्कोसो सुत्तभणिओ उ ॥ १ ॥” आग-

मिकास्तु तद्भेदेऽपि उत्कृष्टस्थितिबन्धं मन्यन्त इति तदभिप्रायेणेदं बोद्धव्यम् । एवं च मनुष्यत्वेऽपि सम्यक्त्वप्राप्तावपि क्व सुखं जीवानामिति भाव इति गाथार्थः ॥ ११ ॥

केचिदित्थं भ्रान्त्वा पुनर्मनुष्यत्वे धर्मबुद्धौ सत्यामपि संसारसमुद्रे पर्य्यटन्तीत्याह—

तो माणुसत्तममलंमि कुले सुखित्ते, सव्वंगचंगमरुजं चिरजीवियं च ।
भूयो रहट्टघडिमालतुलाइ लद्धुं, बुद्धिं सुधम्मसवणम्मि कुणंतयावि ॥ १२ ॥

व्याख्या–'ततः' संसारकान्तारभ्रमणानन्तरं मानुषत्वं 'नरत्वम्' अमले निर्मले कुले सुक्षेत्रे भारतादौ, कीदृशं मानुषत्वमित्याह–'सर्वाङ्गचङ्गं' निरुपहतसमस्तहस्तपादनेत्रश्रोत्राद्यवयवमनोज्ञम्, 'अरुजं' नीरोगं, चिरजीवितं च प्रसिद्धं, भूयः पुनरपि 'अरघट्टे' जलयन्त्रे घटिमाला तया तुला साम्यं तया, यथा घटिमाला पुनरूर्ध्वं पुनरधस्तात् याति, तथा जीवा अपि उच्चनीचगतिषु 'लब्ध्वा' प्राप्य, तथा 'बुद्धिं' मतिं 'सुधर्मश्रवणे' शुद्धविधिमार्गाकर्णने कुर्वाणा अपीति वसन्ततिलकावृत्तार्थः ॥१२॥

एवं भगवान् करुणयोपदेशमात्रप्रवृत्तोऽपि स्वाभाविकपाण्डित्यैकमयत्वेन क्वचिच्छन्दोवैचित्र्येण क्वचिदलंकारवैचित्र्येण क्वचिद् भाषावैचित्र्येण चोपदिशतीत्यत्र भाषावैचित्र्येण तावत् संसारसमुद्रस्वरूपमाह—

गुरुरोगजालसलिले बहुसंभवमरणलोलकल्लोले । दारुणरागोरगभयकरे जरावद्धडिंडीरे ॥ १३ ॥

व्याख्या–इहापारसंसारसागरे जीवा हिंडन्त इतियोगः, कीदृशे इत्याह–'गुरुरोगजालसलिले' अतिप्रचुरत्वात् कुष्ठादि-

द्वादश-कुलकम् । ॥ ४८ ॥

महाव्याधिवृन्दमेव सलिलं यत्र, तथा संभवा जन्मानि मरणानि मृत्यव-स्तानि च बहूनि संभवमरणानि एव पुनःपुनरुद्भवनाल्लोलकल्लोलाश्चटुलवीचयो यत्र, तथा रागोऽभिष्वङ्ग [illegible] 'दारुणो' रौद्रो यो रागः स एव महामोहाद्युत्पादकत्वाद् 'उरगः' सर्प-स्तेन 'भयकरे' त्रासोत्पादके, तथा 'जरा' केशशौक्ल्याद्यभिव्यंग्योऽवस्थाविशेषः, सा एव शुक्लत्वसाम्याद् 'बद्धः' संबद्धः प्रबद्धो वा नैरन्तर्यावस्थायी 'डिण्डीरो'ऽब्धिफेनो यत्र स तथा तत्रेति गाथार्थः ॥१३॥

तथा—

इच्छायत्तनिरंतरचिंतारयबलविलोलजन्तुगणे । उद्दामकामवाडवरुद्धे गंभीरमोहतल्ले ॥ १४ ॥

व्याख्या–इच्छाऽभिलाषः तदायत्ता तद्वशोत्पन्ना सा चासौ निरन्तरचिन्ता च अनवरतवस्त्वनुध्यानं च तस्या अनेकस्या अतिशीघ्रभावित्वाद् 'रयो' वेगस्तस्य 'बलं' बहुत्वात् सैन्यं सामर्थ्यं वा तेन 'विलोलः' स्त्रीधनादिलिप्सया इतस्ततः पर्य्यटनशीलो 'जन्तुगणः' पुरुषादिप्राणिवर्गो यत्र, समुद्रपक्षे तु जन्तुगणो मत्स्यादिरूपः, तथा 'उद्दाम' उद्भटोऽत्युद्दीप्तः काम एव दाहकत्वसाम्याद् 'वाडवो' वडवानल-स्तेन 'रुद्धे' व्याप्ते, तथा 'गम्भीरमतिनिम्नं' बहुस्थितिकत्वादप्राप्य पर्य्यन्तं मोहश्चतुर्थं कर्म स एव तलमधो भागो यस्य स तथा, तत्रेति गाथार्थः ॥ १४ ॥

तथा—

असमभयहासकेलीकलहाहंकारचलतिमिसमूहे । चिररूढगूढमायाजलनीलीविसरसंछन्ने ॥ १५ ॥

पञ्चमं कुलकम् । ५ ॥ ४८ ॥

व्याख्या–'भयं' त्रासो 'हासो' हसनं, 'केल्यो' नानाप्रकाराः क्रीडाः, 'कलहो' वाग्युद्धमहंकारो मानः–ततो भयं च हासश्चेत्यादि द्वन्द्वः–ततोऽसमा निरुपमास्ते च ते भयहासादयश्चेति कर्मधारयः–ततोऽसमभयहासकेलीकलहाहङ्कारा एव चलाश्चञ्चलाः क्षणमात्रावस्थायिनस्तिमिसमूहा मत्स्यविशेषकदम्बकानि यत्र, 'चिरं' बहुकालं 'रूढा' समुत्पन्ना, 'गूढा' अलक्ष्यस्वरूपा 'माया' परवञ्चनेच्छा, ततश्च चिररूढा चासौ गूढा चासौ माया चेति कर्मधारयः, सा एव सरलतासरसीसमाच्छादकत्वाद् 'जलनीली' शैवलः–तस्या अतिबहुत्वाद् 'विसरः' समूहस्तेन संच्छन्ने सर्वतोऽतिव्याप्ते इति गाथार्थः ॥ १५ ॥

इह हिंडंते जीवा अपारसंसारसागरे घोरे । सुगुरुचरणारविंदं विंदंति न तारणतरंडं ॥ १६ ॥

व्याख्या–'इह' एतस्मिन्नुपदर्शितस्वरूपे 'अपारसंसारसागरे' अप्राप्तपर्य्यन्तभवसमुद्रे, 'घोरे' रौद्रे 'हिण्डन्ते' पर्य्यटन्ति, 'जीवाः' प्राणिनो नरादयः, ननु सुधर्मश्रवणकृतमतयोऽपि किं कुर्वन्ति ते येन तं न तरन्ति ? इत्याह–'सुगुरुचरणारविन्दं' प्रसिद्धं 'विन्दन्ति' लभन्ते 'न' नैव तारणे संसारसमुद्रपारप्रापणे 'तरण्डं' लघुयानपात्रं, बुद्धौ सत्यामपि सुगुरुः दुःप्रापः–तमन्तरेण च कुतः श्रुतिः–तदनुष्ठानं च, ततः कथं पारगमनमिति भावः ॥ १६ ॥

अस्तु तावद् यत्सद्गुरुप्राप्तिर्न भवति, प्रत्युतान्तरालेऽन्यदपि संपद्यते इत्यर्थाभिव्यक्त्यर्थम् अवान्तरवाक्यार्थमाह–किंत्विति, प्रत्युत इत्यर्थः, पाखण्डिसंपर्कादन्यदेव अन्तरालेऽपि तेषां संपद्यते इत्याह—

वारं वारं कुणयसयसंमोहसंदोहवेलागाढालीढा मरणलहरीसंकुले भूरिकालं ।

द्वादश-कुलकम् ।

पञ्चमं कुलकम् । ५

मायागोला इव कुगुरुसंबंधसंदेहदोलारूढा मूढा भवजलभरे बद्धवेगं सरंति ॥ १७ ॥

॥ ४९ ॥ व्याख्या–धर्मश्रवणवाञ्छयापि तैः पाखण्डिभिः संघटितास्तत्र च 'वारं वारं' पुनः पुनः कुनया अनेकधर्मात्मके वस्तुनि नित्यत्वाद्येकधर्मग्राहकानित्यत्वादीतरधर्मप्रतिक्षेपका नित्य एवात्मा इत्यादिका अभिप्रायविशेषास्तैर्निर्वृत्तः 'कुनयमयो' यः संमोहो महामिथ्यात्वलक्षणो विपर्य्ययः तस्य बाहुल्यात् 'संदोहः' समूहः, स एव 'वेला' निमज्जनहेतुजलवृद्धिलक्षणा, तया गाढमत्यन्तमालीढाः श्लिष्टाः सन्तो भवजलभरे [सं]सरन्तीति सम्बन्धः, कीदृशे ? मरणान्येव पुनः पुनरुद्भवनाद् 'लहर्यः' कल्लोलाः ताभिः संकुले व्याप्ते, भूरिकालम्–असंख्यातोत्सर्पिण्यादिलक्षणं, 'मायागोला' इवेत्युपमानं, तत्र माया असद्वस्तूपदर्शनं तया गोला इति लाक्षागोलकाकारसंचरणविशेषाः, यथा हि कश्चिदिन्द्रजालिकादिः हस्तलाघवेन मन्त्रादिना वा गोलकान् निरन्तरं संचारयति, तथा जीवा अपि संचरन्तीति योज्यं, 'कुगुरवो' ज्ञानादिविकला उत्सूत्रभाषिप्रभृतयः तैः सह सम्बन्धः संपर्कः–तेन तत्संभाषणविपरीतप्ररूपणादिना ये संदेहास्तत्त्वसंशयाः त एवानवस्थितचित्तरूपतया दोलाः प्रेंखा इव दोलाः–तत्रारूढास्तदध्यासनपराः, अत एव 'मूढा' महामोहग्रस्ताः, कुत्र [सं]सरन्तीत्याह–'भवः' संसारः स एव ब्रोडनस्वभावत्वाद् 'जलभरः' सलिलप्राग्भारः तत्र, बद्धवेगं प्रबन्धप्रवृत्तशीघ्रत्वं यथा भवत्येवं, सरन्ति गतेर्गत्यन्तरं प्राप्नुवन्ति, अयमभिसन्धिः केचित् तावद् सुधर्मशुश्रूषवोऽपि पाखण्डिपाशानेव गुरूनासादयन्ति, ततस्तदुपदेशादिना संसारम् इतरे तु कुगुरून् गुरुत्वेनासादयन्ति, तेऽपि निश्चयार्थिनोऽपि संदेहशतग्रस्ताः पुनः पुन–र्भ्राम्यन्ति, ततोऽपि कुतः सुखमिति भाव इति गाथार्थः ॥ १७ ॥ ॥ ४९ ॥

पञ्चेति पञ्चसंख्यानि गाथावृत्तानि प्राकृतेन भाषाविशेषेण समानि तुल्यानि समसंस्कृतानीत्यर्थः, इति अवान्तरवाक्यार्थः ॥ सुगुरुलाभे तद् भविष्यतीत्याशंक्य तत्रापि तदभावमाह—

सुगुरुमवि लहिय कह कहवि तुडिवसा सुणिय मुणिय तव्वयणं। मिच्छत्तासत्तोदग्गकुग्गहा तं न मन्नंति १८

व्याख्या—'सुगुरुमपि' प्रसिद्धस्वरूपं लब्ध्वा, 'कथं कथमपि' कृच्छ्रेण 'तुटिवशाद्' दैववशात् 'तद्वचः' सुगुरुवचनं 'श्रुत्वा' ज्ञात्वा च, तद्वचनं 'न मन्यन्ते' नैव श्रद्दधते, कीदृशाः सन्त इत्याह—'मिथ्यात्वासक्ता' मोहनीयमूलप्रकृतिविशेषाश्लिष्टा अत एवोदग्रकुग्रहा उद्भटकदभिनिवेशाः—ततो मिथ्यात्वासक्ताश्चेत्यादि कर्मधारयः, अथवा मिथ्यात्वेनासक्ता उदग्रकुग्रहा येषामिति बहुव्रीहिः, ततः सम्यक्त्वाभावे क्व सुखमिति भाव इति गाथार्थः ॥ १८ ॥

सम्यक्त्वे सति तद्भविष्यतीत्येतदपि नेत्याह—

अह सद्दहंति वि तयावरणखओवसमजोगओ कहवि। चरणावरणाओ न संजमुज्जमं तहवि कुव्वंति ॥१९॥

व्याख्या—'अथ' इति आरम्भे श्रद्दधतेऽपि सुगुरुवचनं केचित्, कुत इत्याह—तस्य सम्यक्त्वस्य आवरणम् आच्छादनं मिथ्यात्वानन्तानुबन्धिकषायादिकं तस्य 'क्षयः' सर्वथा ध्वंसः, उपशमो विष्कम्भितोदयत्वं, ततश्च उदयप्राप्तस्य क्षयोऽनुदितस्य चोपशमः, ततस्तदावरणस्य क्षयोपशमस्तदावरणक्षयोपशमः—तद्योगात् तत्सम्बन्धात्, कथमपि कृच्छ्रेण श्रद्दधत इति सम्यक्त्वं लभन्त इति भावः। तच्च पूर्वस्मादौपशमिकाद् विलक्षणं क्षायोपशमिकमित्युच्यते, तदुक्तम्—"मिच्छत्तं जं उइन्नं तं

द्वादश-कुलकम् । ॥ ५० ॥

खीणं सेसयं तु उवसंतं । मीसीभावपरिणयं वेइज्जं तं खओवसमं" ॥१॥ यद्यप्येवं सम्यक्त्वलाभः संवृत्तस्तथापि न तावन्मात्रसाध्यं शिवसुखमित्याह–'चरणं' चारित्रं सर्वविरतिः तस्यावरणं प्रत्याख्यानावरणसंज्ञिततृतीयकषायोदयस्ततः, 'संयमोद्यमं' सर्वविरतिग्रहणप्रयत्नं, तथापि सम्यक्त्वे सत्यपि न कुर्वन्ति, तत्कथमभीप्सितशिवसुखलाभ इति भाव इति गाथार्थः ॥१९॥

चारित्रप्राप्तौ भविष्यतीति चेन्नैतदपीत्याह–

अह पुन्नपुंजजोगेण चरणभारं पवज्जिउं केइ। पुण वि पमायसहाया परिवडिय भवे भमंति जओ ॥२०॥

व्याख्या–'अथ' इति उपक्रमे 'पुण्यपुंजयोगेन' प्रभूततरसुकृतोदयेन, 'चरणभारं' सर्वविरतिप्राग्भारं, 'प्रपद्यापि' अङ्गीकृत्यापि, आस्तामप्रतिपत्तौ, केचिदत्यन्तापुण्याः पुनर्भूयोऽपि, प्रमादसहाया विषयकषायाद्युदयभाजः, प्रतिपत्य सर्वविरतिभावात् प्रभ्रश्य 'भवे' भ्राम्यन्ति, कुत एतत् सिद्धमित्यत आह–यतो यस्मात् कारणात् सिद्धान्ते इदमभिहितमिति शेष इति गाथार्थः ॥२०॥

यदुक्तं तदाह–

आहारगा वि मणनाणिणो वि सव्वोवसंतमोहा वि। हुंति पमायपरवसा तयणंतरमेव चउगइया ॥ २१ ॥

पञ्चमं कुलकम् । ५

व्याख्या–चतुर्दशपूर्वविदोऽपि केचिदेव तथाविधगाढसंशयापनोदादिकार्योत्पत्तौ विशिष्टलब्धिवशा–दाह्रियते निर्वर्त्यते इत्याहारकं शरीरं सूक्ष्मतरपुद्गलनिष्पन्नं हस्तमात्रप्रमाण पर्वतादिनापि अनभिहतं, तद्योगाच्च चतुर्दशपूर्वविदोऽपि आहारकाः तेऽपि । तथा संज्ञिभिर्जीवैः काययोगेन मनोवर्गणाभ्यो गृहीत्वा मनोयोगेन मनस्त्वेन परिणमय्यालम्ब्यमानानि ॥ ५० ॥

द्रव्याणि मनांसीत्युच्यन्ते, तेषां मनसां पर्य्यायाश्चिन्तनानुगुणपरिणामाः–तेषु ज्ञानं मनःपर्य्यायज्ञानं, तच्च द्विधा ऋजुमति विपुलमति चेति, तत्र ऋज्वी अल्पतरविशेषविषयतया मुग्धा मतिर्यस्य तत्तथा, तथा विपुला बहुतरविशेषविषयतया पट्वी मतिर्यस्य तत्तथा, तत्र ऋजुमतेः पञ्चचत्वारिंशद्योजनलक्षप्रमाणोऽर्धतृतीयाङ्गुलहीनो मनुष्यलोकः क्षेत्रतो विषयो, विपुलमतेस्तु स एव संपूर्णो निर्मलतरश्च, कालतस्तु एतावति क्षेत्रे भूतभाविनोः पल्योपमासंख्येयभागयो–रतीतानागतानि संज्ञिमनोरूपाणि मूर्त्तद्रव्याणीति, मनःपर्य्यायज्ञानिनोऽपि भीमो भीमसेन इतिवदेकदेशरूपेण मनोज्ञानिन इत्युक्तास्तेऽपि, तथा सर्वः समस्तो अष्टाविंशतिप्रकृतिरूपोऽप्युपशान्तः सर्वथा कार्यकरणाक्षमः संपन्नो मोहो येषां ते तथा तेऽपि, तदुपशमविधिश्चैवं–चत्वारोऽनन्तानुबन्धिनो मिथ्यात्वमिश्रसम्यक्त्वानि च त्रीण्येवं सप्तप्रकृतीनामेते अविरतदेशविरतप्रमत्ताप्रमत्ता यथायोगमुपशमकाः, अपूर्वकरणस्तु नोपशमकः, किन्तु तद्योग्य एव, अनिवृत्तिकरणे च शेषैकविंशतिमोहनीयप्रकृतीनामन्तरकरणं कृत्वा ततो नपुंसकवेदमुपशमयति, तस्मिन्नुपशान्तेऽष्टौ, तत उक्तप्रकारेणान्तर्मुहूर्त्तेन स्त्रीवेदमुपशमयति, ततो नव, ततोऽन्तर्मुहूर्त्तेन कालेन हास्यादिषट्कमुपशमयति, तस्मिन्नुपशान्ते पञ्चदश, हास्यादिषट्कोपशमनानन्तरं समयोनावलिकाद्विकमात्रेण कालेन पुरुषवेदं सकलमपि उपशमयति, तस्मिन्नुपशान्ते षोडश, ततोऽनन्तरमप्रत्याख्यानप्रत्याख्यानावरणक्रोधावुपशमयति, तयोरुपशान्तयोरष्टादश, ततः समयोनावलिकाद्विकेन कालेन संज्वलनक्रोधमुपशमयति तस्मिन्नुपशमिते एकोनविंशतिः, ततोऽनन्तरमप्रत्याख्यानप्रत्याख्यानावरणौ च मानौ उपशान्तौ, तदुपशान्तौ चैकविंशतिः, ततः समयोनावलिकाद्विकेन कालेन संज्वलनमाने उपशमिते द्वाविंशतिरुपशमिता भवन्ति, ततोऽप्रत्याख्यानप्रत्याख्यानावरणे

द्वादश-कुलकम् । ॥ ५१ ॥

च माये उपशान्ते, ततश्चतुर्विंशतिः, ततः समयोनावलिकाद्विकेन कालेन संज्वलनमाया उपशान्ता, ततः पञ्चविंशतिः, किट्टिकरणाद्धायाश्चरमसमये युगपदप्रत्याख्यानप्रत्याख्यानावरणलोभौ उपशान्तौ भवतः, तथा चाह–"सत्त ट्ठ नव य पणरस सोलस अट्ठारसे व इगुवीसा । एगाहि दुचउवीसा पणवीसा वायरे जाण ॥ १ ॥" तदुपशान्तौ च सप्तविंशतिकर्म्माणि उपशान्तानि भवन्ति, तानि च सूक्ष्मसंपराये प्राप्यन्ते, आह च–"सत्तावीसं सुहुमे अट्ठावीसं च मोहपयडीओ । उवसंतवीयरागे उवसंता हुंति नायव्वा ॥ १ ॥" सूक्ष्मसंपरायाद्धायाश्चरमसमये संज्वलनलोभ उपशान्तो भवति, ततोऽनन्तरसमये उपशान्तकषायो भवति, तस्मिंश्चोपशान्तकषाये वीतरागेऽष्टाविंशतिरपि मोहनीयप्रकृतय उपशान्ता ज्ञातव्याः, एताश्चोपशमश्रेणावुपशम्यन्ते, तदारम्भकश्च "उवसामगसेढीए पट्ठवओ अप्पमत्तविरओ उ । पज्जवसाणे सेवो होइ पमत्तो अविरओ वा ॥ १ ॥ अन्ने भणंति अविरयदेसपमत्तापमत्तविरयाणं । अन्नयरो पडिवज्जइ दंसणसमणम्मि उ नियट्टी ॥ २ ॥" इति संक्षेपः, विस्तरार्थिना तु कर्मसप्ततिटीका अवलोकनीयेति । तदेवं सर्वोपशान्तमोहा भवन्ति, तेऽपि, अपिशब्दास्त्रयोऽपि विस्मयार्थाः । ये हि आहारकप्रभृतयः सर्वशान्तदान्तशिरोमणयः परमयोगिनो महात्मानः–तेऽपि चेदिति शेषः, भवन्ति प्रमादपरवशाः कथंचित् कर्मोदयवशात् कषायादिकलुपितास्तत–स्तदनन्तरमेव प्रमादानन्तरमेव चतुर्गतिका गतिचतुष्टयभ्रमणशीला भवन्ति इति गाथार्थः ॥ २१ ॥

अन्यदपि प्रमादफलं गाथाद्वयेनाह—

जं चेगजिओवि असंखवारमिह सम्मदेसविरईओ । विरइमणंतुव्वलणं च अट्ठहा चतुहा मोहसमं ॥ २२ ॥

पञ्चमं कुलकम् । ५

॥ ५१ ॥

नाणाभवेसु पावइ तं पावपमायविलसियं सयलं।इहरा एगभवेण वि लहिउं सव्वाइं जाव सिवं ॥२३॥

व्याख्या–न केवलमाहारकादीनां चतुर्गतिप्राप्तिरेव प्रमादफलं यच्चैकोऽपि जीवो असंख्यातवारान् सम्यक्त्वादीन् प्राप्नोति, तदपि प्रमादविलसितमिति योगः, असंख्यातानां ह्येकैकवारमपि सम्यक्त्वादिप्राप्तावसंख्यातवारं तल्लाभो भवत्येव, तद्व्यवच्छेदार्थमाह, एकोऽपि अद्वितीयोऽपि जीवोऽसंख्यातवारं संख्यातिक्रान्तवारानिह जगति सम्यक्त्वदेशविरती प्राप्नोति, कथमिति चेद्यतः—"सम्मत्तम्मि य लद्धे पलियपुहत्तेण सावओ होज्जा। चरणोवसमखयाणं सागरसंखंतरा हुंति ॥ १ ॥" तदत्र यदि पल्योपमपृथक्त्वं द्व्यादिनवपर्य्यन्तं प्रतिपल्य प्रतिपल्य पुनः पुनः सम्यक्त्वलाभे क्रमेण वेदयन् पूरयति, तदास्य प्रभूतवारान् सम्यक्त्वलाभो भवति, अथवा 'तित्थयर–पवयण सुय'मित्यादि आशातनाप्राचुर्येणापार्द्धपुद्गलं पूरयति, तदापि अनेकेषु भवेषु प्रभूतवारान् अन्तरान्तरा सम्यक्त्वलाभो भवति, एवं देशविरतेरपि, तथा विरतिं सर्वविरति–मष्टधा अष्टासु भवेषु अष्टवारं, यद्यपि 'आराहगो य जीवो सत्तट्ठभवेहिं सिज्झई नियमा', इत्यत्र सम्यगाराधनायुक्ता एवाष्टौ दर्शिताः–तथापि अलक्ष्यः कोऽपि अतिसूक्ष्मः प्रमादः द्रष्टव्यः, कथमन्यथा क्षपकश्रेणेरलाभ इति। तथा अनन्तानामनन्तानुबन्धिनां कषायाणामुद्वलनं च करणविशेषेण शुभाध्यवसायरूपेणोन्मोचनं सत्तातोऽप्यपसारणं, तदपि अष्टवारं, यदि ह्येकदोत्सारणे प्रवर्द्धमानाध्यवसाय एव स्यात्, ततो न पुनर्बध्नीयाद् बन्धाभावे कथमष्टवारानुद्वलयेद्, ततस्त्रापि सूक्ष्मः प्रमाद एव कारणत्वेनावसीयते, तथा 'चतुर्द्धा' वारचतुष्टयं मोहशममुपशमश्रेण्यां सर्वथा मोहोपशमः, एकत्र

हि भवे उत्कर्षतो वारद्वयमुपशमश्रेणिं करोति, समस्तेऽपि च भवे वारचतुष्टयं, यदि ह्येकदापि कृत्वा प्रवर्धमानपरिणाम एव स्यात् न द्वितीयवारमपि तां कुर्यात्, किं पुनर्वारचतुष्टयम्, उपलक्षणं चैतत् तेन सम्यक्त्वचारित्रादिग्रहणमोक्षलक्षणाकर्षबहुत्वमपि, "तिण्ह सहस्सपुहत्तं सयपुहत्तं च होइ विरईए। एगभवे आगरिसा एवइया हुंति नायवा ॥ १ ॥" इत्येवंरूपं प्रमादकृतमेव द्रष्टव्यं, तस्मादलक्ष्यस्तत्रापि प्रमाद एव कारणमिति लक्ष्यते ॥२२॥ 'नानाभवेषु' अनेकजन्मसु 'प्राप्नोति' लभते, तत्सर्वमसंख्यातवारसम्यक्त्वादिप्रापणं, 'पापप्रमादविलसितं' निन्दितविषयकषायादिविजृम्भितं तत्कार्यमित्यर्थः, विपक्षे प्रतिकूलं तर्कमाह, 'इतरथा' अन्यथा यदि प्रमादो नाभविष्यत् तदैकस्मिन्नपि भवे सर्वाणि सम्यक्त्वादीनि लब्ध्वा मोक्षमयास्यत्, यदसौ न गतस्तत्र प्रमाद एव हेतुरिति गाथार्थः ॥ २३ ॥

न केवलं प्रमादपरतन्त्राणां मोक्षाभावोऽपि तु संसारे प्रकृष्टदुःखप्राप्तिरेवेत्याह—

तदेवं संसारातुलजलहिमज्झे निवडिया, जिया वुड्डुव्वुड्डासरिसमरणुप्पत्तिनडिया।
दुरंतं अच्चंतं दुहमपरिमेयं निरुपमं, भमंता विंदंते खरपवणखित्तो हठ इव ॥ २४ ॥

व्याख्या—तदेवमिति यतोऽसांव्यवहारिकाद्यवस्था आरभ्य मिथ्यात्वाद्युपहता एव तत् तस्मादेवमुक्तप्रकारेण जीवा अत्यन्तदुःखमेव विन्दन्त इति योगः, क्वेत्याह—'संसार एवातुलो' निरुपमो 'जलधिः' समुद्रः—तन्मध्ये तद्गर्भे 'निपतिता' निमग्नाः



१ सम्यक्त्वसामायिकं श्रुतसामायिकं देशविरतिसामायिकमेषां सहस्रपृथक्त्वं भवति ॥

सन्तो जीवा 'त्रूडितोद्त्रूडिताः' नारकदेवादिभवाप्तौ मग्नोन्मग्ना इव, असदृशा अत्यन्तं विरूपा, याः काश्चिन्मरणोत्पत्तयस्ताभिर्विनटिता विगोपिताः, ततो त्रूडितोद्त्रूडिताश्च ते असदृशमरणोत्पत्तिविनटिताश्चेति कर्मधारयः, पुनः कीदृशाः सन्तः? भ्रमन्तः पर्यटन्तः, किमिवेत्याह–हठ इवेत्युपमानम्, अबद्धमूलो वनस्पतिविशेषो जलोपरिवर्त्ती हठस्तद्वत्, सोऽपि कीदृशः? 'खरपवनक्षिप्तः' प्रचण्डवायुप्रेरितः, स यथा भ्राम्यति तथा जीवा अपि, न चात्रोपमाया वचनभेदो दोषो, यदाह दण्डी–"न लिङ्गवचने भिन्ने न हीनाधिकतापि वा। उपमा दूषणायालं यत्रोद्वेगो न धीमतां ॥१॥ स्त्रीव गच्छति षण्ढोऽयं वक्त्येषा स्त्री पुमानिव । प्राणा इव प्रियोऽयं मे विद्या धनमिवार्जिता ॥ २ ॥" इति ॥ कीदृशं दुःखमित्याह–दुरन्तमत्यन्त–मतिशयेन दुःखावसानं, कस्यापि दुःखस्याप्यन्ते सुखं भवति, एतस्मिंश्च न कदाचिदिति भावः, 'अपरिमेयमिति' अतिप्रभूतत्वात् प्रमातुमशक्यम्, अत एव निरुपम–मुपमातिक्रान्तमिति वृत्तार्थः ॥ २४ ॥

अथोपदेशमाह–

ता संसारं असारं अणुवरयमहादुक्खजालं विसालं,
कम्माणं संचियाणं तह विविहपरीणाममच्चंतवामं ।
नाउं थोवं च आउं तडितरलमलं मित्तवित्तादि नच्चा,
रम्मे धम्मे जिणाणं मणमणवरयं भावसारं धरेह ॥ २५ ॥

आचार्य श्री सुविधिसागर जी महाराज

द्वादश-कुलकम्। ॥ ५२ ॥

व्याख्या–'यस्मात्' अत्र संसारे सर्वत्रापि दुःखमेव, तत् तस्मादसारः–तं तादृशं ज्ञात्वा धर्मे मनः कुरुत भोः श्राद्धाः! इति शेषः, तथा 'अनुपरतमहादुःखजालम्' अनिवृत्तालब्धिकबाधावृन्दम्, अनवरतेति वा पाठस्तत्रानवरतं निरन्तरं, 'विशालं' विस्तीर्णं च, तथेति समुच्चये भिन्नक्रमो वाक्यादौ द्रष्टव्यः, ततः कर्मणामशुभरूपाणां, 'संचितानां' पूर्वोपार्जितानां 'विविधपरिणामं' नानाप्रकारं क्रकचपाटनादिरूपं विपाकमत्यन्तवाम–मतिशयेन प्रतिकूलवेदनीयं, 'ज्ञात्वा' सम्यगवधार्य एतज्ज्ञानस्यापि प्रायो निर्वेदत्वादिहेतुत्वेन धर्मप्रवृत्तिनिमित्तत्वात्, स्तोकमल्पं चायुर्जीवितं, तथा 'तडित्तरलं' विद्युच्चपलमलमतिशयेन 'मित्रवित्तादि' सुहृद्द्रव्यादिकं च ज्ञात्वा, भिन्नवाक्यत्वाच्च ज्ञात्वेति न पौनरुक्त्यं, 'रम्ये' ऐहिकामुष्मिककल्याणहेतुत्वात् कान्ते, 'धर्मे' द्रव्यस्तवादिरूपधर्मकृत्ये, 'जिनानामिति' सम्बन्धे षष्ठी, तेन नान्येषां सुगतादीनामपि सम्बन्धिनि, मनो हृदयमनवरतं धारयत स्थिरीकुरुत, तच्च कदाचिन्मोहाद् दुष्टमपि स्यादत आह–'भावसारं' शुभाध्यवसायप्रधानं, पूर्वोदितसंसारपरिभ्रमणव्याधेर्हि न धर्मचित्तनिवेशादन्यदौषधमिति भाव इति वृत्तार्थः ॥ २५ ॥

पञ्चमं कुलकम्। ५

अथोपदर्शितसमस्तानर्थकन्दस्य सप्रभेदस्य प्रमादस्य उच्छेदपुरस्सरं धर्मोद्यमोपदेशमाह—

पंचविहं अट्ठविहं व छिंदिउं तह पमायमुज्जमह। तह वि य कहंवि खलिए भावेह इमं सनिवेयं ॥२६॥

व्याख्या–तथेति समुच्चयार्थो भिन्नक्रमो वाक्यादौ द्रष्टव्यः, ततश्च–तथा 'पञ्चविधं' मद्यविषयकषायनिद्राविकथारूपतया पञ्चप्रकारम्, 'अष्टविधं वा' अज्ञानसंशयादिरूपतया, तदुक्तम्–''पमाओ य जिणिंदेहिं भणिओ अट्ठभेयओ। अन्नाणं संसओ चेव मिच्छानाणं तहेव य ॥ १ ॥ रागो दोसो मइब्भंसो धम्मम्मि य अणायरो। जोगाणं दुप्पणीहाणं अट्ठहा वज्जियव्वओ ॥ ५२ ॥

॥ २ ॥" वाशब्दो विकल्पार्थः, प्रमादं सर्वप्रकारं [तं] 'छित्त्वा' सर्वथोन्मूल्य, 'उद्यच्छत' समस्तधर्मकृत्येषूद्यमं कुरुत, प्रमादरहितस्यैव तस्य स्वफलप्रसाधकत्वादिति भावः. यद्यपि स्वकुशला यथाशक्ति प्रमादपरिहारेण प्रवर्त्तते, तथापि च एवमपि प्रवर्त्तमानस्य कथंचित् प्रबलतरदुष्कर्मोदयवशादनाभोगादिना स्खलिते सति अतिचारादौ प्राप्तौ भावयतानुचिन्तयत, इदं वक्ष्यमाणं 'सनिर्वेदं' सवैराग्यं यथा भवतीति गाथार्थः ॥ २६ ॥

तदेवाह—

अवि जिणवयणं मणे मुणंतो विहियमई किल तप्पहेण गंतुं ।
अहह कहमहं महंतमोहोवहयविबोहविलोयलो खलामि ॥ २७ ॥

व्याख्या—अपिर्विस्मये, 'जिनवचनं' प्रमादादिविपाकोपदर्शकं, 'मनसि' चेतसि विदन्नपि, अजानानो हि स्खलत्यपि इत्यपेरर्थः, मननस्य मनोव्यभिचाराभावाद् यत् तद्ग्रहणं तत्सातिशयमननख्यापनार्थं, 'जानन्नपि' कदाचिदकरणबुद्धिः कुर्वन् स्खलेदपि इत्यत आह—'विहितमतिः' कृतबुद्धिरेव, 'किलेति' आप्तवादे, आप्ता अप्यमुमर्थं साक्षात् कुर्वन्त्येव, 'तत्पथेन' जिनवचनमार्गेण 'गन्तुं' यातुं, 'अहहेति' खेदे, 'कथं' केन प्रकारेण निःपुण्योऽहमित्यात्मनिर्देशे, 'महामोहः' प्रबलाज्ञानं तेनोपहतं ध्वस्तं विबोधविलोचनं सम्यक्त्वज्ञाननेत्रं यस्य स तथा, ज्ञानस्य फलं विरतिः यदि हि मम तत्त्वतो विबोधः स्यात् ततो न स्खलनं भवेत्, स्खलामि चाहं ततो नूनं ध्वस्तो बोध इति पुष्पिताग्रवृत्तार्थः ॥ २७ ॥

द्वादश-
कुलकम् ।

॥ ५४ ॥

पञ्चमं
कुलकम् ।
२

अथोपदेशमाह—

इय चिंतिऊण दमिऊण मणं नियमेह इंदियकसायगणं ।

तह दाणसीलतवभावरया कुणहोचियं गुरुमएण सया ॥ २८ ॥

व्याख्या—'इति' पूर्वोक्तं सनिर्वेदं 'चिन्तयित्वा' अनुध्याय कचिच्चिंतिउं चेति पाठः—तत्र चकारो मनोदमनेन सह समुच्चयार्थः, 'दमयित्वा' वशीकृत्य मनश्चित्तं, ततो 'नियमयत' नियन्त्रयत, 'इन्द्रियकषायगणं' प्रसिद्धमेव, मनोनिग्रहस्यैव तन्निग्रहहेतुत्वादिति भावः, एवं निवर्त्यनिवृत्तिमभिधाय इष्टप्रवृत्तिमाह—'तथेति' समुच्चये 'दानशीलतपोभावेषु' प्रसिद्धेषु 'रता' आसक्ताः सन्तः, 'कुरुतोचितं' लोकलोकोत्तरानिन्द्यं कृत्यमिति शेषः, तदपि न स्वेच्छया किन्तु 'गुरुमतेन' धर्माचार्योपदेशानुसारेणैव, 'सदा' सर्वकालमिति प्रमिताक्षरवृत्तार्थः ॥ २८ ॥

अथ किमिति सर्वं गुरुमतेनैव क्रियते इत्याशंक्य तथाकरणस्य गुणं वृत्तद्वयेनाह—

तह जिणमयं सम्मं नाउं भवन्नवतारणं, अनिउणजणुप्पिक्खासुद्धप्पवित्तिनिवारणं ।

सुगुरुवयणासत्ता सत्ता दुरंतमणंतयं, भववणमइक्कंताणंतागया य परं पयं ॥ २९ ॥

ता गीयत्थप्पवित्तिं मुणिय अणुगुणं चेव वट्टिज्ज तीए, धम्मत्थी धम्मकज्जे नउ समइ वियप्पेण किंची कयाइ । ॥ ५४ ॥

गीयाणापारतंतं सयलगुणकरं बिंति जं तित्थनाहा, तेणायाराइसुत्ते पढमगणहरेणावि तं दंसियंति ॥ ३० ॥

व्याख्या-तथेति समुच्चये सुगुरुवचनासक्ताः परं पदं जीवा गता इति योगः, किं कृत्वेत्याह-जिनमतम्-अर्हत्प्रवचनं (सम्यक्) यथावस्थितत्वेन ज्ञात्वाऽवबुध्य, कीदृशमित्याह, 'भवार्णवतारणं' संसारसमुद्रपारप्रापकम्, एतदंतरेणान्यस्य तत्प्रापकत्वाभावात्, 'अनिपुणा' मिथ्यात्वोपहतत्वेन यथावस्थितार्थग्रहणाकुशलाः ते च ते जनाश्च, तेषां तैर्वा उत्प्रेक्षा असदर्थोत्प्रेक्षणं तया अशुद्धा जीवोपघातादिनिमित्तत्वेन कलुषा प्रवृत्तिः-छागादिवधे प्रवर्त्तनं तस्या 'निवारणं' निषेधकम्। अथवा स्वदर्शनेऽपि अनिपुणोत्प्रेक्षया अशुद्धप्रवृत्तिः, कदाचिद्, यथा प्रतिष्ठाप्रस्तावे सूरेः स्वर्णाङ्कितकरत्वकारणमजानाना अशुद्धप्रवृत्तिं श्राद्धप्रतिष्ठाविधानलक्षणां प्ररूपयन्तीति तन्निवारकम्, सिद्धान्तरूपत्वाद् वाचकादिविरचितप्रतिष्ठाकल्पानां ज्ञानानन्तरं च 'सुगुरुवचनासक्ताः' सुगुरुवाक्यानुसारिप्रवृत्तयः सन्तो जीवा इति गम्यते, पाठान्तरपक्षे तु 'सत्त्वा' जीवा इति साक्षादेव कर्तृनिर्देशः, पुनः कीदृशाः ? 'भववनं' संसारारण्यमतिक्रान्ता उल्लंघितवन्तः कीदृशमित्याह, 'दुरन्तं' दुःखैकावसानं, तथा 'अनन्तकम्' अनन्तकालवेद्यवेदनीयम्, अनन्ता अतिप्रभूता गताश्च प्राप्ताः, परं परमं पदं मोक्षलक्षणमिति हरिणीवृत्तार्थः ॥ २९ ॥ यतः सुगुरुवचनासक्ताः परमपदं प्राप्तास्तत् तस्माद् 'गीतार्थानां' सद्गुरुप्रभृतीनां 'प्रवृत्तिः' तत्र तत्र संपूर्णचैत्यवन्दनचतुर्दशीपाक्षिकप्रतिक्रमणसूरिबिम्बप्रतिष्ठादौ प्रवर्त्तनं, 'ज्ञात्वा' साक्षात्कारेण अवगम्य, तस्या एव गीतार्थप्रवृत्तेः-'अनुगुणं' तदनुकूलं तदनुसारेणेत्यर्थः, वर्त्तेत प्रवृत्तिं कुर्यात्, को हि आगमानुसारी सततगीतार्थप्रवृत्तौ सत्यामेव निषेधवचनाभावे चान्यथा प्रवर्त्तेत, 'धर्मार्थी' विशिष्टधर्माध्यवसायवान् श्राद्धादिरपि, 'धर्मकार्ये' धर्मानुगतप्रयोजने चैत्यवन्दनादौ, 'न तु' नैव 'स्वमतिविकल्पेन' आत्मीयबुद्ध्युत्प्रेक्षणेन, गुरूपदेशमन्तरेण तस्य व्यभिचारित्वात्, किमपि स्वल्पमपि,

कदापि कदाचिदपि संपदि विपदि वेत्यर्थः, किमित्येतदेवमित्याह–यद् यस्माद् 'गीतार्थाज्ञापारतन्त्र्यं गीतार्थगुर्वायत्ततां, 'सकलगुणकरं' समस्तज्ञानचारित्रादिनिबन्धनं 'ब्रुवते' प्रतिपादयन्ति, 'तीर्थनाथाः' तीर्थकराः, तथाचाहुः–'गुरुपारतंतनाणं सद्दहणं एय संगयं चेव । इत्तो य चरित्तीणं मासतुसाईण निद्दिट्ठं ॥ १ ॥' यत एतदेवं तेन हेतुनाचारादिसूत्रे आचाराख्यस्य प्रथमाङ्गस्यादिवाक्ये–'सुयं मे आउसंतेणं भगवया एवमक्खायम्' इत्येवंरूपे, श्रुतं मया, आवसता गुरुकुले भगवतैवमाख्यातमिति व्याख्यानार्थे 'प्रथमगणधरेण' इन्द्रभूतिनापि तद्गुरुपारतन्त्र्यमेवादौ दर्शितं प्रकाशितमितिः समासौ, यत एव गुरुपारतन्त्र्यं प्रधानं तत एवादौ तदुपदर्शितम् । यदि ह्येतत् प्रकृष्टं नाभविष्यत् तदा सर्वसमाचाराणामादौ नेदमवक्ष्यदिति, इदमत्रैदंपर्य–संसारानादितां प्रमादस्य च दुर्निवारणीयतां सद्गुरुपारतन्त्र्यप्रवर्त्तनस्य च तदपनोदक्षमत्वमाकलय्याहर्निशं तत्रैव प्रवर्त्तितव्यमिति स्रग्धरावृत्तमिति वृत्तद्वयार्थः ॥ ३० ॥

अथोपदेशफलमाह–

इय गणिजिणवल्लहवयणमसमसंवेगभावियमणाणं ।
निसुणंत मुणंतकुणंतयाण लहु कुणइ निव्वाणं ॥ ३१ ॥



व्याख्या–'इति'–उक्तन्यायेन यद् 'गणिजिनवल्लभवचनं' षाण्मासिकतपोविशेषानुष्ठानेन अवाप्तगणिसंज्ञो, अथवाचार्यपदप्राप्तौ गणो गच्छो विद्यते यस्येति गणी आचार्यः, स चासौ जिनवल्लभश्च तस्य वचनं वाक्यम्–इदमतिशयेन वैराग्यकरम्,

'असमसंवेगभावितमनसां' निरुपममोक्षाभिलाषुकाणां सत्त्वानां 'निःशृण्वतां' नियमेनाकर्णयतां, 'तथा मुणंतकुणंतयाणेति', श्रवणानन्तरमर्थतो जानतां ततोऽपि 'कुर्वतां' सम्यगनुतिष्ठतां, 'लघु' शीघ्रं 'करोति' विधत्ते 'निर्वाणं' मोक्षं, त्रिकालविषयत्वात् सूत्रस्य वर्त्तमाननिर्देश इति गाथार्थः ॥ ३१ ॥

सिद्धान्तसूक्ष्मतरवाच्यमहार्घरत्नरत्नाकरे विविधभङ्गिकविल्लसत्ये ।

शब्दार्थभूरिगुरुदोषविषानुषङ्गदूरोज्झितेऽत्र कुलके रमते मनो मे ॥ १ ॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ पञ्चमकुलकविवरणं समाप्तमिति ।

## अथ षष्ठं कुलकम् ।

पञ्चमे कुलकेऽसांव्यवहारिकानारभ्य यावदुपशमश्रेणिं गुणस्थानकप्राप्तिप्रपातादिना वैराग्यहेतुत्वमुक्तं । षष्ठे तु मनुष्यत्वमात्रप्रतिबद्धममत्वलक्ष्म्याद्यनित्यत्वदर्शनेन धर्मविधानोद्यमं गाथाचतुष्टयेनाह—

संसारचारकारणमिणमो धणकणगमाइसु ममत्तं। विसविसमा ही विसया पमुहसुहा परिणइदुहा य ॥१॥

खरपवणुत्तालतणग्गलग्गजलबिंदुचंचलं जीयं । मयमत्ततरुणरमणीकडक्खचडुलाउ लच्छीओ ॥ २ ॥

दुव्वारतिव्वदुव्विसहदुक्खनरगगइहेउणो परमा। जीवाण रागदोसा अणंतभवजम्ममरणकरा ॥ ३ ॥
ता विसमकसायपिसायविनडियं जाणिऊण जयमिणमो। कुरु सयलकुसलमूलं सद्धं सद्धम्मकरणम्मि ४

व्याख्या–संसार एव कृच्छ्रनिर्गमत्वात् चारो गुप्तिगृहं, तस्य कारणं तन्निवासहेतुः–इदं प्रत्यक्षोपलभ्यं 'धनकनकादिषु' मकारोऽलाक्षणिकः, तत्र धनं गणिम–धरिम–मेय–पारिच्छेद्यभेदात् चतुर्विधं, 'कनकं' सुवर्ण्ण–मादिशब्दात् शेषं धान्यादि-सप्तविधपरिग्रहग्रहः, तत्र 'ममत्वं' ममकारः। तथा 'विषविषमाः' कालकूटवद् दुस्तरविपाकाः, 'हीति' खेदे, 'विषयाः' शब्दादयः, कथमेवं यतः 'प्रमुखे' प्रारम्भे उपभोगकाले किंपाकफलवत् मनाक् मधुरत्वेन सुखाः सुखयन्तीति कृत्वा, तथा 'परिणतौ' परिणामे विपाककाले 'दुःखा' दुःखयन्ति नरकादि प्रापणेनेति कृत्वा, 'चः' समुच्चये ॥१॥ तथा 'खरपवनेन' तीव्रवायुना 'उत्तालम्'–अतिचपलं यत् 'तृणाग्रं' तत्र लग्नोऽनुषक्तो यो 'जलबिन्दुः' तोयकणः तद्वच्चञ्चलम् अस्थिरं, जीयमिति प्राकृतत्वात् 'जीवितं' प्राणधारणं, तद् अनेकापायाकुलत्वात् 'मदेन' क्षीबतया 'मत्ता' विह्वला सा चासौ तरुणरमणी च तस्याः कटाक्षा अपाङ्गनिरीक्षणानि तद्वत् 'चटुलाः'–चपला लक्ष्म्यो राज्यादिसंपदोऽपि वर्त्तन्ते, कटाक्षा ह्यन्यदापि चलाः स्युर्विशेषतो मत्ताया इति भावः ॥ २ ॥ तथा जीवानां रागद्वेषौ वर्त्तेते इति योगः कीदृशौ, 'दुर्वाराणि' निवारयितुमशक्यानि 'तीव्राणि' अत्यन्तगाढानि अत एव 'दुर्विषहाणि' सोढुमशक्यानि तानि च तानि दुःखानि चेति कर्मधारयानन्तरं तादृशानि दुःखानि यस्यां सा तथा, सा चासौ 'नरकगतिश्च' तस्या 'हेतू' कारणे, परमौ प्रकृष्टौ अव्यभिचारिणावित्यर्थः। न हि ततोऽपि कश्चिद् विशिष्टतरो

नरकहेतुरिति भावः, 'जीवानां' रागद्वेषौ प्रसिद्धौ अत एव अनन्तभवेषु अतिप्रभूतजन्मसु, 'जन्ममरणकरौ', ताभ्यां ह्यनन्तानि जन्ममरणानीति भावः ॥ ३ ॥ यतो धनादिममत्वजीवितव्यलक्ष्मीप्रतिबन्धादयो रागविशेषास्तदनुगतश्च द्वेषस्तौ च कषायरूपौ ततस्तस्मात् कारणाद् 'विषमकषायपिशाचविनटितं' विगोपितं, 'ज्ञात्वा' प्रत्यक्षत उपलभ्य, 'जगदिदं' मनुष्यलोकलक्षणं, विषमता च कषायपिशाचानां मन्त्रौषधाद्यसाध्यत्वात्, श्रुतचारित्ररूपस्यैव धर्मस्य तन्निग्रहहेतुत्वात्, 'कुरु' विधेहि, भोः सुश्रावक ? इति गम्यते, 'सकलकुशलमूलं' समस्तैहिकपारत्रिककल्याणादिनिदानभूतां 'श्रद्धां' सातिशयस्पृहां, सद्धर्मकरणे शुद्धप्रतिश्रोतोमार्गप्रवर्त्तने न हि तत्करणस्पृहाथा अन्यः कषायपिशाचवशीकारोपाय इति गाथाचतुष्टयार्थः ॥ ४ ॥

धर्मकरणमेवाह—

सुगुरुपयपउमपणइं परोवयारे मइं वएसु रइं । चिइवंदणं तिसंझं कुणसु दुसंझं च सज्झायं ॥ ५ ॥

व्याख्या–'सुगुरुपदपद्मप्रणतिं' प्रसिद्धां कुरु इति सर्वत्र क्रियायोगः, तथा 'परोपकारे' स्वव्यतिरिक्तजनानुग्रहे 'मतिं' बुद्धिं, तथा 'व्रतेषु' अणुव्रतादिषु नियमेषु रति–मासक्तिं, रुचिमिति वा पाठः, तत्र च सम्यक्त्वमात्रलाभेषु अणुव्रतादिषु रुचिमभिलाषं, तथा 'चैत्यवन्दनं' पूर्वोक्तस्वरूपं 'त्रिसन्ध्यं' त्रिकालं 'कुरु' विधेहि, द्विसन्ध्यं च पूर्वाह्णापराह्णयोः स्वाध्यायमधीतपरावर्त्तनलक्षणमिति गाथार्थः ॥ ५ ॥

तथा—

जं जत्थ जया जेसिं जईण जोग्गं तयं तहिं तइया । तेसिं सद्धासक्कारसारमाणाए तह दिज्जा ॥ ६ ॥

द्वादश-कुलकम् । ॥ ५७ ॥

व्याख्या—यद् वस्त्रपात्रादिकं यत्र तदलाभवति देशादौ, यदा यस्मिन् शीतकालादौ येषामविद्यमानवस्त्रादिवस्तूनां, 'यतीनां' साधूनां, तदपि 'योग्यं' प्राशुकैषणीयं, तत् तस्मिंस्तदा तेभ्यो दद्यादिति यथासंख्यं योगः । कथं दद्यात्? श्रद्धासत्कारसारं श्रद्धासत्कारौ पूर्वं व्याख्यातौ तत्प्रधानं, तथा 'आज्ञया' विधिना दायकादिशुद्ध्या, तथेति समुच्चयार्थो वाक्यादौ द्रष्टव्य इति गाथार्थः ॥ ६ ॥

षष्ठं कुलकम् । ६

एवं विधेयविषयमुपदेशमभिधाय अथ निषेध्योपदेशमाह—

परपरिवायं परवसणतूसणं परपराभवं रोसं । अत्तुक्करिसं हरिसं मुंचसु मायं विसायं च ॥ ७ ॥

व्याख्या—'परेषाम्' अन्येषां 'परिवादं' दूषणोद्घोषणं, तथा परेषां सामान्येनैवान्येषां विशेषतः शिष्टानां व्यसने चौराद्याद्यापदि तोषं प्रमोदं, तथा परेषां पराभवं वञ्चनक्रियादिना तिरस्कारं, 'रोषं' कोपम्, 'आत्मोत्कर्षं' जातिश्रुताद्यहंकारं, 'हर्षं' पुत्रधनादिलाभे सातिशयप्रमोदमस्यापि लाघवहेतुत्वात् तदुक्तम्—"अइहासो अइरोसो अईवतोसो असम्मए वासो । अचुब्भडो य वेसो पंच वि गरुयं पि लहुइंति ॥ १ ॥" 'मुञ्च' त्यज, भो श्राद्धवर? तथा 'मायां' परवञ्चनां, विषादं च धनादिभ्रंशेऽत्यन्ताभीष्टवस्तुदाने च पश्चात्तापं च, परपरिवादादयो हि सर्वेऽपि अशिष्टताव्यञ्जका इहलोकेऽपीति तत्त्वागोपदेशः, इह च मुञ्चेति क्रियापदस्य वाक्यान्ते प्रयोगादन्तदीपकं नामालङ्कारः एवंविधविषयेऽन्यत्रापि अयमलङ्कारो द्रष्टव्य इति गाथार्थः ॥ ७ ॥ ॥ ५७ ॥

एवं हेयमभिधाय अथोपादेयं गुणिप्रमोदादिचतुष्टयमन्यच्चाह—

**कुणसु य गुणिसु पमोयं मित्तिं सत्तेसु दुक्खिएसु दयं। निग्गुणजणेसु विक्खं दक्खिन्नं तह अपेसुन्नं ॥८॥**

व्याख्या—'कुरु च' विधेहि, 'चः' समुच्चये, 'गुणिषु' ज्ञानादिमत्सु 'प्रमोदं' तद्गुणानुमननलक्षणं 'हर्षं', मैत्रीं प्रसिद्धां, सत्त्वेषु सामान्येन सर्वेष्वपि 'दुःखितेषु' दयां करुणां, 'निर्गुणजनेषु' व्याधादिषु पापकारिषु उपेक्षां स्तुतिनिन्दापरिहाररूपां बुद्धिम्। एवं चतुष्टयमभिधायाथान्यदपि उपादेयमाह—दाक्षिण्यम्—अनुकूलतां, तथाऽपैशुन्यं सौजन्यमिति गाथार्थः ॥ ८ ॥

अथ संक्षेपेण सारमभिधातुमन्तरा तत्प्रस्तावनावाक्यं तावदाह—किं बहुनेति, भोः श्राद्धवर! भवतः पुरतः किं प्रयोजनं बहुना प्रभूतेन जल्पितेन, स्वल्पमप्येतत् सारभूतं कर्त्तव्यमिति गाथाद्वयेनाह—

**जं लोए न विरुज्झइ सुज्झइ जेणऽप्पणो मणोभावो। नियगुरुकुलक्कमाणं कलंकपंकं न जं कुणइ ॥ ९ ॥**

**सुत्ते जं न निसिज्झइ सिज्झइ लहु जेण मुक्खसुक्खफलं। तं सव्वं कायव्वं रागग्गहनिग्गहेण सया ॥१०॥**

व्याख्या—'यत्' कृत्यं 'लोके' शिष्टजने न विरुध्यते तदाचारविरोधि न भवति, तथा शुध्यति निर्मलीभवति येन कृत्येन आत्मनो मनोभाव—श्चित्तपरिणामः, (तथा) 'निजगुरुक्रमकुलयोः' 'कलङ्कपंकं' मालिन्यकर्दमं यत् कृत्यं न करोति ॥ ९ ॥ तथा 'सूत्रे' गणधरादिप्रणीते सिद्धान्ते यन्न नैव निषिध्यते चौर्यादिवत्, तथा 'सिध्यति' निष्पद्यते 'लघु' शीघ्रं येन कृत्येन मोक्षसौख्यफलं प्रसिद्धं, तत् कृत्यं 'सर्वं' समस्तमपि, ईदृशं च प्रायः सर्वमपि पूर्वोक्तं गुरुवन्दनचैत्यवन्दनादिकृत्यं, ततश्च

तस्योपलक्षणत्वेनान्यदपि अनुक्तमपि यदीदृशं तत् सर्वं कृत्यं विधेयं, कथमित्याह—'रागः' सिद्धान्तनिरपेक्षोऽस्मत्पूर्ववंशजेनेद-मुक्त-मिति पक्षपातः, स एवानेकानर्थहेतुत्वाद् ग्रहः पिशाचादिः—तस्य निग्रहेण निरोधेन, 'सदा' सर्वकालम्। अयमभिप्रायः—केवलसद्गुरुकत्वपक्षपातेन क्रियमाणमेतदन्यदपि च सर्वं कल्याणकरमेवेति कर्त्तव्यमिति गाथाद्वयार्थः ॥ १० ॥

इति युगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ षष्ठकुलकविवरणं समाप्तमिति ॥

## अथ सप्तमं कुलकम्।

षष्ठे हि मनुष्यत्वेऽपि लक्ष्म्यादिममत्वस्यानर्थहेतुत्वेन तत्परिहारपुरस्सरं धर्मश्रद्धामिदधे, सप्तमके तु कुलके तामभिधित्सुः पूर्वं त्रसभावलाभादिक्रमेण धर्मसामग्र्या एव दुर्लभत्वमाह—

**एगिंदिएसु अत्थिय कालमणंतं पसुत्तमत्तुव्व। कहमवि कयाइ केइ वि जीवा पावंति तसभावं ॥ १ ॥**

व्याख्या—'एकेन्द्रियेषु' असांव्यवहारिकादिषु, स्थित्वा अनन्तं कालं पूर्वोपदर्शितयुक्त्या वासं विधाय प्रसुप्ता निद्राणा इव, मत्ताः क्षीवा इव चेत्युपमानद्वयं, प्रसुप्ताश्च मत्ताश्चेति द्वन्द्वः, यद्वा प्रसुप्ताश्च ते मत्ताश्चेति कर्मधारयः, तेषामत्यन्ताव्यक्तचेतनत्वात्, यथा हि तेऽव्यक्तचेतना एव भवन्ति, तथा एकेन्द्रिया अपीत्यर्थः, 'कथमपि' केनापि कर्मलाघवादिप्रका-

रेण, 'कदापि' कस्मिंश्चिदपि परिणामविशेषवति काले, केचिदेव न तु सर्वे जीवाः, प्राप्नुवन्ति त्रसभावं, त्रस्यन्ति भयादिकारणेन नश्यन्तीति कृत्वा त्रसा द्वीन्द्रियादयः तद्भावम्, आदौ तावत् त्रसत्वमेव दुर्लभमिति गाथार्थः ॥ १ ॥

क्रमेण नरत्वादीनामपि दुर्लभत्वमाह—

तत्थ नरत्तं तत्थवि सुहखित्तं तत्थ जाइकुलरूवं । तत्थारोग्गं तत्थ वि चिरजीवित्तं च अइदुलहं ॥ २ ॥

व्याख्या-तत्र त्रसत्वे नरत्वं दुर्लभमिति योगः, दुर्लभपदमुत्तरपदेष्वपि सर्वेषु योज्यं, तत्रापि नरत्वे 'शुभक्षेत्रं' भारतादिकं, तत्रापि सुक्षेत्रे जातिश्च कुलं च रूपं चेति समाहारद्वन्द्वस्तत्, तत्र जात्यादिलाभेऽपि 'आरोग्यं' व्याधिवैकल्यं, तत्रापि आरोग्ये चिरजीवित्वमतिदुर्लभमिति व्यक्तमिति गाथार्थः ॥ २ ॥

तत्थ वि बहुसुहकम्मोदएण धम्मे वि हुज्ज जइ बुद्धी ।
तो वि जियाण न सुलहो जिणवयणुवएसगो सुगुरू ॥ ३ ॥

व्याख्या-'तत्रापि' चिरजीवित्वेऽपि प्रायः पापबुद्धिरेव जीवानामित्यत आह, 'बहुशुभकर्म्मोदयेन' प्रभूतपुण्यप्रकृत्याविर्भावेन, 'धर्मेऽपि' शुभानुष्ठानेऽपि, पापानुष्ठाने भवत्येव इत्यपिशब्दार्थः, 'भवेत्' स्याद्, यदि कथंचिद् बुद्धिरभिप्रायः ततोऽपि तथापि 'जीवानां' न सुलभो नैव सुप्रापोऽपि तु दुर्लभ एव, 'जिनवचनोपदेशको' यथावस्थितप्रतिश्रोतोमार्गोपदेष्टा, सुगुरु-र्ज्ञानक्रियावानाचार्यादिः, प्रायः पाखण्डिनां कुगुरूणामेव भूरिशः प्राप्तेः-इत्यभिप्राय इति गाथार्थः ॥ ३ ॥

एवं [illegible] दुर्लभत्वमभिधायोपदेशमाह—

ता गहिरमहोदधिमज्झपडियरयणं व कुसलसामग्गिं।
दुल्लहं पि लहिय विवुहो विहिज्ज सु(स)द्धं सुधम्मम्मि ॥ ४ ॥

व्याख्या—यत एवं दुर्लभा सामग्री तत् तस्माद् 'गम्भीरमहोदधिमध्यपतितरत्नमिव' अतिनिम्नस्वयंभूरमणान्तःपतितमुक्ताफलमिव दुर्लभामपि 'कुशलसामग्रीं' पुण्यसाधनसमग्रतां 'लब्ध्वा' प्राप्य, 'विबुधो' विचक्षणो, विदध्यात् शुद्धां (श्रद्धां)सातिशयस्पृहां, 'सुधर्मे' विधिधर्ममार्गे, अबुधो हि दुर्लभत्वबाधानभिज्ञः श्रद्धां न कुर्यादपीति विबुधग्रहणमिति गाथार्थः ॥४॥

धर्मभेदकथनपुरस्सरं योग्यधर्मे प्रवृत्तिमाह—

साहुगिहिभेयओ सो दुविहो तत्थ पढमम्मि असमत्थो। जहसत्तिं गिहिधम्मं कुणसु तुमं भावओ तत्थ ५

व्याख्या—स धर्मो द्विविधः साधुगृहिधर्मभेदेन साधुधर्मो गृहस्थश्रावकधर्मश्च, तत्र तयोर्द्वयोर्मध्यात्, प्रथमे यतिधर्मेऽसमर्थः प्रत्याख्यानावरणोदयादशक्तः सन्, यथाशक्ति शक्तिमनतिक्रमेण, गृहिधर्मं श्रावकानुष्ठान-मेकव्याद्यणुव्रतानुपालनादिरूपं, कुरु, तदपि न द्रव्यतोऽपि तु भावतो भावसारं, तस्यैव निस्तारहेतुत्वात्, तत्रेति गृहिधर्मे, एतच्च पदमग्रे गाथादौ योज्यमिति गाथार्थः ॥ ५ ॥ ॥ ५९ ॥

तिक्कालं चिइवंदणममंदआणंदसुंदरं विहिणा। तह सुविहियजइसेवणमित्तो जिणवयणसवणं च ॥ ६ ॥

व्याख्या–त्रिकालं चैत्यवन्दनं जघन्यतोऽपि, अमन्दानन्दसुन्दरं "कहिं मायंगगेहे एरावणो हत्थी" इत्यादि सोत्कर्ष-प्रमोदमनोहरं, 'विधिना' अक्षरमुद्रादिविधानाज्ञया, तथेति समुच्चये, 'सुविहितयतिसेवनं' सदाचारमुनिपर्य्युपासनम्–इतः सुविहितयतिभ्य एव च 'जिनवचनश्रवणं' सर्वज्ञागमाकर्ण्णनं, कुरु इति योज्यमिति गाथार्थः ॥ ६ ॥

तथा—

जिणपूयाइविहाणं तग्गुणनाणं तहा मुणिंदाणं। विहिदाणं सुहज्झाणं तवउवहाणं च जहसत्तिं ॥ ७ ॥

व्याख्या–'जिनपूजा' प्रसिद्धा, अथवा जिनपूजादीति आदिशब्दात् चैत्यद्रव्यरक्षणादिचिन्ताग्रहः तस्या 'विधानं' सादरं करणं, तथा तस्य जिनस्य गुणा वीतरागत्वादयः तेषां ज्ञानम्–अवबोध–स्तद्गुणज्ञानं, सति हि तस्मिन् सातिशया तद्भक्तिः स्यात्, तथा च तद्वन्दनादिकमपि भावरूपं स्याद्, अथवा तस्याः पूजाया गुणः स्वात्मन उपकारः–तज्ज्ञानं, ततोऽपि तत्रादरः स्यात्, कुरु इति क्रियायोगः प्रायः सर्वत्र, तथेति समुच्चये, 'मुनीन्द्राणां' विधिना दानं प्रसिद्धमेव, तथा 'शुभध्यानं' संवेगोपयोगिपदार्थानुचिन्तनं, तथा तपस उपधानमनुष्ठानं च यथाशक्तीति प्रसिद्धमेव शीलं तु व्रताद्यनुपालनरूपं स्थित-मेवेति चतुर्विधधर्मानुष्ठानोपदेशोऽयमिति गाथार्थः ॥ ७ ॥

तथा—

सज्झायनियमकरणं अपुव्वपढणं च उचियसमयम्मि। किच्चं निच्चं पि तहा जहजुग्गमभिग्गहग्गहणं ॥८॥

व्याख्या–स्वाध्यायस्य नियमोऽवश्यंभावेन करणं विधानं, तथा 'अपूर्वपठनं च' प्रसिद्धमेव, उचितसमयेऽस्वाध्यायकालपरिहारेणेति भावः, स चायं–"चउ पोरिसिओ दिवसो दिणमज्झंते य दुन्नि घडियाओ । एवं रयणीमज्झे अंतम्मि उ ताउ चत्तारि ॥ १ ॥ चित्तासोए सियसत्तमट्ठमीनवमी तिसु तिहीसुंपि । वहुसुयनिसिद्धमेयं न गुणिज्जुवएसमालाइ ॥ २ ॥" इति तथा 'कृत्यं' विधेयं 'नित्यमपि' सर्वदापि, न तु कदाचिदेवेतिभावः, योग्यस्यानतिक्रमेण यथायोग्यमभिग्रहाणां जिनगुरुसाधर्मिकवैयावृत्त्यविषयाणां नियमानां ग्रहणं स्वीकारो यस्य, यो योग्य स एव तेन ग्राह्य इति भावः, सर्वे चैते स्वाध्यायादयः संवेगोपयोगिन इति तदुपदेश इति गाथार्थः ॥ ८ ॥

जिणसु कसायपिसाए पसिद्धसिद्धंतमंतजावेण। उवसमयसु विसयतिसं संवेगामयरसं पाउं ॥ ९ ॥

व्याख्या–'जय' वशीकुरु 'कषायपिशाचान्' प्रसिद्धान्, केन कारणेनेत्याह–प्रकर्षेण सिद्धः प्रतीतः तद्वशीकारहेतुतया यः सिद्धान्तः–"जं जं दुक्खं लोए जं च सुहं उत्तमं तिहुयणम्मि । तं जाण कसायाणं वुड्ढिक्खयहेउयं सव्वं ॥ १ ॥" इत्याद्यागम एव मन्त्रः पठितसिद्धविद्याविशेषः–तस्य 'जापः' सादरमनुध्यानं तेन, यथा हि मन्त्रजापेन पिशाचा वशीक्रियन्ते, तथैतदनुध्यानेन कषाया अपीति भावः। तथा उपशमय निवर्त्तय 'विषयतृषां' शब्दाद्युपभोगस्पृहां, किं कृत्वा इत्याह–'संवेगो' मोक्षसुखाभिलाषः स एवात्यन्तिकानन्दहेतुत्वात् सुधारसोऽमृतनिर्यासः, तं 'पीत्वा' आस्वाद्य, तावदेव विषयेषु तृष्णा यावन्न मोक्षसुखानुचिन्तनमिति भाव इति गाथार्थः ॥ ९ ॥

तथा—

बहु लोएण वि निंदियमिंदियपसरं निरुंभसु अमग्गे ।
पडिवज्जसु य जहारिहमागमविहिणा गिहिव्वयाइं ॥ १० ॥

व्याख्या–'बहु' प्रभूतम्–अनेकशो 'लोकेनापि' अल्पदृष्टिना जनेनापि, आस्तां लोकोत्तरैरित्यपेरर्थः, 'निन्दितं' जुगुप्सितम् 'इन्द्रियप्रसरं' चक्षुरादिप्रवृत्तिविस्तारं, 'निरुंद्धि' निवर्त्तय, 'अमार्गे' मोक्षापथे रूपादौ, न तु जिनबिम्बालोकनश्रुतश्रवणादौ, तथा 'प्रतिपद्यस्व' चाङ्गीकुरु, कथमित्याह–'अर्हाणि' योग्यानि तेषामनतिक्रमेण यथार्हं स्वयोग्यतानुसारेणेत्यर्थः । 'आगमविधिना' नन्दिस्थापनायां चैत्यवन्दनप्रदक्षिणादानादिप्रकारेण, 'गृहिव्रतानि' श्रावकप्रायोग्याणुव्रतादीनि, सम्यक्त्वमात्रधारिश्राद्धविषयोऽयमुपदेश इति बोद्धव्यमिति गाथार्थः ॥ १० ॥

किं चेत्यभ्युच्चयेऽवान्तरवाक्यमिदमिति ज्ञेयं, तच्च पूर्वोक्तसर्वानित्यत्वादीनां संसारत्यागहेतूनां सुहृत्सम्बन्धादिभिः सह त्यागहेतुत्वं गाथात्रयेण समुच्चिनोति, तानेवाह—

सुहिसंबंधो बंधो बंधुजणा हियविबंधगा धणियं ।पासो अगारवासो असंखदुक्खावहा कामा ॥ ११ ॥
ही चवलं देहबलं ही लोलं जुव्वणं च जीयं च । धू अथिरं विसयसुहं हद्धी रिद्धीउ चवलाउ ॥ १२ ॥

द्वादश-कुलकम् । ॥ ६१ ॥

सुहसाहणमिह दुलहं सुलहं दुहसाहणं चिय जियाणं । जं ता परिहरियव्वो अव्वो सव्वो वि एस भवो १३

व्याख्या 'सुहृत्सम्बन्धः' [illegible], 'बन्धो' इव बन्धो निगडादिनियन्त्रणमिव, जन्मान्तरे तद्धेतुत्वात् मोक्ष-नगरप्राप्तिविघातकत्वाच्च, तथा 'बन्धुजनाः' स्वसृभ्रात्रादिबान्धवलोकाः, हितमनुकूलं धर्मानुष्ठानं विघ्नन्ति अवष्टभ्नन्तीति हितब(विघ)न्धकाः, अहोरात्रं तदर्थप्रवृत्तो हि न धर्मे प्रवर्त्तते इति भावः । 'धणितम्' अत्यर्थं, तथा 'पाशो' बन्धनरज्ज्वा-दिभिः संयमनमिव 'अगारवासो' भार्यापुत्रादिप्रतिबन्धेन गृहावस्थानं, यथा बद्धो न वांछितचारी तथा गृहस्थः प्रविव्रजिषुरपि, किन्तु संसारसागर एव निमज्जति, यदुक्तम्—"अहह गृही किमु कुशली बद्ध्वा संसारसागरे क्षिप्तः । यदि बत लभते पोतं तेन निमज्जत्यसौ नितराम् ॥ १ ॥" तथाऽसंख्यदुःखावहाः कामा नरकादिप्रापणेन तत्कर्तार इत्यर्थः ॥ ११ ॥ तथा 'हीति' खेदे 'चपलं देहबलं' संयमकारि शरीरसामर्थ्यं, 'ही लोलं यौवनं च जीवितं चेति' प्रसिद्धं, जीवितयौवनबलानि हि संय-मसाधनानि तान्यपि अस्थिराणीति भावः, 'धू' इति प्राकृतमव्ययं निन्दार्थे, यदासक्तेन गृह्यते दीक्षा तदपि 'अस्थिरं' विष-यसुखं भोगजन्यं, तथा हद्धीत्यपि प्राकृते हा धिगित्यर्थे निन्दायाम्, 'ऋद्धयो' राज्यादिलक्ष्म्योऽपि चपला न किंचिदत्र स्थिरं प्रतिबन्धस्थानमस्तीति भावः ॥ १२ ॥ तथा 'सुखसाधनं' मोक्षसौख्यकारणं, सद्गुरुसंपर्कादिक-मिह भवे 'दुर्लभं' दुःप्रापं, तथा 'सुलभं' सुप्रापं, दुःखसाधनमेव सुहृद्बन्धुसम्बन्धादिकं, जीवानामित्यादित एवारभ्य सर्वत्र योजनीयं, यतोऽत्र बन्धुसम्बन्धादयः सर्वेऽपि चञ्चला दुःखसाधनं च सुलभं, तत् तस्मात् 'परिहर्त्तव्यः' त्याज्यः, 'अवो' इति प्राकृते

सप्तमं कुलकम् । ७

॥ ६१ ॥

अहो इत्यर्थेऽव्ययं, ततो अहो सुश्रावक ! 'सर्वोऽपि' समस्तोऽपि एष प्रत्यक्षवर्त्ती 'भवः' पुत्रकलत्रादिरूपः संसारोऽतोऽत्र क्वापि प्रतिबन्धः कर्त्तुं न युज्यते, इति गाथात्रयार्थः ॥ १३ ॥

एवमपि उक्ते एते ममोपकारिण एवेति यः प्रतिबन्धं न जह्यात् तं प्रत्याह—

सव्वे सकज्जकंखी सव्वे सकडोवभोगिणो जीवा। को कस्स इत्थ सयणो ममत्त इह बंधहेतु त्ति ॥ १४ ॥

व्याख्या–'सर्वेऽपि' स्वजनादयोऽपि 'स्वकार्यकांक्षिणः' स्वकार्यसिद्ध्यर्थमेव स्वामिनि स्निह्यन्ति, तत्सिद्धौ औदासीन्यदर्शनात्, तथा सर्वेऽपि पुत्रादयः स्वकृतशुभाशुभफलोपभोगिनः, पिता हि पुत्रादिनिमित्तमारम्भं कुर्वाणः स एव नरकादिभाग् भविष्यतीति भावः। एवं च 'स्वकृतोपभोगित्वे' कः कस्य स्वजनः परमबन्धुर्न कश्चिदित्यर्थः, ततोऽत्र ममत्वं प्रतिबन्धः, केवलं 'बन्धहेतुरेव' कर्मबन्धनिदानमेव, न तु अन्यदस्य फलमितिशब्दः समाप्तौ, तथा चोच्यते–"शकुनशतसमूहा ह्येकवृक्षे उषित्वा पुनरपि च यथास्वं ते प्रभाते प्रयान्ति। इति जगति मनुष्याः पुत्रदारैः समेत्य क्वचिदपि ननु यान्ति प्रेम नातो विधेयम् ॥ १ ॥" इति गाथार्थः ॥ १४ ॥

अथोपदेशस्य कर्त्तव्यत्वमाह–

इय चिंतिय नियहियए दुल्लहलंभं च जिणमयं नाउं ।
विरसावसाणभववासनासणं कुणसु वयणमिणं ॥ १५ ॥

व्याख्या—इत्येवं पूर्वोक्तं सर्वानित्यत्वं 'चिन्तयित्वा' अनुध्याय, 'निजहृदये' स्वकीयचित्ते, तथा 'दुर्लभलाभं' दुरापप्राप्तिं च 'जिनमतं' सर्वज्ञोपदिष्टमार्गं 'ज्ञात्वा' अवबुध्य इदं मद्वचनोपदेशरूपं 'कुरु' विधेहि, कीदृशमित्याह 'विरसम्'—अत्यन्त-कटुविपाकम्—अवसानं पर्य्यन्तः फलविपाककालो यस्यासौ विरसावसानः स चासौ 'भववासश्च' संसारावस्थितिः तस्य 'नाशनं' क्षयहेतुरिदं वचनं तदवश्यमिदं कर्त्तव्य—मित्युपदेश इति गाथार्थः ॥ १५ ॥

इति श्रीयुगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ सप्तमकुलकविवरणं समाप्तमिति ॥

## अथ अष्टमं कुलकम् ।

पूर्वस्मिंस्तावद् धनकनकादिममत्वस्यान्तरस्य संसारहेतुत्वमुक्तम्, अत्रापि अष्टमे कुलके मिथ्यात्वकषायादे—रान्तरस्यैव तद्धेतुत्वमुच्यते, इत्येवं संबद्धस्यास्य संसारव्याध्युपशमनौषधं विवक्षुः प्रथमं तावत् संसारव्याधिग्रस्तत्वमेव जीवानामाह—

पुव्वकयकम्मजणिओ दुरंतचउगइदुहावहो एस । ही विसमो भववाही देहीणं दुन्निवारो य ॥ १ ॥

व्याख्या—देहिनां संसारव्याधि—र्वर्त्तते इति योगः, कीदृशः? 'पूर्वकृतकर्मजनितो' जन्मान्तरोपात्तदुष्कृतापथ्योत्पादितः, इति कारणमुक्त—मथ तत्कार्यमाह—'दुरन्तानि' दुष्टावसानानि यानि 'चतुर्गतिदुःखानि' तान्यावहति करोतीति दुरन्तचतुर्ग-

मार्गदर्शक – आचार्य श्री सुविधिसागर जी महाराज

तिदुःखावहः, एष प्रत्यक्षतोऽनुभूयमानः, 'हीति' खेदे, विषमस्तीव्रसन्निपातवत् सामान्यसदुपदेशौषधमात्रासाध्यः, अत एव वक्ष्यति, 'दुर्निवारो' महाकृच्छ्रनिवर्त्तनीयश्च, 'भवव्याधिः' संसाररोगः, 'देहिनां' प्राणिनामिति गाथार्थः ॥ १ ॥

अथैतद् व्याधिकृतं दुःखमभिधाय तदुपशमकं धर्मौषधं गाथाद्वयेनाह—

इमिणा किलिस्सिऊणं सुइरं चुलसीतिजोणिलक्खेसु ।
जुगसमिलाजोगसमं लहिउं कह कह वि मणुयत्तं ॥ २ ॥

व्याख्या–'अमुना' संसारव्याधिना 'क्लिशित्वा' गाढं क्लेशमनुभूय, 'सुचिरम्' अनन्तकालं, कुत्र कुत्रेत्याह–'चतुरशीतियोनिलक्षेषु' योनय उत्पत्तिस्थानानि तासां लक्षाः शतसहस्राणि चतुर्भिरधिका अशीतिः, चतुरशीतिश्च ता योनिलक्षाश्च तत्र, ताश्चैवं–"पुढवि–दगँ अगँणिमारुय एक्केक्के सत्तजोणिलक्खाउ । वणपत्तेयं अणंते" दस चउदस जोणिलक्खाउ ॥१॥ सर्वेऽपि २४। विगलिंदिएसु दो दो (द्वित्रिचतुरिन्द्रियेषु सर्वेऽपि षट्), चउरो चउरो य नारयसुरेसु, (सर्वेऽपि ८) तिरिएसु हुंति चउरो ४ चउदसलक्खा य १४ मणुएसु ॥२॥" ननु पृथिव्यादीनां प्रत्येकमसंख्येयत्वात् कथं सप्त सप्तैव योनिलक्षाणि, यतः सर्वेषां भिन्नभिन्नान्येवोत्पत्तिस्थानानि, इति चेदुच्यते, समवर्णादिसमेतानामुत्पत्तिस्थानानामेकत्वेन गणनात्, ततश्च सहस्रलक्षकोटिसंख्या अप्येकयोनिका एव ते, तथा चोच्यते–"समवन्नादिसमेया बहवो वि हु जोणिलक्खभेयाउ । सामन्ना घेप्पंती एक्कगजोणीए गहणेणं ॥ १ ॥" एवं च संभवत्येव यथोक्तं योनिमानमिति, ततश्च 'युगसमिलायोगः' पूर्वोक्त एव तेन 'समं'

तुल्यं महाकृच्छ्रप्राप्यत्वेन, लब्ध्वा कथं कथमपि तीव्रतरकर्मक्षयोपशमवशेन, मनुजत्वं प्रसिद्धमेवेति गाथार्थः ॥ २ ॥

यथा हि रोगी रोगोद्भवसमयातिक्रान्तौ प्राप्त एव योग्यसमये औषधं लभते, एवं जीवोऽपि लब्धमनुष्यत्व एव विशिष्टधर्मोपदेशयोग्य इति धर्मौषधविधानोपदेशमाह—

सव्वन्नुसव्वदंसीहिं दंसियं सव्वभवबंधूहिं । सव्वाहिवाहिहरणं सम्मं धम्मोसहं कुणह ॥ ३ ॥

व्याख्या–धर्मौषधं कुरुत इति योगः, कीदृशमित्याह–सर्वं समस्तं सूक्ष्मव्यवहितविप्रकृष्टं वस्तु जानन्ति विशेषरूपतया बुध्यन्ते इति सर्वज्ञाः, एवमेव सर्वं पश्यन्ति सामान्यरूपतयापि विलोकन्ते इति सर्वदर्शिनः, ततश्च सर्वज्ञाश्च ते सर्वदर्शिनश्च [ते] इति कर्मधारयः, तै–र्दर्शित–मादौ उद्दिष्ट–मनेन ज्ञानसंपदुपदेष्टुरुक्ता, तथा 'सर्वभव्यानां' समस्तयोग्यपुरुषाणां बन्धुभिरिव बन्धुभिः हितैरित्यर्थः । अनेन कारुण्यसम्पदुक्ता, सम्यग्ज्ञानवानपि अहितो न सम्यगुपदिश्या–दिति द्वयग्रहणं, कीदृशं तदित्याह–सर्वे आधयो मानस्यः पीडा व्याधयः शारीरबाधाः तेषां हरणम्–अपनायकं, 'धर्मौषधं' धर्मानुष्ठानागदं, सम्यग् यथोपदिष्टनीत्या, कुरुत यूयमिति, द्रव्यौषधमपि ज्ञानकारुण्यवता आत्रेयमुनिप्रभृतिनादौ उपदिष्टं सम्यक् क्रियमाणं व्याधिहरं भवतीति भाव इति गाथार्थः ॥ ३ ॥

आदौ तथाविधपुरुषधौरेयोपदिष्टमपि सांप्रतिकोपदर्शकमन्तरेण न ज्ञायते, अतस्तदुपदर्शकेषु आज्ञाविलंघनपरिहारेण तत्करणमाह—

तस्सोवएसयाणं आणं च गुरूण भावविज्जाणं । सम्ममणइक्कमंता जहोचियं जयह सव्वत्थ ॥ ४ ॥

व्याख्या–'तस्य' धर्मौषधस्य उपदेशकानां सांप्रतं गुरूणां च चतुर्दशपूर्वविदां शेषयुगप्रधानादीनां 'भाववैद्यानां' भावरोगनिवर्त्तकभिषजां वाग्भटादिद्रव्यवैद्यतुल्यानां चाज्ञामुपदेशमनाक्रामन्तोऽनुल्लंघयन्तः, सम्यग् यथोचितमौचित्यानुसारेण, यतध्वं सर्वत्र धर्मौषधकरणे सोद्यमा भवत, अयमभिप्रायः–आदौ सर्वज्ञैरुपदिष्टेऽपि विशिष्टोत्सर्गादिरूपे धर्मे यत् पाश्चात्यगुरुभिर्देशकालसंहननाद्यौचित्येन दर्शिततदाज्ञाया अलंघनीया सर्वं कर्तव्यं [illegible]दिति भावः, रोगिणोऽपि सांप्रतिकानेव वाग्भटप्रभृतीननुसरन्तीति भाव इति गाथार्थः ॥ ४ ॥

किंच द्रव्यरोगवैद्या अपि रोगप्रतिक्रियाविशेषमारभमाणाः तस्य महानिद्राविषयासङ्गं क्रोधाद्युद्भवं च निषेधन्ति, एवमिहापि धर्मौषधप्रयोगप्रारम्भे महामोहादयस्त्रयोऽपि निषेध्या, इति प्रथममहामोहनिषेधमाह—

**पडिहयनिम्मलबोहं पयडियकुग्गहकलंकसंदोहं । भवतरुवरपारोहं उम्मूलह लहु महामोहं ॥ ५ ॥**

व्याख्या–भोः श्राद्धाः! उन्मूलयत महामोहमिति योगः, कीदृशं? 'प्रतिहतनिर्मलबोधं' विध्वस्तविमलविवेकं, तदुदये तस्याभावात्, तथा 'प्रकटिता' व्यक्ततया प्रकाशिताः 'कुग्रहकलङ्कसंदोहाः' कदभिनिवेशमालिन्यसमूहा येन स तथा तं, न हि महामोहादन्यत्कुग्रहे निदानम्, अत एव 'भवतरुवरस्य' संसारमहाद्रुमस्य 'प्रारोहम्'–अङ्कुरं, यत एतस्मात् कुग्रहस्ततः संसार इत्यङ्कुरत्वम्, 'उन्मूलयत' उत्खनत, 'लघु' शीघ्रं, 'महामोहं' तीव्रतरचतुर्थकर्मोदयाविर्भूतकुटुम्बादिप्रतिबन्धमिति गाथार्थः ॥५॥

विषयतृष्णानिषेधमाह—

**दुहतरुतरुणलयाए भवजलहिनिवासहेउभूयाए । रुंधह विसविरसाए विसयतिसाए सया पसरं ॥ ६ ॥**

द्वादश-कुलकम्। ॥ ६४ ॥

व्याख्या–दुःखमेव तरुस्तद्विषये तरुणलता विस्तारहेतुत्वेन प्रथमशाखा तस्याः, तथा 'भवजलधौ' संसारसमुद्रे निवासोऽवस्थानं तस्य 'हेतुभूतायाः' कारणरूपायाः, अत एव 'विषविरसायाः' कालकूटवदत्यन्तकटुविपाकाया 'विषयतृष्णायाः' कामपिपासायाः, 'सदा' प्रसरं विस्तारं रुन्ध्वं निषेधत, एतन्निरोधे हि धर्मौषधविधानोपकार इति गाथार्थः ॥ ६ ॥

अष्टमं कुलकम्। ८

अथ कषायलक्षणतृतीयनिषेध्यनिषेधमाह–

जणियसमत्थअणत्थे सव्वजगुव्वेयगे हयविवेगे। दुग्गइगमणसहाए जिणह कसाए पिसाए व्व ॥ ७ ॥

व्याख्या–'जयत' वशीकुरुत कषायपिशाचान् प्रसिद्धान्, कीदृशान्? 'जनितसमस्तानर्थान्' उत्पादितात्मघातपरघातादिनिःशेषव्यसनान्, अत एव 'सर्वजगदुद्वेजकान्' समस्तलोकोद्वेगहेतून्, को हि एवंविधेभ्यो नोद्विजते, तथा 'हतविवेकान्' प्रध्वस्तहिताहितविचारान्, तथा 'दुर्गतिगमने' नरकादिप्राप्तौ सहायान् साहाय्यकारिणः, 'पिशाचानिव' महारौद्रत्वेनेति गाथार्थः ॥ ७ ॥

अथ एषां विशेषपरिहार्य्यत्वेन प्रत्येकं तत्स्वरूपं गाथात्रितयत्रितयेनाभिधास्यन् प्रथमं तावत् क्रोधवतः सगुणस्यापि अनाश्रयणीयतामाह–

विमलगुणपरिगयं पि हु कोवपरं को जणं समल्लियइ। फुरियफणामणिकिरणं व घोरमासीविस भुयंगं ८ ॥ ६४ ॥

व्याख्या–'विमलगुणपरिगतमपि' निर्मलौदार्यगाम्भीर्यादिस्वभावसमन्वितमपि आस्तां तदितरमित्यपेरर्थः। 'हु' पूरणे।

'कोपपरं' समुत्कटक्रोधप्रधानं 'जनं' लोकं कः पुरुषादिः 'समालीयते' आश्रयति, सुखार्थी न कोपीत्यर्थः। अत्रोपमानमाह–'स्फुरिता' चञ्चलिताः फणामणिकिरणाः–स्फटारत्नोद्योता यस्य स, तथा (तं)। चेत्युपमानम्, अनेन तस्य गुणवत्त्वमुक्तं, तादृशमपि 'घोरं' कृष्णातिदीर्घत्वादिना रौद्रं, तथा आशीस्तालुगता दंष्ट्रा यया विद्धो न जीवतीति, तत्र विषं यस्य स तथा तम्, अनुस्वारलोपः प्राकृतत्वाद्, 'भुजङ्गं' सर्पमिति विशेष्यपदं, यथासौ सगुणोऽपि दूरेण त्यज्यते, तथा क्रोधनोऽपीति गाथार्थः ॥ ८ ॥

अथ तस्यैव विकृताकारत्वं गाथाद्वयेनाह—

घडिउब्भडभिउडीभंगभासुरो भमिरतंबिरच्छिजुओ ।
वियडविडंबियवयणो सिढिलकडिल्लो सुदुप्पिच्छो ॥ ९ ॥

कयगहिरविरससद्दो विसंठुलगई य सिजिरसरीरो ।
कोहमहग्गहगहिओ होइ नरो लोगभयजणगो ॥ १० ॥

व्याख्या–क्रोधग्रहगृहीतो भयजनको भवतीति सम्बन्धः, कीदृशः? यतः 'घटिता' रचिता 'उद्भटा' अत्युत्कटा या 'भ्रुकुटी' ललाटप्रदेशे रेखात्रयादिलक्षणा, तस्या 'भङ्गो' वक्रादिरूपः तेन 'भासुरो' दीप्रो रौद्र इति यावत्, तथा भ्राम्यदतिचञ्चलं

ताम्रमारक्तमक्षियुगलं लोचनद्वन्द्वं यस्य स तथा। तथा 'विकटं' विस्तीर्ण्णं 'विडम्बितं' प्रसारितं 'वदनं' मुखं येन स तथा। तथा 'शिथिलं' नष्टबन्धत्वेन पतदिव कटिल्लमधो वसनं यस्य स तथा, अत एव सुष्ठु अतिशयेन 'दुष्प्रेक्ष्यः' पिशाचाकारधारित्वाद् दुर्निरीक्ष्यः ॥९॥ तथा 'कृतो' विहितो गम्भीरोऽव्यक्तध्वनिरूपतया दूरगामी 'विरसः' परुषार्थाक्षरतया श्रोत्रकटुः 'शब्दः' स्वरो येन स तथा। तथा 'विसंस्थुला' अर्द्धवितर्द्धतयाऽसरला गतिर्गमनं यस्य स तथा, चशब्दोऽनुक्तसमुच्चये, तेनानुक्तकम्पादिमत्त्वपरिग्रहः, 'सिज्जिरं' स्विद्यमानं 'शरीरं' वपुर्यस्य स तथा, एवं च क्रोध एव विकृताकारकारित्वान्महाग्रहः प्रौढपिशाचादिः तेन गृहीतोऽधिष्ठितः सन् पु(प)रुषो भवति, नरो लोकभयजनक इति प्रसिद्धमेवेति। अत्र च गाथात्रयरूपे क्रोधनिन्दावाक्ये 'परिणतिविरसं पनसमिति वाक्यवत्' क्रोधपरिहारे तात्पर्यम्, एवं वक्ष्यमाणमानमायानिन्दावाक्ययोरपि परिहारे तात्पर्यं द्रष्टव्यमिति गाथार्थः ॥ १० ॥ अष्टमं कुलकम्। ८

अथ मानवतो गुणवतोऽपि लघुतापत्तिमाह—

**अइपंडिओ वि अइबहुगुणो वि अइसुद्धवंसजाओ वि। कुणमाणो माणं माणवो लहुं लहइ लहुयत्तं ११**

व्याख्या—'अतिपण्डितोऽपि' त्रैविद्यशिरःशेखरोऽपि, तथा धैर्यौदार्याद्यपेक्षयाऽत्यन्तबहुगुणोऽपि, तथा 'अतिशुद्धवंशजातोऽपि' सर्वथा निःकलङ्कक्षत्रियादिसन्तानोत्पन्नोऽपि, 'कुर्वाणो' विदधानो 'मानम्' आत्मप्रशंसादिना स्वोत्सेकं, 'मानवः' पुरुषो 'लघु' शीघ्रं तदैवेत्यर्थः। 'लभते' प्राप्नोति, लघुत्वं स्वश्लाघाजनितगौरवाभावरूपम्, अत्र च त्रिष्वपि विशे- ॥ ६२ ॥

पणेषु अपिशब्दा विस्मयार्थाः तेन महदद्भुतमेतद् यदेवंविधोऽपि लघुतामासादयतीति भाव इति गाथार्थः ॥ ११ ॥

किंच स्वोत्सेकवतामिह लोकेऽपि आत्मकार्यासाधकत्वमेवाह—

**परपरिभवमत्तुक्करिसमसरिसकुलग्गया वि कुव्वंता। सयलजणुव्वियणिज्जा न सकज्जं किंचि साहिंति ॥१२॥**

व्याख्या–परेषां 'परिभवः' तिरस्कारस्तं, तथा 'आत्मोत्कर्षम्' आत्यन्तिकमहंकारं च, चशब्दो लुप्तो द्रष्टव्यः, 'असदृशकुलोद्गता अपि' निरुपमगुणगोत्रसंभूता अपि, आस्तां तदितरे, 'कुर्वाणा' विदधानाः, सकलजनस्य न तु कस्यचिदेव 'उद्वेजकाः' उद्वेगकारिणः, तथाहि–ये परिभूयन्ते येभ्यश्चात्मानमुत्कर्षयत्यसौ, ते तत्पक्षपातिनश्च सर्वेऽप्युद्विजन्ते, उद्विग्नजनाश्च 'न' नैव 'स्वकार्यं' निजप्रयोजनं किंचित् किमपि स्वल्पमपि 'साधयन्ति' निष्पादयन्ति, जनानुरागप्रभवत्वात् तस्य, तथा चोच्यते–"जनानुरागप्रभवा हि संपद" इति गाथार्थः ॥ १२ ॥

एवमैहिकं मानदोषमभिधाय, अथ पारलौकिकं तमाह—

**नीयागुत्तं गाढं समज्जिउं परभवे पुणो सुइरं । सव्वजणगरहणीया नीयासु हवंति जाईसु ॥ १३ ॥**

व्याख्या–यदुदयाद् गुणवतोऽपि प्रशंसादिकं न संपद्यते, 'तन्नीचैर्गोत्रम्' । अथवा संकीर्णकुलादिकं नीचैर्गोत्रं, तत्समर्ज्य मानविधानादुपार्ज्य, 'गाढं' तीव्रम् अवश्यवेद्यं, 'परभवे' जन्मान्तरे, पुनर्भूयोऽपि 'सुचिरं' बहुकालं, 'नीचासु' अस्पृश्यादिरूपासु 'जातिषु' चाण्डालाद्यशुद्धमातृपक्षरूपासु, 'सर्वजनगर्हणीयाः' समस्तलोकनिन्दापात्रतामुपगता 'भवन्ति'

द्वादश-
कुलकम् ।

॥ ६६ ॥

जायन्ते, अयमभिप्रायः–एकं तावदिदमेवायुक्तं यन्नीचजातिलाभः तत्रापि दग्धोपरि स्फोटकप्राप्तिकल्पा सर्वजननिन्द्यता इति भाव इति तृतीयगाथार्थः ॥ १३ ॥

अथ मायावत ऐहिकं सर्वाविश्वसनीयत्वं दोषमाह—

दंभपरो लहइ नरो कूडोत्ति सढुत्ति लोयवयणिज्जं । निच्चमवीससणिज्जो य होइ सप्पु व्व सुद्धो वि ॥१४॥

व्याख्या–'दम्भपरो' मायाविशेषप्रधानः शाठ्येन धर्माचरणं दम्भ इति वचनात्, लभते 'नरो' मनुष्यो लोके वचनीयत्वं लोकवचनीयत्वं निन्द्यत्वमित्यर्थः, कथमित्याह–'कूट' इति अलीकभाषी अयमिति, तथा 'शठ' इति परवञ्चनाप्रवण इत्येवंरूपं, तथा 'नित्यं' सर्वदा [illegible] कदाचिदेव अविश्वसनीयश्च [illegible] सर्वथा अग्राह्यवचनश्च, चकारोऽधिकतरदोषसमुच्चयार्थः, ननु सर्वदासौ शठ एव भविष्यतीत्यत आह, 'शुद्धोऽपि' सर्वथा शाठ्यविकलोऽपि आस्तामशुद्ध इत्यपेरर्थः, सर्प इवेत्युपमानं, यथा हि असौ कदाचिद् गारुडिकादिना निर्विषीकृतोऽपि न विश्वसनीयो भवति, एवं शठोऽपि कदाचित् तद्दोषदर्शनात् ततो निवृत्तोऽपीति गाथार्थः ॥ १४ ॥

शठस्योभयलोकदोषमप्याह—

मायापरस्स मणुयस्स झत्ति विहडंति बंधुमित्ता वि ।
अस्संखतिक्खदुक्खे मयस्स उ ठिई तिरिक्खभवे ॥ १५ ॥

अष्टमं
कुलकम् ।
८

॥ ६६ ॥

व्याख्या–'मायापरस्य' शठस्य मनुष्यस्य 'झटिति' शीघ्रं 'विघटन्ति' निःस्नेहतया विमुखीभवन्ति, बन्धवश्च मित्राणि चेति द्वन्द्वः तेपि सुस्निग्धा अपि आस्तां भृत्यादयः, एवमैहिकं दोषमभिधाय अथ पारलौकिकमप्याह–जीवतस्तावदेवं स्वजनमित्रविमुखतादयो मृतस्य तु विपन्नस्य सतः पुनः स्थितिरवस्थानं वासस्तिर्यग्भवे छागकुकुटतित्तिरिप्रभृतिके, तत्रापि कीदृश इत्याह–असंख्यातानि संख्यातिक्रान्तानि तीक्ष्णानि अत्यन्तदुस्सहानि जीवत एव सर्वथा त्वगपनयनाग्निपाकादीनि दुःखानि यत्र तत्र, तत्रापि प्रायः स्त्रीत्वेनेति भाव इति गाथार्थः ॥ १५ ॥

किंच मायावतः सकलसाधुक्रियाकलापकरणवैयर्थ्यमपि इत्याह—

सयला वि हु जइकिरिया परमपयपसाहिगा वि बहुसो वि ।
कवडेन कया न कुणइ मुक्खाणुगुणं गुणं कमवि ॥ १६ ॥

मार्गदर्शक आचार्य श्री सुविधिसागरजी महाराज

व्याख्या–'सकला' समस्तापि आस्तां तदेकदेशो हुः पूरणे 'यतिक्रिया' प्रत्युपेक्षाप्रमार्जनादिकमिच्छामिच्छेत्यादिकं च साध्वनुष्ठानं, कीदृशी ? स्वभावत एव 'परमपदप्रसाधिका' अक्षेपमोक्षजनिकाऽपि, अन्यादृशी हि कदाचिन्न कुर्यादपि 'मोक्षानुगुणं' निर्वाणप्राप्त्यनुकूलं गुणमुपकारं कर्मक्षयविशेषलक्षणं कमपि स्तोकमपि, कथं कृता ? 'बहुशो' अनेकशः, एकवारादिकरणे हि कदाचित्प्रमादादिनाऽन्यथापि स्यात् अत उक्तं बहुशोऽनेकशोऽप्रमादपरेणापि, कीदृशेन कृता ? 'कपटेन' मायाविना पुरुषेण, अथवा केन कारणेन कपटेन मायया, अयमभिप्रायो–अक्षेपमोक्षसाधिकाऽपि यतिक्रिया मायया प्रतिहतशक्तिः

द्वादश-कुलकम् । ॥ ६७ ॥

अष्टमं कुलकम् । ८

सर्वथा न तदनुगुणत्वं भजेत्, तथा चोक्तं षष्ठाङ्गविवरणे–"उग्गतवसंयमवओ पगिट्ठफलसाहगस्स वि जियस्स। धम्मविसया(ए) वि सुहुमा वि होइ माया अणत्थाय ॥ १ ॥ जह मल्लिस्स महाबलभवम्मि तित्थयरनामबंधेऽवि । तवविसयथो(थे)वमाया जाया जुवइत्तहेउ त्ति ॥ २ ॥" परलोकमतिनिरुद्धा माया तस्मात् परिहार्या इति तात्पर्यमिति गाथात्रयार्थः ॥ १६ ॥

अथासंतोषरूपस्य लोभस्य दोषमाह—

**सयलवसणिक्ककोसो सुहरससोसो जओ अरइपोसो । नासियतोसो तो सो बहुदोसो ही असंतोसो १७**

व्याख्या–'सकलव्यसनैककोशः' समस्तचौर्यराज्याङ्ग्याद्यापदामेकोऽद्वितीयः 'कोशो' भाण्डागारं, समस्तानां तेषां तत्र प्राप्तेः, 'शुभं' कल्याणं सुखं वा प्रमोदः स एव 'रसो' जलं तस्य शोष इव शोषो रिक्तीकरणं, तावदेव शुभं सुखं वा यावदस्य सन्तोष इति, तथा चोच्यते–'संतोषामृततृप्तानां यत्सुखं शान्तचेतसाम् । कुतस्तद् धनलुब्धानामितश्चेतश्च धावताम् ॥१॥' तथा 'नाशिततोषो' ध्वस्तसन्तोषोऽसंतोषो भावाभावयोरिव तयोः परस्परनिषेधात्मकत्वात्, तथा यतः कारणात्, अरते-रसुखस्य पोषो वृद्धिः तद्धेतुत्वात्, 'तो' इति तत् तस्मात् कारणात्, 'स' इति असंतोषो 'बहुदोषः' प्रभूतरागद्वेषप्राणिवधा-दिहेतुत्वात् अनेकानर्थः । 'हीति' खेदे, 'असंतोषो' धनधान्यादिषु अविच्छिन्नतृष्णत्वं वर्त्तत इति, तस्मात् त्याज्य इति तात्पर्यमिति गाथार्थः ॥ १७ ॥ ॥ ६७ ॥

अथ लोभानुषक्तौ नरकानुषक्तिमाह—

**उग्गंतरंगरिउसच्छहम्मि लोहम्मि जेऽणुसज्जंति । ते बहुदुहपडिहत्थं हत्थं वंछंति नरयगइं ॥ १८ ॥**

व्याख्या–'उग्रः' प्रचण्डः स चासौ अन्तरङ्गरिपुश्च तेन सदृशे तुल्ये, तत्र पितृपुत्रवधकादयो हि बाह्या एव शत्रवः पुत्रवधादिबाह्यनिमित्तत्वात्, यस्तु पूर्वमतिस्निग्धमित्रत्वेन स्थित्वा पश्चात् कुतश्चित् तीव्रापमानादेः शत्रुत्वेन वर्त्तते सोऽन्तरङ्गः शत्रुः, तस्य कृत्रिमशत्रुत्वेन गरीयस्त्वात् तथा च माघः–"सखा गरीयान् शत्रुश्च कृतिमस्तौ हि कार्यतः। स्याताममित्रौ मित्रे च सहजप्राकृतावपि ॥ १ ॥ इति", ततश्च तस्य सर्वमर्मवित्त्वेन महानर्थहेतुत्वात् कृतिमत्वेनान्तरङ्गत्वं, तादृशे 'लोभे' येऽनुपज्यन्ते तदेकताना भवन्ति, ते तदनुषक्तिव्याजेन परमार्थतो नरकगतिं 'वाञ्छन्ति' अभिलषन्ति, लोभानुषङ्गे तत्प्राप्तेरवश्यंभावित्वात्, कीदृशीं ? 'बहुदुःखपरिपूर्णां' केवलज्ञानैकवेद्यानन्तबाधानिचितां, इत्थमत्यर्थं, न हि तदभिलाषमन्तरेण लोभे रत्याश(स)क्तिरिति भाव इति गाथार्थः ॥ १८ ॥

अथ लोभत्यागोपदेशमाह—

हयसोहं कयमोहं दुहसंदोहं भवप्परोहसमं । विहुयसुबोहं लोहं तो हंतुं होइ जइयव्वं ॥ १९ ॥

व्याख्या–तच्छब्दस्य यच्छब्दापेक्षत्वाद् यत इति शेषः, ततश्च यत एवंविधो लोभस्तस्मात् तं हत्वा धर्मकर्मसु उद्यच्छत इति योगः, कीदृशं लोभं ? 'हता' ध्वस्ता शोभा जनमध्ये छाया येन स तथा तं, कृतो मोहो धनादिषु मूर्च्छा येन स तथा तं, तथा 'दुःखानां' भवान्तरे नानाविधबाधानां 'संदोहः' समूहो यस्मात्, अथवात्रापि भवे निरुपचरितदुःखसंदोहहेतुत्वात् साक्षादेव दुःखसंदोह–स्तं, (तथा) भवस्य संसारस्य मूलोत्पत्तिनिमित्तत्वात् प्ररोहसम–मङ्कुरतुल्यं, (तथा) विधूतो विक्षिप्तः

सुबोधः सम्यग्ज्ञानं येन स तथा तं, यत एवंविधोऽयं लोभः 'तो' इति तस्मात् 'हत्वा' विनाश्य तं, भवति यतितव्यं धर्मकर्मसु इति लोभपरिहारोपसंहारः । अथवा त्रयाणामपि महामोहविषयतृष्णाकषायाणां धर्मौषधविधानप्रत्यर्थिनां परिहारोपसंहार इति गाथार्थः ॥ १९ ॥

अथ गाथापञ्चकेन संसारस्वरूपमभिधाय तत्क्षये प्रमादाभावोपदेशमाह—

तह नियमणत्थनिबंधणं धणं बंधणं व बंधुजणो । कारागिहरा दारा इय कामभोगा महारोगा ॥ २० ॥
जलबुब्बुय व्व सव्वे जीवियजुव्वणधणाइसंबंधा । सुहसाहणमिह सयलं पवणुद्धुयधयवडविलोलं ॥ २१ ॥
सुलहा य पियविओगा अणिट्ठजोगा सुदूसहा रोगा । बंधणधणहरणाणि य वसणाणि य बहुपयाराणि २२
सहजं चिय इत्थ भयं चिंतासंतावसंतई य सया । दोहग्गं दोगच्चं पराणुवित्ती अकित्ती य ॥ २३ ॥
ता धुवमधुवमसारं दुक्खाहारं च मुणिय संसारं । तक्खयकए मइमया न कयाइ पमाइयव्वं ति ॥२४॥

व्याख्या– 'तथा' इति समुच्चये 'नियतं' नियमेन 'अनर्थनिबन्धनं' वधबन्धादिनिधा(दा)नं, किं तद् ? 'धनं' द्विपदचतुष्पदादिर्नवविधः परिग्रहोऽत्र वर्त्तत इति गम्यते, तथा 'बन्धनं व' रज्ज्वादिसंयमनमिव, 'बन्धुजनः' स्वजनवर्गस्तत्स्नेहेन प्रविव्रजिषोरपि कारागृहादिव गृहवासात् निर्गन्तुमशक्तत्वात्, तथा कारा गुप्तिस्तदाकाराः तत्सदृशा दाराः कलत्राण्यपि, तत्प्रतिबन्धादपि गृहात्यागात्, तथा काम्यन्ते इति 'कामाः' शब्दादयः पञ्च, तेषां 'भोगा' आसेवनानि, अथवा रूपशब्दौ कामौ रसा-

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

दयश्चयोऽपि भोगाः ततश्च कामाश्च भोगाश्चेति द्वन्द्वः तेऽपि 'महारोगाः' साक्षात्पामाव्याधय एते, तत्कण्डूयनप्राप्यत्वा-दुपभोगस्येति ॥ २० ॥ 'जलबुद्बुदा इव' प्रकृष्टवृष्टिजायमानसलिलस्फोटका इवास्थिरा इत्यर्थः, सर्वे जीवितयौवनधनादि-सम्बन्धा इति व्यक्तमेव, पूर्वं हि धनस्यानर्थहेतुत्वमुक्तम्, इह तु अस्थिरत्वमिति न पौनरुक्त्यं, 'सुखसाधनं' मोक्षसुखनि-मित्तं सुगुरुसंपर्कादिकमिह जगति 'सकलं' समस्तं, पवनोद्धूतध्वजपटविलोल-मित्यपि व्यक्तमेव ॥ २१ ॥ तथात्र भवे सुल-भाश्च' सुप्रापाः प्रियैर्बान्धवैर्गुर्वादिभिर्वा सह 'वियोगा' विघटनानि, इदं च सुलभपदं वक्ष्यमाणेष्वपि सर्वेषु पदेषु तत्तल्लिङ्गानु-सारेण सम्बन्धनीयं, तथाऽनिष्टैरप्रियैः शत्रुप्रभृतिभिः पाखण्डिप्रभृतिभिर्वा 'योगाः' सम्बन्धाः, तथा 'सुदुःसहाः' तीव्रवेदना-विधायित्वेन सोढुमशक्या 'रोगा' व्याधयो ज्वरभगन्दरादयः, तथा बन्धनं च धनहरणं च द्वे अपि ते प्रसिद्धे तथा 'व्यस-नानि' च विपदो 'बहुप्रकाराणि' नृपचौरज्वलनादिसमुत्थितत्वेन नानारूपाणि सुलभानीत्यर्थः ॥२२॥ तथा 'सहजं चिय' स्वाभा-विकमेवात्र मनुजभवे, 'भयं' सप्तविधमपि, ''इहपरलोयायाणमकम्हाआजीवमरणमसिलोए'', इत्येवंरूपम्, इहापि सहज-शब्दो वक्ष्यमाणेषु सर्वेष्वपि तत्तल्लिङ्गाविरोधेन योज्यः, तथा 'चिन्ता' कुटुम्बभरणानुध्यानं, 'संतापो' द्रव्योपार्जनाद्यर्थप्रवृत्तौ शारीरः खेदः तयोः सन्ततिर्नैरन्तर्यावस्थितिश्च, 'सदा' सर्वकालं, तथा 'दौर्भाग्यं' जनानादेयता, 'दौर्गत्यं' दारिद्र्यं, परानु-वृत्तिर्नित्यं स्वाम्यादिचित्तानुवर्त्तनम्, 'अकीर्त्तिश्च' यत्नशतेन सर्वस्य सर्वदा प्रियकरणाभावादयशश्च, एते च प्रायः सर्वदापि मनुजभवे सहजा एव भवन्ति, यद्यपि च क्वचित् कदाचित् निर्भयत्वसौभाग्यादयोऽपि दृश्यन्ते तथापि अल्पत्वादौपाधि-कत्वाच्च न तेषामिह ग्रहणमिति सहजा भयादय एवेति ॥२३॥ एवं संसारस्वरूपं विज्ञाय तत्क्षये प्रमादो न विधेय इति दर्शय-

ह्याह–'ता ध्रुवमिति', यस्मादुक्तयुक्त्याऽसार एव संसारस्तत् तस्मात् कारणात् 'ध्रुवमध्रुवं च' ज्ञात्वा संसारमिति विरोधाभासः, अथ च ध्रुवं निश्चितं नात्र संदेह इति यावत्, यत् किमध्रुवमस्थिरं सर्वस्य जीवितादेः अस्थिरत्वात्, तथा 'असारं' तुच्छं वैषयिकसुखादेः तथाविधत्वात्, अत एव 'दुःखाधारं' मानसशारीरबाधाश्रयं च ज्ञात्वा परिभाव्य संसारं, तस्य संसारस्य क्षयो ध्वंसस्तत्कृते तन्निमित्तं, 'मतिमता' विवेकिना, 'न' नैव, कदापि सांसारिकप्रयोजनभरेऽपि, प्रमादितव्यं प्रमादो विधेयोऽपि तु तत्क्षयोद्यम एव, इतिः परिसमाप्तौ, अयमभिप्रायो–'ज्ञानस्य फलं विरतिः' इति, तत्स्वरूपे विरूपे ज्ञाते यदि तत्क्षये समुद्यम्यते, तदेव तज्ज्ञानफलमिति गाथापञ्चकार्थः ॥ २४ ॥

एवं सहजभयादिस्वरूपं संसारमभिधाय, अथ तस्य हरणे हेतुमनुष्ठानमाह—

**भवभयहरं च भणियं नियनियगुणठाणगोचियं निच्चं । सदणुट्ठाणं ठाणं कल्लाणाणं समग्गाणं ॥ २५ ॥**

व्याख्या–भो भव्याः ? पूर्वोक्तभवभयहरं तन्नाशकं च भणितं प्रतिपादितं च गणधरादिभिरिति गम्यते, किं तदित्याह–'सदनुष्ठानं' शोभना चैत्यपूजनवन्दनकसामायिकादिकक्रिया, कीदृशं तदित्याह–'निजनिजगुणस्थानकोचितं', 'नित्यं' सर्वदा, श्राद्धस्य हि द्वे गुणस्थानके अविरतसम्यग्दृष्टित्वं देशविरतत्वं च, तत्राविरतस्य देवपूजादिकमुचितं, देशविरतस्य तु सामायिकपौषधोपवासप्रतिक्रमणादिकमुचितं, कीदृशं तदित्याह–स्थानमुपार्जनभूमिः कल्याणानां समग्राणामिति प्रसिद्धमेव, तस्मात् तदनुष्ठानमौचित्ते(त्ये)न क्रियमाणं भवभयहरणहेतुरिति कर्त्तव्यमेवेति भाव इति गाथार्थः ॥ २५ ॥ ॥ ६९ ॥

तत् किमविशेषेण यथा तथा क्रियमाणं भवभयहरमेतन्नैवमित्याह—

तं पुण सुजुत्तिजुत्तं सुसुत्तवुत्तं सुगुरुनिउत्तं च । कुणइ सुनिउणमईणं कम्मक्खयमक्खयपयं च ॥२६॥

व्याख्या—यदनुष्ठानं पूजासामायिकादिकं भवभयहरणमुक्तं, तदपि न यथाकथंचिदिति विशेषयति—तत् पुनरिति, एवंविधमेव सद् भवभयहरं भवति, यत् तावत् '(सु) सूत्रे' गणधरयुगप्रधानादिरचिते शास्त्रे 'उक्तं' प्रतिपादितं, न तु स्मृतिपुराणादौ, तदपि च 'सुयुक्तिभिः' प्रधानोपपत्तिभिर्यद् 'युक्तं' घटमानकं, न पुनरभ्रलद्धादशावर्त्तवन्दनकवद्—घटमानकं, तदपि सुगुरुभिर्गीतार्थाचार्यादिभिर्नियुक्तं च सर्वत्र व्यापारितं, "नवकारेण जहन्ना दंडगथुइजुयलमज्झिमा नेया। संपुन्ना उक्कोसा विहिणा खलु वंदणा तिविहा ॥१॥" इत्यादि त्रिविधचैत्यवन्दनवत् सूत्राद्युक्तत्वेऽपि सुगुरूपदिष्टत्वे तात्पर्य्यं सर्वत्र भावनीयम् । एवंविधं ह्यनुष्ठानं 'सुनिपुणमतीनां' विचारचतुरश्राद्धादीनां, 'करोति' विधत्ते, कर्मक्षय—मात्यन्तिकक्लेशविगमं, ततश्च 'अक्षयपदं' शाश्वतसुखावाप्तिरूपं शिवमिति गाथार्थः ॥ २६ ॥

शुभानुष्ठानं च दुर्लभमिति दृष्टान्तेनाह—

तं पि सुहाणुट्ठाणं रागद्दोसविसपसममंतसमं । दुलहं पि काकतालीयनायओ कहवि जइ पत्तं ॥ २७ ॥

व्याख्या—यत् कर्मक्षयहेतुत्वेनोक्तं 'तदपि सदनुष्ठानं' कीदृशमित्याह—'रागद्वेषौ' एव विशिष्टचैतन्यापहारित्वाद् 'विषं' गरलं तस्य प्रशमो माहात्म्याभावापादनं तत्र 'मन्त्रसमं' विद्याविशेषतुल्यम् इदं, यथा मन्त्रेण विषमुपशम्यते तथा सामायिका-

द्वादश-कुलकम्। ॥ ७० ॥ अष्टमं कुलकम्। ८

ध्यनुष्ठानेन रागद्वेषाविति, स्वरूपविशेषणं चैतत्, तथा 'दुर्लभं' दुःप्रापमपि चैतत् कथमपि महता कृच्छ्रेण यदि चेद् भवद्भिः प्राप्तं लब्धं, केन [दुर्लभं] 'काकतालीयन्यायेन' (ज्ञातेन) इति, तालवृक्षो हि संवत्सरशतेन फलतीति लोकप्रसिद्धिः। तस्य च फलं परिपक्वं सत् कदाचित् पतति तस्य च पततोऽधस्तात् कथंचिद् दैवात् काक आगच्छति, स च तद्घातवशात् विपद्यते, ततश्च काकश्च तालं चेति काकतालं यथा कथंचिद्व्रजतः काकस्य निपतता तालेन अतर्कितोपनतश्चित्रीयमाणः संयोगो लक्षणया काकतालशब्देनोच्यते, तत्तुल्यं काकतालीयं, तच्च तज्ज्ञातं च दृष्टान्तः काकतालीयज्ञातं, ततः काकतालीयज्ञाततो वेति गाथार्थः ॥ २७ ॥

एवं सुदुःप्रापेऽपि शुभानुष्ठाने प्राप्ते केषांचिद् वितथाचरणाभिमानो भवति, स चायुक्त इति तान् शिक्षयितुमाह—

ता तत्थ सुगुरुकहिए गीयत्थसमत्थिए जइक्कहिए। वितहाभिनिवेसो खलु न खमो कल्लाणकामाण २८

व्याख्या—यतो दुःप्रापमिदं प्राप्तं ततस्तत्र शुभानुष्ठाने, 'सुगुरुभिः' शोभनाचार्यैर्भद्रबाहुप्रभृतिभिः 'कथिते' प्रथमत उपदिष्टे, तथा 'गीतार्थैः' पाश्चात्यैरपि वैरस्वाम्यार्य्यरक्षितहरिभद्रसूरिप्रभृतिभिः 'समर्थिते' युक्ततयोपदर्शिते, एतच्चाद्य यावत् संपूर्णचैत्यवन्दनमुखवस्त्रिकाद्वादशावर्तवन्दनकादिप्रवृत्तिदर्शनादेवानुमीयते, कीदृशे? यतः 'जगदेकहिते' समस्तजनात्यन्तानुकूले, यथावस्थितानुष्ठानप्रवृत्तिर्हि न कदाचित् प्रतिकूला भवतीति भावः। यः पुनरेवंविधेऽपि अनुष्ठाने केषांचिद् गुरुकर्मणां 'वितथाभिनिवेशो' वैपरीत्येन करणाग्रहो यथा शक्रस्तवमात्रेण श्राद्धानां चैत्यवन्दनम्, अञ्चलेनैव वन्द- ॥ ७० ॥

नकमित्यादिः, स खलु निश्चयेन न क्षमो न युक्तः 'कल्याणकामानां' शुभार्थिनां शिवार्थिनां वा, अपि तु संसाराभिनन्दिनामिति गाथार्थः ॥ २८ ॥

यद्येवमाभिनिवेशिकी प्रवृत्तिरनर्थाय तर्हि कथं प्रवर्त्तयितव्यमित्यत आह—

किं तु भववासणासणहेऊ जिणसासणं पि हु लहेउं । तत्थ न्नत्थ य सम्मं जइयवं भावसुद्धीए ॥ २९ ॥

व्याख्या–'किन्तु' इति पूर्वस्माद् व्यतिरेकार्थः तेन नाभिनिवेशेन प्रवर्त्तयितव्यं शुभानुष्ठानेऽपि, किं तु प्रत्युत 'जिनशासनं' तीर्थकरप्रवचनम्। अपिः भिन्नक्रमः, तेन लब्ध्वा प्राप्यापि भावशुद्ध्या यतितव्यमिति सम्बन्धः, कीदृशः (शं)? 'भववासनाशनहेतुं' संसारावस्थितिध्वंसकारणं, न हि ततोऽपि अन्यत्कुप्रवचनादिकं संसारच्छेदहेतुरिति भावः। 'तत्रेति' शुभानुष्ठाने वन्दनकादौ 'अन्यत्र च' विशुद्धवेशवचनादौ, 'यतितव्यं' यत्नेन प्रवृत्तिः कार्या, कयेत्याह–'भावस्य' परिणामस्य शुद्धिर्निर्मलता तया, न पुनरभिनिवेशादिदूषितया, भावशुद्धिमन्तरेण सर्वस्यापि अनर्थकत्वादिति भाव इति गाथार्थः ॥ २९ ॥

ननु ये शक्रस्तवपाठमात्रेण चैत्यवन्दनादिकमिच्छन्ति तेऽपि तीर्थकरभक्त्यतिशयेन भावशुद्धिमन्त एव तत् किं सापि भावशुद्धिस्तात्त्विकी नेत्याह—

सा पुण नेया मग्गानुसारिणो पयइसुद्धचित्तस्स । गीयत्थाणारुइणो पन्नवणिज्जस्स सद्धस्स ॥ ३० ॥

व्याख्या–भावशुद्ध्या शुभानुष्ठाने यतितव्यमित्युक्तं, सा पुनर्भावशुद्धिश्चित्तनिर्मलता 'ज्ञेया' ज्ञातव्या, कीदृशस्य पुरुष-

स्येत्यत आह–'मार्ग्गानुसारिणः' सम्यग्ज्ञानादिसत्पथचारिणो, न तु अभिनिवेशभाजः, तथा 'प्रकृत्यैव' स्वभावेनैव उपदेशमन्तरेणापि 'शुद्धचित्तस्य' मिथ्यात्वकषायाद्यदूषितमनसः, तथा 'गीतार्थाः' शुद्धसिद्धान्तचारिणः तेषामाज्ञा प्रवर्त्तकं वाक्यं तत्र रुचिरभिलाषो यस्य स तथा तस्य तथा 'प्रज्ञापनीयस्य' अनाभोगादिना कथंचिदन्यथा प्रवृत्तावपि सुखसंबोध्यस्य, तथा चोक्तं–"भावशुद्धिरपि ज्ञेया यैषा मार्ग्गानुसारिणी । प्रज्ञापना प्रियात्यर्थं न पुनः स्वाग्रहात्मिका ॥१॥" तथा 'श्राद्धस्य' सद्गुरूपदिष्टभावश्रद्धानवतः, एवं गुणवत एव तत्त्वतो भावशुद्धिः तीर्थकरात्यन्तभक्तिश्च, शेषस्य तु आज्ञाविराधकत्वेन व्यवहारिकभक्तिमतोऽपि तत्त्वतो मिथ्यादृष्टित्वात्, तथा चोच्यते–"जो जहवायं न कुणइ मिच्छद्दिट्ठी तओ हु को अन्नो । वड्ढेइ य मिच्छत्तं परस्स संकं जणेमाणो ॥ १ ॥" इति गाथार्थः ॥ ३० ॥

तद्विपरीतस्य तु तत्त्वतो भावशुद्ध्यभावमाह–

**इयरस्स उ समइकया कुग्गहरूवा य सा अणिट्ठफला । मिच्छत्तओ चिय फुडं जियाण जं कुग्गहो होइ ३१**

व्याख्या–'इतरस्य तु' सम्यग्ज्ञानादिविकलस्य, 'स्वमतिकृता' आत्मीयविकल्पमात्रनिर्मिता, न पुनरागमानुसारिणी सा शक्रस्तवादिपाठमात्ररूपचैत्यवन्दनादिक्रियानिमित्ता भावशुद्धिः, कीदृशी सा? इत्याह–'कुग्रहरूपा च', चशब्दस्यावधारणार्थत्वात् केवलाभिनिवेशस्वरूपैव, यतो जीवाभिगमादौ विजयदेवादीनां महाप्रमादवतां शक्रस्तवेन चैत्यवन्दनाश्रुतेः, श्रावकाणामपि तथाविधानकल्पनं स्वमत्या क्रियते तैर्न पुनः सिद्धान्ते क्वापि तन्मात्रमेव श्राद्धानां युक्तमित्युक्तमस्ति, ततश्च 'अनिष्टफला' ॥ ७१ ॥
दुर्गतिप्रापणविपाकैव, किमित्येवमित्याह–'मिथ्यात्वादेव' मोहनीयात्यन्तदुष्टप्रकृते–रेव, 'स्फुटं' निश्चितं, 'जीवानां' प्राणिनां

'यद्' यस्मात् कारणात् 'कुग्रहो'ऽभिनिवेशो भवति, ततोऽयमपि कुग्रह इत्यवश्यमनिष्टफलैव इति भाव इति गाथार्थः ॥३१॥

अथोपसंहरन्नुपदेशसर्वस्वमाह—

ता रागचागकुग्गहनिग्गहपुव्वं तहा पयइयव्वं । जह लोएऽणुवहासं गुणवल्ली लहइ उल्लासं ॥ ३२ ॥

व्याख्या—यतो भावशुद्ध्यैव क्रियमाणं शुभानुष्ठानं फलवद् भवति, 'तत्' तस्मात् कारणात् तथा प्रयतितव्यं, यथा गुणवल्ली लभते उल्लासमिति योगः, कथं यतितव्यमित्याह—रागोऽस्मत्पूर्वजैः इदमित्थमुपदर्शितमिति वितथानुष्ठानेऽपि गाढः प्रतिबन्धः तस्य 'त्यागः' परिहारः, तथा कुग्रहः पूर्वोक्तः शक्रस्तवमात्रचैत्यवन्दनाभिनिवेशादिः तस्य 'निग्रहः' सर्वथा प्रतिषेधः, ततश्च रागत्यागश्च कुग्रहनिग्रहश्चेति द्वन्द्वस्तौ पूर्वौ यत्र तत् तथेति क्रियाविशेषणं चैतत्, कुग्रहवद् रागस्यापि भावशुद्धिदूषकत्वमिति उपसंहारे रागत्यागोऽपि उपदर्शितः, तथेति तेन भवाभिनन्दिजनोत्सूत्रप्रवृत्तिवैमुख्यप्रकारेण प्रकर्षेणातिशयेन 'यतितव्यं' शुभानुष्ठाने प्रवर्त्तितव्यं, यथा येन सुयत्नप्रवर्त्तनप्रकारेण 'लोके' शिष्टजनेऽनुपहासम् उत्प्रासाभाववद् यथा भवति एवं, 'गुणवल्लीति' सम्यक्त्वादिगुणा एव प्रतिदिनप्रवर्द्धनसाम्यात् वल्ली लता, सा लभते समासादयति, 'उल्लासं' विस्तारम्, अयमभिप्रायः—श्रुतोपदर्शितनीत्या चैत्यवन्दनवन्दनकादौ प्रवर्त्तमानानां लोके लोकोत्तरे च प्रशंसनीयता धर्मश्च भवति, तद्वैपरीत्येन च जातमृतकसूतकापरिहाररजस्वलादेवगृहगमनादिप्रवृत्ति—र्लोकोपहासायाधर्माय च भवति, न च लोकोत्तरमार्गस्थितानामस्मदादीनां किं लौकिकशुद्ध्यपेक्षयेति वाच्यं, यत उक्तमागमे—"लोउत्तरम्मि य ठिया न लोयनिवाहिरत्तमिच्छंति । लोयजढे परिहरया तित्थविवड्ढी य विन्नेया ॥ १ ॥" तथा साध्वपेक्षयाप्युक्तम्—"अयसो

पवयणहाणी विप्परिणामो तहेव य दुगुंछा । लोइयठवणा कुलेसु गहणे आहारमाईणमिति ॥ २ ॥" ततो विवेकिभिः सूत्रोक्ते युक्तियुक्ते गीतार्थप्रवर्त्तित एव च मार्गे प्रवर्त्तितव्यं, नाधुनिकनिर्विवेकिप्रवर्त्तितमार्गानुसारिभिः कदाचिदपि भवितव्यमिति गाथार्थः ॥ ३२ ॥



संप्रत्येतदुपदेशश्रवणस्योपकारमाह—

गणिजिणवल्लहवयणं पउणं सउणं व जे सुणंति इमं । मग्गाणुसारिणो लहु सुहेण ते सिवपुरमुवेंति ॥३३॥

व्याख्या—'गणिजिनवल्लभस्य' पूर्वोदितशब्दार्थस्य वचनमुपदेशस्वरूपमिदं, कीदृशं? प्रगुणं समस्तधर्मविधिविधापनसज्जं, ये केचित् लघुकर्माणो मार्गानुसारिणः तीर्थकृदुपदिष्टशुद्धधर्मप्रवृत्तिभाजः, 'शृण्वन्ति' सद्गुरुमुखा-दाकर्णयन्ति, ते किमित्याह—'लघु' शीघ्रं सुखेनेति दुःखद्वारदुर्गतिगमननिषेधेन सुमानुपत्वसुदेवादिलाभप्रमोदेन अवान्तरप्राप्तेन क्रमेण 'शिवपुरं' मोक्षनगरम् 'उपयान्ति' गच्छन्ति, एतच्छ्रवणस्य तदर्थानुष्ठानावान्तरव्यापारस्याक्षेपेण मोक्षसाधकत्वादिति भावः, इह च मार्गानुसारिण इति पदमनुसरणेन व्यापारेण पथिकान् लक्षयति, ततश्च यथा पथिकाः शकुनमिव इत्युपमानं शुभाशुभार्थलाभसूचकः कौशिकतित्तिरिखरादिशब्दः शकुनः तद्वद् ये केचित् पुण्यभाजः प्रगुणमर्थलाभादिकार्यदक्षं शकुनं शुभं शृण्वन्ति, ते लघु सुखेन च मार्गे भयाभावजलच्छायादिप्राप्त्यानन्देन पुरं प्राप्नुवन्ति, तथा एतदाकर्णका अपीति भाव इति गाथार्थः ॥३३॥



इति श्रीयुगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ अष्टमकुलकविवरणं समाप्तम् ॥

---

## अथ नवमं कुलकम् ।

अष्टमे कुलके विषयतृष्णाकषायादीनां स्वरूपं फलं चोपदर्श्य तत्परित्यागेनाप्रमादविधिरुक्तो, नवमे तु मनुष्यत्वादिदुर्लभत्वपूर्वकं सद्धर्मबुद्धे-रनेकापायाकुलत्वमुपदर्श्य सर्वथा प्रमादाभावेन सूत्रोक्तप्रवृत्तिरभिधीयत इति प्रथमं तावत् मनुष्यत्वप्राप्ते-र्दुर्लभत्वं वृत्तत्रयेणाह—

इह कुणयभुयंगे जम्ममच्चूतरंगे दुहजलपडहत्थे नोकसाउ(ऊ)रुमच्छे ।
परिभमिरकसाउग्गाढगाहे अगाहे महइ भवसमुद्दे मोहआवत्तरुद्दे ॥ १ ॥
चिरचियनियकम्मुद्दामसज्जोविवागुब्भडफुडरयवेलामज्जिरुम(म्म)ज्जिराणं ।
पुढविजलसमीरग्गीसु लोए असंखे तरुसु पुणरणंते णंतसो संठियाणं ॥ २ ॥
चउगइकुलकोडीजोणिलक्खेसु भूयो भमिय गुणियकम्मीभूयदुक्खड्डियाणं ।
अहह गहिरपारावारविक्खित्तमुत्तारयणमिव जियाणं दुल्लहं माणुसत्तं ॥ ३ ॥

व्याख्या—इह भवसमुद्रे दुर्लभं मानुषत्वमिति सम्बन्धः, 'इहेति' प्रत्यक्षोपलक्ष्यमाणस्थावरजंगमादिभावरूपे, 'भवसमुद्रे'

द्वादश-
कुलकम् ।
॥ ७३ ॥

संसारसागरे, कीदृशे? 'कुनया' एकान्तवादाः ते एव महामोहहेतुत्वात् 'भुजङ्गाः' सर्पा यत्र स तथा तत्र, एतत्प्रसङ्गेनैव किंचिन्नयस्वरूपमुच्यते-अनेकधर्मात्मकार्थग्राहिका बुद्धिः तावत् प्रमाणं, नित्य आत्मा इत्यादौ प्रधानोपसर्जनभावेन अनन्तानामपि धर्माणां ग्रहणात्, तद्द्वारायातः पुनरेकधर्मनिष्ठार्थसमर्थनप्रवणः परामर्शः, शेषधर्मस्वीकारतिरस्कारपरिहारद्वारेण वर्त्तमानो नयः, स चार्थधर्माणामानन्त्यात् अनन्तभेदोऽपि सर्वसंग्राहिकाभिप्रायपरिकल्पनमुखेन सप्तविधो भवति, तद्यथा-नैगम-संग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढै-वंभूतनामकभेदत्वात्, अयमेव स्वाभिप्रेतधर्मावधारणात्मकतया शेषधर्मतिरस्कारेण प्रवर्त्तमानः कुनयः, नैगमादिषु तु आद्याश्चत्वारोऽर्थनयाः शब्दादयस्त्रयोऽपि शब्दनयाः, तत्र नैगमस्तावत् परस्परभिन्नाभिन्नद्रव्यपर्य्यायरूपसामान्यविशेषात्मके वस्तुनि सामान्यविशेषयो-रत्यन्तं भेदमेवाभ्युपगच्छतीति मिथ्यादृष्टिर्नैयायिकवैशेषिकवत्, तथा संगृह्णाति सर्वं वस्तु विशेषरूपपर्य्यायप्रतिक्षेपेण सामान्यरूपतया स्वीकरोतीति संग्रहोऽयमपि यथावस्थितवस्त्वग्राहकत्वात् मिथ्यादृष्टिः सांख्यवत्, तथा व्यवह्रियते लौकिकैरनेनाभिप्रायेणेति व्यवहारोऽयं तु सामान्यप्रतिक्षेपेणार्थक्रियासमर्थविशेषरूपस्यैव वस्तुत्वेनाभ्युपगमात् मिथ्यादृष्टि-श्चार्वाकवत्, तथा ऋजु प्रगुणमतीतानागतवक्रपरित्यागेन वर्त्तमानलक्षणवर्त्तिवस्तु सूत्रयति निष्टङ्कितं गृह्णातीति ऋजुसूत्रोऽयमपि एकान्तेन क्षणिकत्वाभ्युपगमात् मिथ्यादृष्टिः शौद्धोदनिवत्, शब्दादीनां तु त्रयाणामपि क्षणिकार्थवादिना-मयमभिप्रायो-यदुत शब्द एव परमार्थो न पुनरर्थः तस्य तत्प्रतीतौ प्रतीयमानत्वात्, तत्रापि शब्दनय एवं मन्यते-यावन्तो ध्वनयः कस्मिंश्चिदर्थे प्रवर्त्तन्ते यथेन्द्रशक्रपुरन्दरादयः तेषामपि एकोऽर्थो वाच्य इति, अथवा तटस्तटी तटमित्यादिषु लिङ्गभेदात् दाराः कलत्रं भार्येत्यादिषु

नवमं
कुलकम् ।
९
॥ ७३ ॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

तु वचनभेदाद् भिन्नस्वभावतां वस्तुन इति, अयमपि अर्थश्च शब्दरूपव्यञ्जनं चेत्युभयं तद्रूपस्य वस्तुनो व्यञ्जनपर्य्यायस्यैव समाश्रयणात् मिथ्यादृष्टिः, समभिरूढस्तु न पर्य्यायाणामेकार्थतां मन्यते, किन्तु घटनाद् घटः कुटनात् कुटः कौ भातीति कुम्भः, ततश्च न घटनमेव कुटनमिति शब्दप्रवृत्तिनिमित्तभेदात् घटशब्दवाच्यात् कुटशब्दवाच्योऽन्य एवेति मन्यते,अयमपि पूर्वोक्तशब्दाभिहितधर्मवत् वस्तुनोऽनाश्रयणाद् गृहीतप्रत्येकावयवहस्तिज्ञानवत् मिथ्यादृष्टिः, एवंभूतनयस्तु यदैव शब्दप्रवृत्तिनिमित्तं चेष्टादिकं तस्मिन् घटादिके वस्तुनि तदैवासौ युवतिमस्तकारूढ उदकाद्याहरणप्रवृत्तो घटो भवति, न निर्व्यापारः, एवं वज्रं धारयन्नेव वज्रधरो, न शेषकाले, शब्दप्रवृत्तिनिमित्ताभावात्, अयमपि अनन्तधर्माध्यासितस्य वस्तुनोऽनाश्रयणाद् मिथ्यादृष्टिः, तदेवं सर्वेऽप्येते सावधारणा मिथ्यात्वं, परस्परसव्यपेक्षा–स्तु स्याच्छब्दलाञ्छिताः सम्यक्त्वमिति, तथाचोक्तम् "अभयदेवेन–विशुद्धं द्रव्यमाश्रित्य संग्रह–स्तदशुद्धितः। नैगमव्यवहारौ स्तां शेषाः पर्य्यायमाश्रिताः ॥ १ ॥" तदुक्तम्–अन्यदेव हि सामान्य–मभिन्नज्ञानकारणम्। विशेषोऽप्यन्य एवेति मन्यते नैगमो नयः ॥ २ ॥ सद्रूपताऽनतिक्रान्तस्वस्वभावमिदं जगत्। सत्तारूपतया सर्वं संगृह्णन् संग्रहो मतः ॥ ३॥ व्यवहारस्तु तामेव प्रतिवस्तु व्यवस्थिताम्। तथैव दृश्यमानत्वात् व्यवहारयति देहिनः ॥ ४ ॥ पर्य्यायनयभेदास्तु ऋजुसूत्रादयः, तत्र ऋजु(तत्रर्जु)सूत्रनीतिः स्याच्छुद्धपर्यायसंश्रिता। नश्वरस्यैव भावस्य भावात् स्थितिवियोगिनः ॥५॥ अतीतानागताकारकालसंस्पर्शवर्जितम्। वर्त्तमानतया सर्वमृजुसूत्रेण सूत्र्यते ॥ ६ ॥ विरोधिलिङ्गसंख्यादिभेदाद् भिन्नस्वभावताम्। तस्यैव मन्यमानोऽयं शब्दः प्रत्यवतिष्ठते ॥ ७ ॥ तथाविधस्य तस्यापि वस्तुनः क्षणवृत्तिनः। ब्रूते समभिरूढस्तु संज्ञाभेदेन भिन्नताम् ॥८॥ एकस्यापि ध्वनेर्वाच्यं

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज





सदा तत्रोपपद्यते । क्रियाभेदेन भिन्नत्वादेवंभूतोऽभिमन्यते ॥ ९ ॥ शब्दादयस्तु ऋजुसूत्रस्यैव शुद्धशुद्धतरभेदा इति । तथा 'जन्ममृत्यव' एव बहवः पुनः पुनरुपजायमानत्वात् 'तरङ्गाः' कल्लोला यत्र, तथा 'दुःखानि' नानाविधशारीरमानसवाधास्तानि एवातिप्रचुरत्वात् 'जलं' तोयं तेन 'पडहत्थे' परिपूर्णे, नोकषायाः कषायसहचारिणो हास्यरत्यरतिभयादयः त एव दशसागरोपमकोटीकोट्याद्युत्कृष्टमहास्थितित्वेन महाप्रमाणत्वादुरवो महान्तो योजनशतादिप्रमाणा मत्स्या मीना यत्र, तथा परिभ्रम्यमाणा इतस्ततः सर्वत्र संचरन्तः कषायाः क्रोधादयः त एवोद्गाढा हस्त्यादीनां महतामपि बन्धनसमर्थत्वात् प्रबलबला ग्राहाः (ज) तन्तुरूपा जलचरविशेषा यत्र, तथाऽगाधेऽत्यन्तनिम्ने दुःप्रापाधोभागतुल्यपर्य्यन्ते इत्यर्थः । तथा 'महति' अनन्तकालावस्थायित्वेन अतिबृहति, पुनः कीदृशे ? मोहश्चतुर्थं कर्म स एव पुनः पुनर्जन्तूनां परिभ्रमणहेतुत्वादावर्त्तो जलपरिभ्रमस्तेन रौद्रेऽत्यन्तभयोत्पादके ॥१॥ तत्र कीदृशानां मनुजत्वं दुःप्रापमित्याह–'चिरं' बहुकालं चितं संचितमुपार्जितमिति यावत्, निज–मात्मीयं कर्म ज्ञानावरणादिक–मष्टप्रकारं, तस्य उद्दाम–स्तीव्रः सद्योविपाक–स्तात्कालिकः फलानुभवः स एवोद्भटस्फुटरयाऽत्युत्कटव्यक्तवेगप्रधाना वेला जलवृद्धिस्तया 'मज्जिरुम(म्म)ज्जिराणमिति' मंक्त्रुन्मंक्तॄणां 'शीलाद्यर्थस्येर' इति प्राकृतलक्षणेन शीलार्थस्य तृन्प्रत्ययस्य स्थाने इरादेशस्ततश्च मज्जनोन्मज्जनशीलानां चिरोपार्जितकर्मोदयवशप्राप्यमाणशुभाशुभगतीनामिति भावः । तथा 'पृथिवीजलसमीराग्निषु' प्रसिद्धेषु असंख्येयान् संख्यातिक्रान्तान् लोकानागमप्रसिद्धान्, संस्थितानां कृतावस्थानानामिति योगः, 'तरुषु' वनस्पतिकायिकेषु पुनरनन्तान् लोकानेव, तत् किमेकवारमेव ? नेत्याह–अनन्तशोऽनन्तवाराः मानुषत्वं दुःप्रापमिति योगः, लोकस्वरूपं चैवं बोद्धव्यम्–अस्संखोसप्पिणिसप्पिणीउ एगिंदियाण उ चउ- ॥ ७४ ॥

ण्हं। ता चेव ऊ अणंता वणस्सईए उ बोधवा ॥ १ ॥ एतच्च कायस्थितिमानं कालतः, क्षेत्रतश्चासंख्येया लोकाः, इदमुक्तं भवति–असंख्येयेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारेण सर्वप्रदेशापहारे यावत्योऽसंख्येया उत्सर्पिण्यवसर्पिण्यो भवन्ति तावत्य एव पृथिव्यादिषु चतुर्ष्वपि ता एव चोत्सर्पिण्यवसर्पिण्योऽनन्ता वनस्पतिकायिकस्योत्कृष्टा कायस्थितिः, इयमपि कालतः, क्षेत्रतस्तु पूर्वोक्तप्रकारेणानन्ता लोका असंख्येयाः पुद्गलपरावर्त्तास्ते चावलिकाया असंख्येयतमे भागे यावन्तः समयाः तत्तुल्याः, इयं च कायस्थितिः सांव्यवहारिकानाश्रित्य द्रष्टव्या, असांव्यवहारिकजीवानां त्वनादिरवसेया, ततो न मरुदेव्यादिभिर्व्यभिचारः, तथा च क्षमाश्रमणः–"तह कायट्ठिई कालादओ विसेसे पडुच्च किर जीवे। णाणाइवणस्सइणो जेसिं ववहारबाहिरया ॥१॥" इति, ॥२॥ पुनः कीदृशानां दुर्लभमित्याह–'चतसृषु' चतुःसंख्यासु 'गतिषु' नरकादिरूपासु कुलकोट्यश्च योनयश्च तासां लक्षाः शतसहस्राणि तेषु, तत्र योनिलक्षाः प्रागेवाष्टमकुलकविवरणे उक्ताः, 'कुलानि' चैकत्रापि योनिविशेषे भिन्नभिन्नजातिविशेषोपलक्षितभावोत्पत्तिरूपाणि, यथा क्वचिदेकत्रापि गोमयादौ कृमिकीटकवृश्चिकादिभावानामिति, तेषां च कुलानां कोटिलक्षाः समस्तसांसारिकप्राणिगताः ते चैवं–"बारस सत्त य तिन्नि य सत्त य कुलकोडिसयसहस्साइं। नेया पुढविदगागणिवाऊणं चेव परिसंखा ॥ १ ॥ कुलकोडिसयसहस्सा सत्त ट्ठ य नव य अठवीसं च। बेइंदिय तेइंदिय चउरिंदिय हरियकायाणं ॥ २ ॥ अद्धत्तेरस बारस दस दस नव चेव सयसहस्साइं। जलयर पक्खि चउप्पय उरभुय सप्पाण कुलसंखा ॥ ३ ॥ छव्वीसा पुण वीसा सुरनेरइयाण सयसहस्साइं। बारस य सयसहस्सा कुलकोडीणं मणुस्साणं ॥ ४ ॥ एगा कोडाकोडी सत्ताणउई भवे सयसहस्साइं। पन्नासं च सहस्सा कुलकोडीणं मुणेयबा ॥ ५ ॥ एसु कुलको-

टिलक्षेषु योनिलक्षेषु च 'भूयः' पुनः पुनः, 'भविय त्ति' भूत्वा, 'भमिय त्ति' पाठान्तरे तु भ्रान्त्वा पर्य्यट्य, सामान्येन सर्व-जीवानाश्रित्य एवमभिधानं, तत्रापि ये विशेषतस्तीर्थकरबहुश्रुताद्याशातनापरायणाः ते गुणितकर्म्मीभूयेति, गुणितकर्मस्वरूपं च पञ्चमकुलकविवरणेऽभिहितं, ततश्चागुणितकर्म्मणां गुणितकर्मणां भवनं पूर्वं गुणितकर्मीभूय ततो भूयोऽपि 'दुःखार्दितानां' भवकोटिलक्षेपु नानाशारीरमानसव्यथापीडितानां सतां प्राणिनाम्, 'अहहेति' खेदे, गभीरोऽतिनिम्नः स चासौ पारावारश्च समुद्रश्च, तत्र विक्षिप्तं यन्मुक्तारत्नं मुक्ताफलमणिः तद्वदित्युपमानं, गभीरसागरे हि पतितः पाषाणखण्डोऽपि दुःप्रापो भवति, किं पुनरतिसूक्ष्मं मुक्तारत्नं, तदत्यन्तदुर्लभमेवेति मनुजभवदुर्लभत्वे उपमानत्वेनोपात्तं, केषां तथा? तत्राह–जीवाना–मकृतसुकृतप्राणिनां दुर्लभं मानुपत्वमिति प्रसिद्धमेवेति वृत्तत्रयार्थः ॥ ३ ॥

कथंचिद् लब्धेऽपि मनुजत्वे शुद्धधर्मबुद्धिर्दुर्लभा इत्याह—

कहवि तुडिवसेणं तं पि लद्धुं सुखित्तुत्तमकुलसुहजाईरूवमारुग्गमाउं।
असुलभमवि राहावेहणाएण लद्धं जइ तह वि हु बुद्धी दुल्लहा सुद्धधम्मो(म्मे) ॥ ४ ॥

व्याख्या–'कथमपि' कृच्छ्रेण 'तुडिवसेण त्ति' दैववशात् तदपि सुदुर्लभं मानुपत्वमपि, 'लब्ध्वा' प्राप्य, सुक्षेत्रादिकमपि दुर्लभमिति शेषः, तदाह–सुक्षेत्रं च (उत्तमकुलं च) शुभजातिश्च रूपं चेति समाहारद्वन्द्वः, सुक्षेत्रादयश्च प्रसिद्धा एव, तथा आरोग्या(ग्यमा)युश्चेत्यपि प्रसिद्धमेव, एतदपि सर्वमसुलभमपि दुर्लभमपि पुण्योत्कर्षवशात् 'राधावेधज्ञातेन' चक्राष्टकोपरिस्थितपा- ॥ ७५ ॥

खालिकावेधोदाहरणेन, यथासौ दुःप्रापस्तथा सुक्षेत्रादिकमपि, यथा च राधावेधः कथमपि संपद्यते, तथा सुक्षेत्रादिलाभोऽपि, तदाह–'लब्धं' प्राप्तं यदि कथंचिदतिदुर्लभमपि तथापि एवमपि सति 'हुः 'पूरणे, बुद्धिर्विधानमति–दुर्लभा, 'शुद्धधर्मे' प्रतिश्रोतोरूपविधिधर्मविषये, सुक्षेत्रादिलाभेऽपि प्रायो भोगवाञ्छैव जीवानां न धर्मबुद्धिरिति भाव इति गाथार्थः ॥ ४ ॥

सत्यामपि शुद्धधर्मबुद्धौ तच्छ्रवणे प्रभूतान्तरायसद्भावमाह—

अह कहमवि जाया काकतालीयनाया जिणमयसुइबुद्धी तो वि से पच्चवाया ।
भयकुमयकसायालस्सव(वि)क्खेववक्षारमणकिवणयाहीसोगमोहप्पमाया ॥ ५ ॥

व्याख्या–'अथ' इति आनन्तर्ये सुक्षेत्रादिलाभानन्तरं, 'कथमपि' कृच्छ्रेण पुण्योदयवशात् 'जाता' संपन्ना, कासावित्याह– 'जिनमतस्य' अर्हत्प्रवचनस्य सिद्धान्तरूपस्य 'श्रुतिः' श्रवणं तत्र बुद्धिर्यदि तीर्थकृदुपदिष्टो धर्मः श्रूयते इत्येवंरूपा मतिः, कस्मादसौ जाता? इत्यत आह–काकतालीयज्ञातात् पूर्वोक्तात्, यथा काकस्य तालेन योगः कादाचित्को महाकृच्छ्रभावी, तथा जिनमतश्रुतिबुद्धिरपि इत्यर्थः, यद्यप्येवं महाकृच्छ्रेण श्रवणबुद्धिर्जाता 'तो वि त्ति' ततोऽपि 'से' तस्याः श्रवणबुद्धेः 'प्रत्यपाया' विघ्ना भवन्ति अनेके, तानेवाह–भयं च कुमतं च कषायाश्च आलस्यं च विक्षेपाश्चावज्ञा च रमणं च कृपणता चाधयश्च शोकश्च मोहश्च प्रमादश्चेति द्वन्द्वः समासः, तत्र भयं तावदेते साधवः पापकारिणां नारकादिदुःखमादर्शयिष्यन्तीति त्रासात् न शृणोति, एवं कुमतात् कुतीर्थिकदर्शनग्रहात्, कुमतेर्वा कुत्सितभोगाद्यतिशयितबुद्धेः वा, कषायाद् वा साधुद-

द्वादश-कुलकम्। ॥ ७६ ॥

र्शनमात्रेणापि क्रोधोत्पादात्, आलस्याद् वा शृङ्गारादिभिर्मनसः क्रियाविद्वेष आलस्यमिति वचनादन्यक्रियाद्वेषवच्छ्रवणक्रियाया अपि अकरणमिति भावः, विक्षेपोऽन्यान्यसांसारिककार्यव्यासङ्गः तस्मात् वा श्रवणाभावः, अवज्ञाया वा किमेते जानन्तीति तेष्वनादरात्, रमणाद् वा निरन्तरकुकुटपारापतादिक्रीडासक्तिलक्षणात्, पाशकपट्टिकावेधादिखेलनरूपाद्वा, कृपणताया वा, एते हि दानधर्ममुपदेक्ष्यन्ति द्रव्यव्ययमन्तरेण च न दानधर्मो द्रव्यं च बाह्याः प्राणाः प्राणिनामिति, कदर्यभावाद् वा, तथाऽऽधयो मानस्यः पीडास्ततोऽपि निरन्तरमनेकदुश्चिन्तापरायणत्वाद्वेति, शोकाद्वा प्रायः सां(सं)सारे इष्टवियोगादिजनितदुःखविशेषस्य सुलभत्वेन तदाक्रान्तत्वाद्वा, मोहाद्वा अज्ञानात् पुत्रकलत्रादि विषयस्नेहविशेषप्रतिबन्धाद्वा, प्रमादाद्वा निद्रानिर्भरत्वगीतनृत्यादिदर्शनकौतुकात्तृसेर्वा, एवमनेकप्रत्यपायभावे कथं स्यात् श्रवणबुद्धिरिति वृत्तार्थः ॥ ५ ॥

नवमं कुलकम्। ९

कथंचित् श्रवणसंभवे सम्यक् तदवगमे च तच्छ्रद्धानं दुर्लभमिति वृत्तद्वयेनाह—

अह कहवि किलेसा तस्सभावत्तकालपरिणइवसपत्तापुव्वपुण्णोदएणं।<br>
युगसमिलपवेसन्नायओ मुक्खमूलं सुणिय जिणवरुत्तं भाविऊणं च चित्ते ॥ ६ ॥<br>
तह वि हु बहुलाए चंडपासंडियाणं जिणसमयविरोहा भासरासिग्गहस्स। ॥ ७६ ॥<br>
बहुकुपहपरूढातुच्छमिच्छत्तपित्तज्जरविहुरियबोहा हा न तं सद्दहंति ॥ ७ ॥

व्याख्या–अथ कथमपि क्लेशादिति सुगमम्, अपूर्वपुण्योदयेण श्रुत्वा जिनवरोक्त–मिति योजनीयं, कथमित्याह–तस्यात्मनः स्वभावो भव्यत्वलक्षणः तत्स्वभावः तस्य भावः पारिणामिकविशेषः तत्स्वभावत्वं, तथा 'कालस्य' समयविशेषस्य 'परिणतिः' परिणामविशेषः तथाविधबुद्धिप्राप्त्यनुकूलत्वलक्षणः, ततश्च तत्स्वभावत्वं च कालपरिणतिश्च तत्स्वभावत्वकालपरिणती तयोर्वश आयत्तता, ततः 'प्राप्तं' लब्धम् अपूर्वं कदाचिदपि पूर्वं न प्राप्तं 'यत्पुण्यं' सुकृतं तस्योदयेना–विर्भावेन, अयमभिप्रायः–तत्स्वभावत्वकालपरिणत्यपूर्वपुण्योदयरूपात् कारणत्रितयाद् युगसमिलाप्रवेशज्ञातात् पूर्वोक्तात् कादाचित्कभावरूपात् 'मोक्षमूलं' निर्वाणप्राप्त्यादिकारणं, 'श्रुत्वा' समाकर्ण्य, 'जिनवरोक्तं' तीर्थकृदुपदिष्टं देवगुरुस्वरूपप्रतिबद्धं वचनं, न केवलं श्रुत्वा 'भाविऊणं चेति', परिभाव्य च यथावस्थितत्वेन विचार्य च, 'चित्ते' मनसि स्वकीये, यदुत ईदृशमस्य वचनस्य तत्त्वमिति ॥ ६ ॥ यद्यप्येवं परिभावितं तथापि एवमपि न श्रद्धधतीति योगः, कुत इत्यत आह–'बहुलतया' प्राचुर्येण 'चण्डाः' स्वशास्त्रानुसारिसक्रोधवचनेन निस्त्रिंशक्रियया च रौद्रास्ते च ते पाषण्डिनश्च शाक्यभौतादयोऽन्यदर्शनिनः तेषामित्येकं कारणं, तथा 'जिनः' तीर्थकरः श्रीमन्महावीरलक्षणस्तस्य 'समयः' सिद्धान्तः समाचारो वा तदभेदोपचारात् तदाधारः संघोऽपि समयः, तेन सह विरोधात् परमार्थतो वैरात् पीडाकारित्वेन, कस्येत्याह–भस्मराशे–र्भस्मकनाम्नो 'ग्रहस्य' अष्टाशीतिग्रहेषु त्रिंशस्य, अयमभिप्रायो–भगवन्मोक्षसमये ह्यसौ भगवज्जन्मराशौ संक्रान्तः, ततश्च तत्संघपीडाद्वारेण तत्पीडाकारी संवृत्त इति, यो हि यत्र समर्थे स्वाम्यादौ पीडां कर्त्तुं न शक्नोति, स तत्सम्बधिपीडयापि तं पीडयतीति, उक्तं च–"यस्य किंचिदपकर्त्तुमक्षमः कायनिग्रहगृहीतविग्रहः। कान्तवक्त्रसदृशाकृतिं कृती राहुरिन्दुमधुनापि बाधते ॥१॥" इति, एवं च सति यः कश्चिद-

द्वादश-कुलकम् । ॥ ७७ ॥

न्योऽपि सम्यक्त्वज्ञानादिप्रवृत्तिं करोति, स भगवदनुकूलवृत्तित्वात् भगवत्पक्षपाती तेन तस्य विरोध एवेति द्वितीयं कारणं, ततश्चैतद्द्वयमाहात्म्यात् 'वहवः' प्रभूता ये कुपथाः कुत्सितमार्गाः समुत्कटरागद्वेषदेवगुरुसमाश्रयणयागादिविधानधर्मप्ररूपणादिरूपाः तेभ्यः 'प्ररूढं' प्रकर्षेण वृद्धिंगतं यदतुच्छ-मतिबहुलं 'मिथ्यात्वं' विपर्यस्तबोधरूपं तदेव महासंतापहेतुत्वात् 'पित्तज्वरो' धातुविशेषक्षोभापादितरोगविशेषः तेन विधुरितो वैधुर्यमपकर्षं नीतो बोधः सम्यग्वस्तुपरिच्छेदो येषां प्राणिनां ते तथा, 'हेति' खेदे, 'न' नैव तच्छ्रुतमवधारितं च श्रद्दधति एवमेवैतदिति प्रतीतिविषयतां न नयन्ति, तदेवं श्रद्धानस्य दुर्लभतोक्ता, ततश्च ज्ञाने सत्यपि चेदुपदिष्टभावविषयं श्रद्धानं न कुर्वन्ति, तदा तदफलमेवेति वृत्तद्वयार्थः ॥ ७ ॥

नवमं कुलकम् । ९

अथ श्रद्धानादिभावे धर्मकृत्यं सूत्रोक्तं कर्त्तव्यमित्युपदिशन्नाह—

इइ बहुसुहलंभं पाविउं धम्मसद्धं, उवलहिय दुलंभं धम्मसामग्गियं च ।
खरपवणपणुल्लत्तालतूलं व लोलं, मुणिय भवसरूवं सुत्तवुत्तं करेह ॥ ८ ॥

व्याख्या–इत्युक्तप्रकारेण 'बहुशुभलभ्यां' प्रभूतोत्कटपुण्यप्राप्यां प्राप्य लब्ध्वा श्रद्धां तथेतिरूपां, न हि स्तोकसुकृतैः पूर्वोक्तप्रत्यपायापाकरणमिति बहुपुण्यलभ्यत्वमुक्तं, तथोपलभ्य प्रतीत्य दुर्लभां धर्मसामग्रीं चेति सुगमं, तथा 'मुणियेति' ज्ञात्वा भवस्वरूपं सांसारिकधनजीवितादिलक्षणं, 'लोलं' चपलं किमिवेत्याह–खरपवनप्रेरितातिचपलतूलमिवेत्युपमानं, यथाऽर्कादिरूतं पवनोद्धूतं चपलं भवति, तथा सांसारिकं धनादिकमपि, एतस्माच्च तत्त्वार्थश्रद्धानं(न)सामग्रीप्राप्तिभवस्वरू- ॥ ७७ ॥

पावगतिरूपाद् हेतुत्रयात् 'सूत्रोक्तं' श्रुतोपदिष्टं धर्मकृत्यमिति गम्यते, 'कुरुत' विधत्त भोः श्राद्धाः! इति वृत्तार्थः ॥ ८ ॥

तत्रापि प्रथमं तावत् समस्तकृत्यनिदानत्वात् साधुसेवायाः तामेवाह—

पडिहणियकसाए सिद्धिवद्धाणुराए विहिअहिगयसुत्ते तस्स आणाइ जुत्ते ।
फुडपयडियतत्ते साहुणो निम्ममत्ते सुहगुरुपरतंते पज्जुवासेह दंते ॥ ९ ॥

व्याख्या—साधून् पर्य्युपासतेति योगः, कीदृशानित्याह—'प्रतिहतकषायान्' निरुद्धक्रोधादिप्रसरान्, अनेन च क्षान्त्यादिगुणचतुष्टयं साक्षादुक्तं, शेषं गुणषट्कं तूपलक्षणत्वेन बोद्धव्यमिति दशविधसाधुधर्मयुक्तत्वमुक्तं तावत् तेषां ज्ञेयं, तथा 'सिद्धिबद्धानुरागात्' मुक्तिविषयगाढप्रतिबन्धात्, अनेन संविग्नत्वमुक्तं, तथा 'विधिना' वन्दनकदानादिसद्गुरुप्रतिपत्त्याऽधिगतसूत्रानधीतश्रुतविशेषान्, अनेन सर्वत्र तेषां विधिपरता सूच्यते, तथा तस्य श्रुतस्याज्ञा सदुपदेशस्तया 'युक्तान्' समन्वितान्, अनेन गीतार्थत्वमुक्तं, तथा 'स्फुटप्रकटिततत्त्वान्' व्यक्तप्रकाशितजीवादिपदार्थान्, अनेन परोपकारत्वमुपदर्शितं, कानेवंविधानित्याह—'साधून्' सुविहितवृत्तिन इति विशेष्यपदं, तथा 'निर्ममत्वान्' शरीरोपध्यादावपि प्रतिबन्धरहितान्, तथा 'शुभगुरुपरतन्त्रान्' अनन्यसाधारणज्ञानादित्रयपवित्रप्रकृष्टजातिकुलादिषट्त्रिंशद्गुणोपेत आचार्यः शुभगुरुः, तत्परतन्त्रान् तदाज्ञावर्त्तिनः, एतेन गुरुकुलवासित्वमेषां व्यंजितं, तेन च सर्वथा स्वातन्त्र्यनिषेधः, ततश्च शेषपिण्डविशुद्ध्यादिगुणयुक्तानामपि गुरुपारतन्त्र्यविकलानां परमार्थतोऽयतित्वात् पर्य्युपासनयोग्यतावैकल्यमापादितं, तान् 'पर्य्यु-

कारणं [illegible] दिविसय[illegible] [illegible], [illegible] [illegible] ;
तथा 'दानादानं' जितेन्द्रियत्वोऽइन्द्रिय[illegible], अनेन विनयस्यापि [illegible] तेषां, तथा च पठ्यते—"जितेन्द्रि-
यत्वं विनयस्य कारणं, गुणप्रकर्षो विनयादवाप्यते" इति । न चात्र [illegible] [illegible] तस्य
केवल[illegible], इह गुरुदेशनाया एव तात्पर्यादिति वृत्तार्थः ॥ ९ ॥

अथ साधु[illegible]माह—

जिण[illegible] वत्थुविसेसम्मेसि पयपउमससीवि सव्वकालं करेइ ।
[illegible] तत्तको वि नियविसयविभागे तं सया संठवेइ ॥ १० ॥

व्याख्या—'जिनं' [illegible], 'वरं' [illegible], केचिद् गुरवः विनीता अपि न न्याय-
वन्तोऽन्ये तु न्यायवन्तोऽपि न विनीता भवन्तीत्युभयग्रहणम्, ईदृशाः सन्तः तत्परताः तदेकताना येषां [illegible]
भूतां 'पदपद्मश्रीणि' [illegible] सर्वकालं कुर्वन्तीति प्रतीतं, किमित्याह—'वस्तूनां' [illegible]
[illegible] विभागेन विशेषो विचारेण सम्यक्परिच्छेदः तं, ततोऽपि कीदृशाः सन्तः किं
कुर्वन्ति? इत्याह—[illegible] सन्त इति प्रसिद्धमेव, पुनः कीदृशाः? 'तत्त्वकांक्षिणः' सिद्धान्त[illegible],

१ [illegible] ।

सन्तस्तमिति विमर्श, सदा सर्वदा संस्थापयत व्यवस्थापयत, भोः श्राद्धाः ? केत्याह–'निजः' स्वकीयो यो विषयश्चैत्यवन्दनादिरूपः तस्य 'विभागो' विशेषः तत्र, अयमभिप्रायः–"तंबोलपाणभोयणुवाहणमेहुन्नसुयणनिट्ठुवणे। मुत्तुच्चारं जूयं वज्जइ जिणमंदिरस्संतो ॥ १ ॥" इत्यादिकं श्रुतं विधिचैत्यादिविषयमपि आजीवकादिभयात् केचिदन्यथा व्याचक्षते, अन्ये तु पाण्डित्यमदात् अपरे तु मायया चेतस्यन्यथा परिणामेऽपि विधिपरायणश्राद्धरञ्जनार्थमिति, केचित्तु कस्यचिद् विधिप्ररूपकस्य मत्सरेणान्यथा प्रदर्शयन्ति, ततश्च भवद्भिरेतच्चतुष्टयपरिहारेण मध्यस्थभावेनैव विचार्य व्यवस्थापनीयं। तथाहि–"अट्ठमी चउद्सीसुं सव्वे वि चेइयाइं वंदेयव्वाइं। सव्वे य सुसाहुणो त्ति ॥ १ ॥" एतच्छ्रवणादष्टमीचतुर्दश्योरेव साधूनां चैत्ये चैत्यवन्दनं युक्तमित्याहुः, तच्चायुक्तं, यतः–"पडिकमणे चेइहरे भोयणसमयम्मि तह य संवरणे। पडिकमण सुयणपडिवोहकालियं सत्तहा जइणो ॥ १ ॥" इति वचनात् साधोः प्रतिदिनमेव चैत्ये चैत्यवन्दनविधानमभिहितमिति, यच्च चतुर्दश्यष्टम्योश्चैत्यवन्दनमभ्यधायि, तत्सर्वचैत्यसर्वसाधूनां वन्दनमिति विशेषे व्यवस्थापनीयम्। एवं–"धुव लोउयजिणाणं थेराणं चाउम्मासिओ त्ति" अत्रापि चातुर्मासिकपर्वसु त्रिषु शिरसि लोचव्यवस्थापनं तदपि असमीचीनं, यतः पर्य्युषणापर्वणि अवश्यं गोलोममात्रस्यापि केशस्यापसारणमभ्यधायि, ततश्च तदनन्तरं पौषे चतुर्भिर्मासैः ततोऽपि वैशाखे चतुर्भिः ततोऽपि भाद्रपदे चतुर्भिर्मासैरेवं चातुर्मासिको लोचो, न तु चातुर्मासिकपर्वस्विति, अत्रापि किं नियामकमिति चेत् ? ननु सार्वत्रिकी गीतार्थप्रवृत्तिरेवात्र प्रमाणम्, एतस्याश्च प्रामाण्यं पूर्वतरबहुश्रुतगीतार्थाचरितत्वेन, तथा चोच्यते, –"जे जत्थ जया जइया बहुस्सुया चरणकरणमुज्जुत्ता। जं ते समाचरंती आलंवणतिवसद्धाणमिति ॥ १ ॥" शेषायास्तु

चातुर्मासिकपर्वलोचादिप्रवृत्तेर्युक्तिवैकल्येन गीतार्थाचरितत्वासंभवात्, एवं–"तिन्नि वा कड्ढई जाव थुइओ त्तिसि लोइया-ताव तत्थ अणुन्नायं कारणेणं परेण वेति" कल्पवचनात् पञ्चदण्डकचैत्यवन्दनापि श्राद्धस्योचितैव, न च वाच्यं साध्वा-श्रयमेवेदं वचनं, यतश्चैत्यवन्दनस्य सम्यक्त्वशुद्धिरेव प्रयोजनं, तच्च श्राद्धस्यापि अविशिष्टमेव, संपूर्णचैत्यवन्दननिषेध-वचनं च न किंचित् श्रूयते, उपदेशमालायां तु सिद्धान्तोद्धाररूपायाम् "वंदइ उभओ कालं पि चेइयाइं थयथुई परमो", इति श्राद्धस्यापि संपूर्णचैत्यवन्दनश्रवणात्, तदेवं सर्वमपि सद्गुरुमुखादाकर्ण्णितमपि विषये योजनीयमिति वृत्तार्थः ॥१०॥

सामान्येनैव सूत्रोक्तं कुरुतेत्युक्तम् अथ तदेव दानादिरूपतया स्पष्टमाह—

अमयमिव मुणंता ताण वुत्तं कुणंता, दलह सबहुमाणं तेसिं भत्तीए दाणं ।
धरह अकयहीलं सोचियं चारु सीलं, भयह तवविहाणं भावणं भावणाणं ॥ ११ ॥

व्याख्या–परमानन्दहेतुत्वेनामृतमिव पीयूषमिवाह्लादकं 'जानाना' मन्यमाना न तु दुष्टराजादेशवत् कटुकं, तेषां सुसाधूनां सम्बन्धि यदुक्तं वचनं 'तत्कुर्वाणा' विदधानाः सन्तो 'दलयत' वितरत 'सबहुमानं' परमादरे[णान्तरे]ण तेभ्यः सुसाधुभ्यो 'भक्त्या' बाह्यप्रतिपत्तिरूपयाऽपि 'दानं' भक्तपानवस्त्रादिवितरणं, तथा 'धारयत' स्वात्मनि व्यवस्थापयत 'शीलं' सदाचारं, स्वोचितमात्मानुरूपं सम्यक्त्वाणुव्रतादिरूपं, 'चारु' मनोहरम् इहलोकपरलोकयोः सर्वसम्पत्तिहेतुत्वात्, पुनः कीदृशम्? 'अकृ-तहीलम्' अनापादितावज्ञं, शीलवतो हि सर्वत्र माननीयत्वादिति भावः, तथा 'भजत' आश्रयत 'तपोविधानम्' अनशनाद्यनु- ॥ ७९ ॥

ष्ठानं, तथा 'भावनं' परिभावनं मनस्यनुध्यानमिति यावत्, भावनाना–मनित्यत्वादिद्वादशानुप्रेक्षाणां, 'भजत' इत्यनेकार्थत्वाद् धातूनां कुरुतेत्यर्थः, सर्वमनुष्ठानं गुर्वादेशेन विधीयमानं सफलं भवतीति, अतस्तदुक्तं कुर्वाणा इत्युक्तमिति वृत्तार्थः ॥ ११ ॥

तथा—

गुणअगुणविहत्तिं पावठाणे विरत्तिं, सुयपढणपसत्तिं साहुकज्जेसु तत्तिं ।
पवयण अणुरत्तिं सासणत्थेसु सत्तिं, जिणमुणिजणभत्तिं धेह धम्माविवत्तिं ॥ १२ ॥

व्याख्या–'गुणागुणयोः' सदाचारानाचारयोः साध्वादिगतयोर्विभक्तिं विभागं विशेषमिति यावत्, धेह इति क्रियासम्बन्धः सर्वत्र "डुधाञ् डुभृञ्" धारणपोषणयोरिति धातुपाठात्, धारयत पोषयत वा कुरुतेति भावः, तामन्तरेण वेषमात्रभक्तेरचैतन्यापादकत्वात्, विसन्धिः प्राकृतत्वात्, तथा पापस्थानेभ्योऽष्टादशभ्योऽपि 'विरक्तिं' विरागभावं, पञ्चम्यर्थेऽत्र सप्तमी, तथा 'श्रुतपठने' सिद्धान्ताध्ययने 'प्रसक्तिं' प्रकृष्टव्यासङ्गं, तथा 'साधुकार्येषु' सुविहितजनप्रयोजनेषु सर्वदा विशेषतश्च ग्लानाद्यवस्थायां 'तप्तिमिति' भैषज्यादिविषयां चिन्तां, तथा 'प्रवचने' पारमेश्वरे सुसंघेऽनुरक्तिमनुरागम् एतस्या एव सर्वगुणमूलत्वात्, तथा 'शासनार्थेषु' सिद्धान्तोक्तार्थेषु जीवाजीवादिषु 'सक्तिं' श्रवणानुचिन्तनादिगाढप्रतिबन्धं, तथा जिनश्च मुनिजनश्च तयोर्भक्तिं पुष्पादिपूजा–भक्तादिदानप्रतिपत्तिम्, एवं च समस्तं कृत्यं कुर्वाणा 'धर्मस्य' सदनुष्ठानरूपस्याविपत्तिं सम्पत्तिं समृद्धिं विधत्त इति वृत्तार्थः ॥ १२ ॥

अथाविवेकिजनप्रवृत्तिवैमुख्येन जिनोक्त एवानुष्ठाने यत्नोपदेशमाह—

फुडमिह भवकज्जे सव्वसत्तीइ लोया, सययमइपसत्ता नो मणागं पि धम्मे ।
इय बहुजनसन्नं मुत्तु सव्वायरेणं, जयह जिणवरुत्ते चत्तभीसंकलज्जा ॥ १३ ॥

व्याख्या—'स्फुटं' प्रकटमेव एतद् यदुत 'इह' जगति लोकाः प्रभूता अविवेकिजनाः, किमित्याह—'भवकार्ये' संसारनिमित्त-प्रयोजने कृषिवाणिज्यराजसेवाविवाहादौ, 'सर्वशक्त्या' समस्तस्वकीयबलतुलनेन महदपि शरीरादिकष्टमङ्गीकृत्य, सततं सर्वदोपदेशनिरपेक्षमेवातिप्रसक्ताः अत्यन्तप्रवृत्तिभाजः, 'नो' नैव गुरूपदेशेऽपि 'मनागपि' स्तोकमात्रमपि 'धर्मे' तीर्थकरोपदिष्टे सदनुष्ठानरूपे, 'इति' एवं सांसारिककार्यप्रवृत्तिधर्माप्रवृत्तिरूपां 'बहुजनसंज्ञां' प्रभूतभवाभिनन्दिलोकमनोवृत्तिं, 'मुक्त्वा' परित्यज्य, किमित्याह—'सर्वादरेण' समस्तप्रयत्नेन, 'यतत' उद्यच्छत, केत्याह—'जिनवरोक्ते' तीर्थकृदुपदिष्टे सद्धर्मकर्मणीति गम्यते, तस्यैव समस्तकल्याणहेतुत्वात्, कीदृशाः सन्तः ? 'त्यक्तभीशङ्कलज्जाः' भीर्भयं शङ्का संदेहो लज्जा व्रीडा, संभवति हि सद्धर्मे प्रवर्त्तमानानां भिन्नधर्मपितामात्रादिभ्यो भयं, तथा किमेतत्कृत्य-मेवं क्रियमाणं शिवायाऽन्यथा वेति संदेहोऽपि, तथा सामायिकवन्दनकादौ प्रावरणादित्यागे श्राद्धादिपर्वत्यागे वा पूर्वपरिचितब्राह्मणादिगुरुभ्यो लज्जाऽपि, तदेतत् सर्वं भयादिकं परित्यज्य धर्मोद्यमः कार्य इति वृत्तार्थः ॥ १३ ॥ ॥ ८० ॥

जिनवरोक्तमेव लोकस्वभावरूपद्वाममभावनैकदेशं जीवस्वरूपभावनमाह—

इह सुहुमनिगोया चेव अव्ववहारी, सुहुमियरइगिंदा ववहारी तसा य ।
सहजसपरिणामा भव्वभवा य कम्म—ट्ठगनिगडनिवद्धा ज्झायहिच्चाइ तच्चं ॥ १४ ॥

व्याख्या—'इह' जगति द्विधा जीवाः सूक्ष्मवादरभावेन, तत्रापि केचिदव्यवहारिणोऽपरे तु व्यवहारिणः, तत्राव्यवहारिणस्तावत् ये निगोदवनस्पतिजातिं विहायान्येन पृथिव्यादिजात्यन्तरेण कदाचिन्न व्यवह्रियन्ते तेऽव्यवहारिणः, के ते? इत्याह—सूक्ष्मनिगोदा एव, अनन्तानां जीवानां साधारणमेकं शरीरं निगोदसंज्ञं, निगोदशरीरवन्तो जीवा अपि तदभेदोपचारात् निगोदाः तेऽपि केचित् सूक्ष्मनामकर्मोदयवशात् सूक्ष्मा गोलकरूपा एव, अन्ये तु वादराः कन्दादिरूपाः, तत्र ये सूक्ष्मनिगोदास्ते एवाव्यवहारिणोऽनन्तमपि कालं पुनः पुनः तेषु एवोत्पद्यन्ते, न कदाचित् पृथिव्यादिभावं त्रसत्वं वा भजन्ते, य एवमागमे श्रूयन्ते—"अत्थि अणंता जीवा जेहि न पत्तो तसत्तपरिणामो । उप्पज्जंति चयंति य पुणो वि तत्थेव तत्थेव त्ति ॥ १ ॥" यथा निगोदाः सूक्ष्मा वादराश्च, तथा पृथिव्यादयश्चत्वारोऽपि, तत्र सूक्ष्मास्तावत् निगोदवत् सूक्ष्मनामकर्मोदयाद्, वादरास्तु वादरनामकर्मोदयात् , ते च द्विरूपा अपि व्यवहारिणः, तदुक्तम्—'सुहुमियरइगिंदि'त्ति सूक्ष्माश्चेतरे च प्रस्तावादिह वादरा ये एकेन्द्रियाः स्पर्शनमात्रैकेन्द्रियभाजः, तेऽव्यवहारिणः, तथा त्रसाश्च त्रसनामकर्मोदयवन्तः ते च द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियपञ्चेन्द्रियाः, एते सर्वेऽपि व्यवहारिणः, तथा सहजस्वपरिणामा भव्याभव्याश्चेति, सहजः स्वाभा-

मार्गदर्शक - आचार्य श्री सुविधिसागर जी महाराज

विको जीवानां स्वपरिणाम आत्मीयभावरूपः—ततश्च सहजः स्वपरिणामो येषां ते तथा, क एव विधाः ? अत आह—भव्या अभव्याश्च, अयममिप्रायो—जीवानां षड् भावाः स्वभावविशेषा भवन्ति, तथा चोच्यते—'भावा छच्चोवसमियखइयखओवसमउदयपरिणामत्ति', एषु च पञ्चमो भावः पारिणामिकरूपः, स च जीवत्वभव्याभव्यत्वलक्षणः तदुक्तम्—''पंचमगम्मिय भावे जीवा भवत्तभव्वयाईणि'' । औपशमिकादयो हि भावाः कर्मोपशमक्षयादिसाध्या आहार्य्या एव, भव्यत्वाभव्यत्वभावौ तु जीवत्ववत् स्वाभाविकौ, न तु कर्मक्षयोपशमजन्यौ, तेनोक्तं 'सहजस्वपरिणामा' इति, सर्वे चैते सूक्ष्मनिगोदादयः कर्माष्टकमेव गाढबन्धनहेतुत्वात् 'निगडो' लोहमयपादकटको बन्धविशेषः तेन 'निबद्धा' नितरां नियन्त्रिताः संसारकारागृहान्निर्गमनयोग्यत्वाभावमापादिता वर्त्तन्ते इत्यादि 'ध्यायत' निरन्तरं चिन्तयत, आदिशब्दात् तेषामेव शुभाशुभभाववेदनादिकमपि, कीदृशं 'तच्चमिति' तथ्यं सत्यमित्यर्थः । एतद् भावनमपि वैराग्योपयोगीति एतदुपदेश इति वृत्तार्थः ॥ १४ ॥

श्रमणोपासका हि श्राद्धा भवन्ति, कदाचित्त्वपूर्वं साधुवेषं दृष्ट्वा तैः किं कर्त्तव्यमिति अत्राह—

**अमुणियगुणदोसं पासिउं साहुवेसं, पढममसढभावा लेह सुस्संजयं व ।**
**पुण बकुसकुसीलुत्तिन्नसुस्सुत्तभासिं, विसविसहरसंसग्गिं व उज्झेह झत्ति ॥ १५ ॥**

व्याख्या—'गुणा' ज्ञानादयो 'दोषाः' क्रियाशैथिल्यादयः, ततश्चाज्ञातगुणदोषं 'साधुवेषं' रजोहरणादिसाधुनेपथ्यधारिणं पुरुषं 'दृष्ट्वा' विलोक्य, प्रथममादौ दर्शनानन्तरम्, 'असढभावा' अकपटमानसा, भावसारमित्यर्थः ॥ लात गुरुत्वेन गृहीत, ॥ ८१ ॥

‘सुसंयतमिव’ इत्युपमानं, कदाचिदसंयतोऽप्यसौ स्यात्, तथापि सुविहितत्वेन कल्पयित्वाऽङ्गीकार्यः, उपासकस्य हि उपास्ये नावज्ञा विधातुमुचिता इति भावः। अथोपास्यमानस्य तस्य क्रियादर्शनाद् वचनश्रवणाच्च तत् स्वरूपावगतौ सम्यक् संजातायां किं कर्त्तव्यमित्याह–पुनर्भूयोऽपि अङ्गीकारानन्तरं ‘बकुशकुशीलोत्तीर्ण्णं’ तीर्थप्रवर्त्तकसाधुविशेषचेष्टाभ्रष्टम्, ऋतुबद्धे तु पीठफलकासेवनप्रत्युपेक्षाप्रमार्जनाऽभावोभयकालावश्यकाविधानस्वाध्यायाकरणविकथाप्रवृत्तिमत्त्वात्, तथा ‘उत्सूत्रभाषिणं’ सूत्रोत्तीर्ण्णपदार्थप्ररूपकं। बकुशादिस्वरूपं चैवमागमे श्रूयते–“उवगरणदेहचुक्खा इड्ढीरसगारवा सिया निच्चं। बहुसबलच्छेयजुत्ता निग्गंथा बाउसा भणिया॥१॥” तत्थ उवगरणचुक्खा–“जो उवगरणे बउसो सो धुवइ अपाउसेवि वत्थाई। इच्छइ य लन्हयाइं किंचि विभूसाइ भुंजइ य ॥ २ ॥ तह पत्तदंडयाई घट्ठं मट्ठं सिणेह कयतेयं। धारेइ विभूसाए बहुं व पत्थेइ उवरणं ॥ ३ ॥” देहचुक्खो पुण एवं–“देहे बउसो अकज्जे करचरणनहाइयं विभूसेइ। दुविहो वि इमो इड्ढिं इच्छइ परिवारपभिईयं ॥४॥” इत्यादि। कुशीलोऽपि द्विधा–आसेवनाकुशीलः कषायकुशीलश्च, तत्र आद्यः पञ्चप्रकारः ज्ञानदर्शनचारित्रतपोयथासूक्ष्मभेदात्, तत्स्वरूपं चेदं–“इह नाणाइकुसीलो उवजीवी होइ नाणपभीईए। अहसुहुमो पुण उस्सं एस तवस्सित्ति संसाए ॥ १ ॥” कषायकुशीलोऽपि पूर्ववत् पञ्चप्रकारः, केवलं तपःकुशीलस्थाने लिङ्गकुशीलो बोद्धव्यः, तत्स्वरूपं चेदं–“नाणंदंसणलिंगं जो जुञ्जइ कोहमाणमाईहिं। सो नाणाइकुसीलो कसायओ होइ नायव्वो ॥ १ ॥ चारित्तम्मि कुसीलो कसायओ जो पयत्थ(च्छ)ईसावं। मणसा कोहाईए निसेवयं हो अहासुहुमो॥१॥ इति संक्षेपो विस्तरेणैतत्स्वरूपार्थिना तु भगवतीसूत्रवृत्ती अवलोकनीये, इह हि प्रवचने पञ्च निर्ग्रन्थाः–पुलाक–बकुश–कुशील–निर्ग्रन्थ–स्नातकाः, परं “सव्वजिणाणं जम्हा

वकुसकुसीलेहि वट्टए तित्थम्" इति वचनाद् एतावेव तिर्थप्रवर्त्तकौ न शेषास्त्रयः, तद्यदि वकुशकुशीलोचितक्रियाविकलोऽसौ अवगतः, तदा तम् 'उज्झत' परिहरत, 'झटिति' शीघ्रं, भोः श्राद्धाः ! 'विपविषधरसंसर्गिमिवेति' उपमानं, यथा कालकूटसर्पयोः संसर्गो महानर्थहेतुत्वात् परिह्रियते, एवं साधुवेषधरस्यापि दूरेणोज्झनमेव विधेयं, नतु साधुवेशोऽयमिति पश्चादप्यसौ सेव्यः, यदा चैवं तत्संसर्गोऽप्यपाकृतः, तदा वन्दनं दूरापास्तमेवेति वृत्तार्थः ॥ १५ ॥

यद्यपि संप्रति सुसाधुषु अपूज्यत्वं साधुवेषमात्रधारिषु प्रभूतजनपूज्यत्वं दृश्यते तथापि न तत्रादरो विधेय इत्याह—

जइ वि दुसमदोसा भासरासिप्पवेसा, जिणमयमुणिसंघो नो तहिण्हिं महग्घो ।
तहवि दसमदुट्ठच्छेरउब्भूयनाम–स्समणगणपहे नो मुज्झियव्वं बुहेहिं ॥ १६ ॥

व्याख्या–यद्यपीति अभ्युपगमे 'दुःषमाया' अवसर्पिणीपञ्चमारकरूपकालविशेषस्य 'दोषात्' अनर्थकारिसाधुविपयबहुमानभावलक्षणापराधात्, तथा भस्मराशेस्त्रिंशस्य ग्रहस्य 'प्रवेशात्' वर्षसहस्रद्वयलक्षणस्थित्या एतत्कालस्य व्यापनात्, एतस्माद् दुष्टद्वयमाहात्म्यात् 'जिनमते' तीर्थकृद्दर्शने जिनानां वा मतः सम्यगाज्ञाकारित्वेन संमतो 'मुनिसंघः' सुविहितव्रातो, 'नो' नैव 'इण्हिमिति' इदानीं तथा यथा पूर्वतीर्थकृत्काले आसीद् महार्घो महान् अर्घः पूजाविशेषो यस्य स तथा, 'तथापि' एवमपि सति पूज्यसाध्वपमानदर्शनेऽपि सति, नो नैव मोहितव्यं मोहः कर्त्तव्य इति योगः, क्व विषय इत्याह–'दशमं' च तद्दुष्टाश्चर्यं चासंयतपूजालक्षणं तेनोद्भूताः समुत्पन्ना ये 'नामश्रमणाः' श्रमणगुणज्ञानादिवैकल्येन नाममात्रेण संज्ञामात्रेणैव श्रमणा ॥ ८२ ॥

न तु भावतः, तेषां 'गणः' समूहः तस्य 'पन्थाः' कुत्सितप्रवृत्तिघटितो मार्गः तत्र 'नो' नैव मोहितव्यम्, एषोऽपि मोक्षमार्ग इति चित्ते वैक्लव्यं न विधेयं, बुद्धैर्विचक्षणैर्भवादृशैरिति वृत्तार्थः ॥ १६ ॥

कुगुरूत्सूत्रदेशनारक्तत्वं मुग्धजनस्योपलभ्य श्राद्धान् शिक्षयितुमाह—

तह विलसिरहुंडोसप्पिणीकालदोसु—ल्लसियकुगुरुवुत्तुस्सुत्तरत्ते वि लोगे ।
अवगणिय तदुत्तं होह दुदेसणासी—विसपसमसुमंतायंत संसुद्धबुद्धी ॥ १७ ॥

व्याख्या—'तथा' इति समुच्चये 'विलसिरो' विलसनशीलो यः स्वेच्छाचारी 'हुंडावसर्पिणीकालः', हुंडावसर्पिणी पूर्वोक्तशब्दार्थलक्षणः 'कालः' समयः तस्य 'दोषो' विगुणबहुमानाभिमुख्यलक्षणोऽपराधः 'तेनोल्लसिता' उज्जृम्भिता ये 'कुगुरवो' ज्ञानक्रियाविकलाः सूरयः तैरुक्तं प्रतिपादितं 'यदुत्सूत्रं' श्रुतपथातिक्रान्तं निशि बलिनन्द्यादिकं तत्र 'रक्तेऽपि' अनुरागवत्यपि 'लोके' मुग्धजने अवगणय्यावमत्य, 'तदुक्तम्' उत्सूत्रभाष्याचार्यप्रतिपादितं, यूयं भवत इति क्रियायोगः, कीदृशाः? दुष्टा चासौ देशना च उत्सूत्रप्ररूपणारूपा सैव उत्कटकालकूटवद् विशिष्टचैतन्यापहारित्वात् 'आशीविषो' विषधरः तस्य 'प्रशमः' स्वकार्यैकरणाक्षमत्वं तत्र सुमन्त्रायमाणा सुष्ठु शोभनः समाहात्म्यः पठितसिद्धः पुरुषाधिष्ठितो वा ओंकाराद्यक्षरसमूहो मन्त्रः तद्वदाचरति सुमन्त्रायमाणा, 'सुंशुद्धा' सुगुरूपदेशवशेन सर्वथा मिथ्याभिनिवेशपङ्करहिता बुद्धिर्मतिर्येषां ते तथा, विभक्तिलोपादिकं प्राकृतत्वाद्, अयमभिप्रायो—यद्यपि बहुलोक उत्सूत्रदेशनारक्तः तथापि भवद्भिः तदुपशमकविशुद्धबुद्धिभिर्भाव्यं, सुगुरूपदेशस्येत्थमेव साफल्यादिति वृत्तार्थः ॥ १७ ॥

द्वादश-
कुलकम्।
॥ ८३ ॥

नवमं
कुलकम्।
९

ननु संशुद्धबुद्धिभिर्भवद्भिर्भाव्यमित्युक्तं, सा च संशुद्धा सद्गुणगुरुसंपर्काद् भवति, गुणवांश्च संप्रति दुर्ज्ञेय इत्याह—

अइसयविरहाओ खित्तकालाइदोसा, विगुणबहुलयाए संकिलिट्ठे जणम्मि।
सपरसमयलोयायारणाभिन्नतुंड—ग्गलखलजइरज्जे नज्जए नो गुणीवि ॥ १८ ॥

व्याख्या—सांप्रतमुच्छृंखलयतिराज्ये गुणी साधुर्दुर्ज्ञेय इति योज्यं। कुतः पुनः उच्छृंखलयतिराज्यमित्यत्र हेतुचतुष्टयमाह—'अतिशया' उत्कर्षा अवधिमनःपर्यायकेवलज्ञानलक्षणाः—तद्वन्तोऽतिशयिनः तेषां, 'विरहात्' अभावात्, अतिशयेन हि सम्यग् गुणी साधुर्ज्ञायते इति तज्ज्ञानाभावे भवत्येव उच्छृंखलयतिराज्यं १। तथा 'क्षेत्रं' भारतं कादाचित्कभावतीर्थकरादिसत्पुरुषं, न तु महाविदेहं, 'कालश्च' दुःषमारूपो न तु दुःषमसुषमादिः, आदिशब्दाद् दशमाश्चर्यादिग्रहः, तेषां क्षेत्रकालादीनां 'दोषो' गुणिजनविषयसम्यग्ज्ञानसम्पादनवैमुख्यलक्षणः तस्मात् २। तथा 'विगता' गुणा ज्ञानचारित्रविनयादयो येषां ते विगुणास्तेषां 'बहुलता' प्राचुर्यं ततोऽतितद्बाहुल्येऽपि प्रायो गुणी न ज्ञायते ३। तथा स्वभावत एव 'संक्लिष्टे' अतिप्रभूतरागद्वेषादिकलुषितान्तःकरणे 'जने' च प्रचुरलोके, चकारोऽत्र लुप्तो द्रष्टव्यः, एवमपि न सम्यग् गुणिज्ञानवाञ्छापि भवतीति ४। एवं च हेतुचतुष्टयसद्भावे सति, किमित्याह—स्वः स्वकीयो जैनः, परोऽन्यः शाक्यभौतादिसंबन्धी, ततश्च स्वपरयोः समयः सिद्धान्तः, तथा 'लोकः' शिष्टजन 'आचरणा' गीतार्थबहुश्रुतजनाचरितं, दीर्घत्वं प्राकृतत्वात्, ततश्च स्वपरसमयश्च लोकश्चाचरणा च स्वपरसमयलोकाचरणाः ताभ्यो 'भिन्ना' भेदवन्तः पृथग्भूताः ॥ ८३ ॥

ताभ्यः परिभ्रष्टाः सर्वथा तदननुसारिण इत्यर्थः । दृश्यन्ते केचित् स्वसमयादिविरुद्धमपि देवद्रव्योपभोगमाठपत्यगाढतराशातनादिकं कुर्वाणाः, तथा चोक्तम्–"यत्किंचिद् वितथं यदप्यनुचितं यल्लोकलोकोत्तरोत्तीर्णं यद् भवहेतुरेव भविनां यच्छास्त्रबाधाकरं । तत्तद् धर्म इति ब्रुवन्ति कुधियो मूढास्तदर्हंस्मरभ्रान्त्या ऽऽन्ति च हा दुरन्तदशमाश्चर्यस्य विस्फूर्जितम् ॥१॥" इति ततः ते स्वसमयादिभ्रष्टा अभिधीयन्ते, तथा 'तुण्डेन' वदनेनार्गला असत्यासभ्यप्रभूतासंबद्धभाषकत्वेन समधिकाः, स्वसमयादिभिन्नाश्च ते तुण्डार्गलाश्चेति कर्मधारयस्ते च ते 'खलाश्च' पैशून्यकारिणश्च ते च ते 'यतयश्च' लिङ्गमात्रधारणेन, न तु भावतस्तेषां 'राज्यं' सर्वत्रास्खलितप्रचारित्वं तत्र, यथा क्वचित् म्लेच्छनगरादौ तद्राज्ये तत्प्राचुर्ये च सति अम्लेच्छास्तत्र द्वित्राः सन्तोऽपि नोपलक्ष्यन्ते, एवमेवंविधोच्छृंखलानां प्राचुर्ये स्वेच्छाचारित्वे च सति अनुच्छृंखलाः सुविहिता द्वित्राः गुणिनः सन्तोऽपि नोपलक्ष्यन्ते अनभियुक्तैः तेनोक्तम्–न ज्ञायते गुण्यपि ज्ञानादिगुणपात्रमपि स्तोकत्वात्, अपिर्विस्मये, क्वचित् मुणीवीतिपाठः तत्र मुनिरपि सुसंयतोऽपीत्यर्थः, यद्यपि एवं तथापि श्राद्धैरत्यन्ताभियुक्तैरन्विष्य गुणिनं स्तोकमपि सम्यगवगम्य तस्यैव वचने आदरो विधेय इति भाव, इति वृत्तार्थः ॥ १८ ॥

एवं तद्राज्ये समुज्जृम्भमाणे भव्यानां महाननर्थः संपद्यते इति सविषादमाह—

**सयमिह जियाणं सोगदोगच्चवाही–जरमरणभयाई वेरिणो दुन्निवारा ।**
**जइ खयकरमेसिं कोइ कंखिज्ज तत्तं, तहवि हु कुपहदंसी ही दुरंता कुलिंगी ॥ १९ ॥**

द्वादश- व्याख्या–'सततं' सर्वदा 'इह' जगति, जीवानां किमित्याह–'शोकः' पुत्रादिवियोगजनितो दुःखविशेषो, 'दौर्गत्यं' दारिद्र्यं नवमं
कुलकम् । 'व्याधयो' ज्वरादिरोगाः, 'जरा' वयोहानिः, दीर्घत्वह्रस्वत्वे प्राकृतत्वात्, 'मरणं' पञ्चत्वप्राप्तिः, 'भयम्' अनेकविधस्त्रासः, कुलकम् ।
॥ ८४ ॥ आदिशब्दात् क्रोधादिग्रहः, एते किमित्याह–'वैरिणो' अन्तरङ्गसम्यक्त्वादिप्राणापहारित्वात् प्रौढशत्रवो, 'दुर्निवारा' उप- ९
क्रमशतैरपि निषेद्धुमशक्याः अवश्यमपायहेतव इति भावः, तथा चैतैरुपहतेषु सर्वजीवेषु यदि कथंचित् 'क्षयकरं' ध्वंस-
विधानदक्ष–मेषां शोकादीनामन्तरङ्गशत्रूणां कश्चिद् द्रव्यत्वपरिपाकवानपि अत्यन्तमेतद् भीरु–रन्तरङ्गसम्यक्त्वादिप्राणान्
रिरक्षिषुः, 'कांक्षेद्' अभिलषेत् तथाविधमहाबलिष्ठराजानमिव, 'तत्त्वं' सद्गुरूपदिष्टं विधिधर्ममार्गलक्षणं रहस्यम् अवश्यमेत-
स्मात् ममान्तरङ्गप्राणरक्षा भविष्यतीति अभिप्रायवान्, 'तथापि' एवमपि कस्मिंश्चिद् भव्यविशेषे तत्त्वाकांक्षिण्यपि किमित्याह
–'कुपथदर्शिनो' दिवा रात्रौ वा शुचिभूतेनान्यथा वा देवस्नानपूजादिकं विधेयं, पात्रापात्रविभागेन शुद्धाशुद्धभैक्षाविशेषेण
यतिभ्यो दानं विधेयं, सदाचारे इतरस्मिन् वा लिङ्गमात्रधारिणि वन्दनादिकं मोक्षबीजं, सुविहितान्तिके सम्यक्त्वाद्यारो-
पणं न कार्यं, गद्दिकाद्यासनेऽपि चैत्ये न दोष इत्यादिकुत्सितमार्गप्रकाशकाः तस्य संघटिताः, के इत्याह, 'कुलिङ्गिनः'
सदाचारविकलकुत्सितलिङ्गमात्रधारिणः तैश्च एवंविधो मार्गो दर्शितः, ततः कथं तस्यान्तरङ्गवैरिक्षयो भवतु इति । एव-
मसमंजसदर्शने प्रकरणकारः सखेदमाह–'हीति' खेदेऽव्ययं, महदिदं खेदस्थानं यद् भव्यस्य कस्यापि अन्तरङ्गवैरिक्षयार्थि- ॥ ८४ ॥
नस्तत्पुष्टिकारमार्गदर्शनं विषविकारनिवृत्त्यर्थिनः पीयूषपानमभिलषतः कालकूटपानमिवेद–मिति वृत्तार्थः ॥ १९ ॥

एवं तावत् शिथिलाचारचरित-मुत्कीर्त्तितम्, अथ सुविहितात्ममानिनां मध्यस्थात्मज्ञानिनां च निश्चयनयेनासुविहिता-नामाचरितं दर्शयितुमाह—

नियगुरुकमरागेण न्नदक्खिन्नओ वा, समइअभिनिवेसेणंधमंधीइ केई ।
सुविहियबहुमाणी होउ मज्झत्थनाणी, इय कुसुयकुबुद्धं बिंति आणाविरुद्धं ॥ २० ॥

व्याख्या-केचिद् मध्यस्थात्मज्ञानिनः सुविहितबहुमानिनश्चाज्ञाविरुद्धं ब्रुवत इति योगः, कुतः पुन-र्मध्यस्थात्मज्ञानिन इत्यत्र हेतुचतुष्टयमाह-'निजगुरुक्रमरागेण' स्वकीयपूर्वजसमाचारपक्षपातेन, ते हि मध्यस्थमानिन आसन्निति ॥१॥ अन्येषा-मपरेषां श्राद्धादीनां 'दाक्षिण्यम्' उपरोधः ततो वेति, वाशब्दो विकल्पार्थः, तेषां हि मध्यस्थभाव एव रोचते ॥ २ ॥ स्वमतेः आत्मबुद्धेरभिनिवेश आग्रहो यदुत माध्यस्थ्यमेव श्रेय इति चेतोऽवष्टम्भः ॥३॥ 'अन्धमंधीइत्ति' प्राकृतत्वाद् अन्धान्धीन्यायो ग्राह्यो यथैकस्यान्धस्यापरोऽन्धो लग्नस्तस्यापि अन्य इत्येवमाद्यस्यैव सर्वथा मार्गादर्शित्वादन्येषामपि मार्गास्पर्शित्वमेव, एव-माद्यस्यैव गुरोर्माध्यस्थ्यावलम्बनस्यासमीचीनत्वाद् शेषाणामपि तत् तथैव, ॥ ४ ॥ एवं हेतुचतुष्टयात् केचिन्मुग्धबुद्धयो मध्यस्थज्ञानिनः संवृत्ताः, भवन्तु केचित् साधवः सदाचारा अपरे तु अतादृशास्तथापि अस्माकं सर्वेषु समताभावो माध्यस्थ्यं, तथा च मध्यस्थं मध्यस्थताविषयं ज्ञानं विद्यते येषां ते मध्यस्थज्ञानिनः, आत्मानं मध्यस्थं मन्यमाना इत्यर्थः। कीदृशाः सन्तः? इत्याह-'सुविहितं' सुसंयतमात्मानं बहु मन्यन्त इति सुविहितबहुमानिनः, मध्यस्थज्ञानिनामयमभिप्रायो-यदुत गुणागुणवि-

भागे हि क्रियमाणे निर्गुणस्य परिहारे तस्य महान् संताप आपादितो भवति, स च संसारवृद्धये, सर्वभक्तिविधाने तु गुणिनामपि भक्तिविधानादवश्यं संसारोच्छेद इति । अयं चायुक्तः तेषामभिप्रायो, यतः पूर्वाचार्यैः पार्श्वस्थादीनां दर्शनस्यापि निषेधेनाष्टादशशीलाङ्गसहस्रधारिणामेव वन्दनादिप्रतिपत्तिरभ्यधायि, नाविशेषेण, एवंविधमध्यस्थतायाः तु उपहास्यत्वात्, तदुक्तम्—"श्रीमद्भिः प्रविचार्यकार्यमखिलं वस्त्वैहिकामुष्मिकम्, ज्ञात्वा दोषगुणांश्च दोषविमुखैः कार्यो गुणेष्वादरः । एवं हीष्टयुतिर्भवत्यपरथा संमूर्च्छिमप्रायता, पीयूषं च विषं च तुल्यमदतां का नाम मध्यस्थता ॥ १ ॥" तस्मादनादरणीया एवंविधमध्यस्थता, ते तु एवं मध्यस्थलाञ्छनिनो मूढाः संगय, अनुस्वारलोपः प्राकृतत्वात्, किं कुर्वन्तीत्याह, इति वक्ष्यमाणप्रकारेण 'आज्ञा' आप्तोपदेशस्तया 'विरुद्धं' विरोधभाक्, 'ब्रुवते' भाषन्ते, अत एव तत् कुत्सितम् असम्यक्, श्रुतमाकर्णितं कुश्रुतं, सुश्रुतमपि वा कुत्सितमसम्यग् बुद्धमवगतं कुबुद्धं, तथा च कुश्रुतं च कुबुद्धं चेति द्वन्द्वः, न हि सुश्रुतस्य सुबुद्धस्य वाप्ताज्ञाविरुद्धत्वं कदाचिदपीति भाव इति वृत्तार्थः ॥ २० ॥

कीदृशाः सन्तः किं च भाषन्त इत्याह—

नियमइकयसामायारिचारित्तसन्ना, मुसियजलजणोहा सुत्तउत्तिण्णबोहा ।
वयमिह चरणड्ढा हंत नन्निति विंता, परपरिभवमत्तुक्कासमुल्लासयंति ॥ २१ ॥ ॥ ८५ ॥

व्याख्या—'निजमत्या' आत्मीयबुद्ध्या स्वविकल्पेन 'कृता' विहिता 'सामाचारी' साधुकृत्यविशेषरूपा सांप्रतमपि मासकल्प-

विहारोष्णोदकपानसार्धहस्तत्रितयमानकल्पधारणपटलकधारणपात्रमात्रकातिरिक्तोपधिवर्जनादिलक्षणा, तस्याः 'चारित्रसंज्ञा' विशुद्धसंयमनाम यैः ते तथा, पुनः कीदृशाः 'सूत्रोत्तीर्णबोधाः' श्रुतोपदेशातिक्रान्तपदार्थज्ञानाः, न हि सूत्रे क्वचिदपि स्वयं प्रकल्पितसामाचार्याः चारित्रत्वमुक्तं, तथा 'मुषितजलजनौघाः' डलयोरेकत्वमिति लक्षणात् जला जडा मूर्खा इत्यर्थः, ततश्च मुषिता [illegible] तस्करैरिव लुण्टिता 'जडजनौघा' मूर्खलोकसमूहा यैस्ते तथा, ईदृशाश्च सन्तः ते किं वदंतीत्याह–'वयमिह चरणाढ्या' वयमित्यात्मनिर्देशे तदपि सावधारणं द्रष्टव्यं, यदाह–नान्य इति नापरेऽपि केचित् इह प्रवचने चरणाढ्याः संशुद्धसंयमसंयुक्ताः, 'हंते'ति विषादे, एवं च ब्रुवाणास्ते 'परेषां' शेषसाधूनां 'परिभवं'तिरस्कारम् ,आत्मनस्तु 'उत्कर्षं' सर्वोत्कृष्टत्वमुल्लासयन्ति जने विस्फारयन्ति, इत्थमात्मोत्कर्षेण परेषां लाघवमापादयन्ति, मासकल्पादिसामाचार्यास्तु सांप्रतं संस्तारकव्यत्ययादिनैव श्रुतधरैः समर्थनात् , तदुक्तम्–"कालाइ दोसओ पुण न दव्वओ एस कीरई नियमा। भावेण उ कायव्वो संथारगवच्चयाईहिं ॥ १ ॥" द्रव्यतस्तु मासकल्पः पञ्चकल्पभाष्यादिभिः तदुचितक्षेत्राद्यभावं वदद्भिर्निषिद्ध एव, तथा च तद्भाष्यम्–"जं देवलोयसरिसं खित्तं निप्पच्चवाइयं जं च। एसो उ खेत्तकप्पो देसा खलु अद्धछवीसं ॥१॥" तथा– "आसन्नखित्तकालं बहुपाउग्गा न संति खित्ताओ । निच्चं च विभत्ताणं सच्छंदाई बहू दोसा ॥ २ ॥" इत्यादि तच्चूर्णिस्तु– 'संपयं मासकप्पपाउग्गाणि नत्थि त्ति', उष्णोदकपानं तु–'उसिणोदगं तिदंडुक्कलिय'मितिवचनात् तादृशस्य तु प्रायः सांप्रतं नित्यं दुःप्रापत्वात् प्रासुकस्यापि च 'उसिणोदगतत्तभोइणो' इत्यादि सूत्रकृताङ्गद्वितीयाध्ययनद्वितीयोद्देशकनिर्युक्तिवचनस्य उष्णत्वाभिधानेऽपि यत् पुनस्तप्तग्रहणं तत् तस्य तप्तस्यैव पानयोग्यत्वोपदर्शनमिति वृत्तौ व्याख्यानात् सर्वदोष्णजलपान-

द्वादश-कुलकम्। ॥ ८६ ॥

स्यापि असंभवात्, कषायद्रव्याहृतस्य च जलस्य उत्कृष्टश्रावकैः श्राविकाभिश्च स्वकुटुम्बार्थमपि विधानादेषणीयस्य तस्य साधूनामुचितत्वेन गीतार्थैः संप्रति अभ्यनुज्ञानात्, कदाचित् चतुर्यरसिकतिलतन्दुलधावनादेरपि अनिषेधात्, तथा सार्द्धहस्ततृतीयमानकल्पस्य सार्द्धहस्तद्वितीयमानस्य पटलकस्यैकत्र मीलनात् पट्टकरप्रमाणकल्पमाचीर्णवन्तो गीतार्थाः, शैक्षकागीतार्थादीनां धृतिसंहननाल्पत्वेन प्रमादबाहुल्याच, भिक्षाटनादौ पात्रप्रावरणादिपटलककार्यस्य तेनैव पट्टकरप्रमाणेन प्रसाधनात्, पात्रमात्रकातिरिक्तोपकरणग्रहणमपि औपग्रहिकस्यातिरिक्तस्यापि ग्रहणात्, तथा च जघन्योत्कृष्टमध्यमौपग्रहिकानन्तरमुक्तम्—"जं चन्नमेवमाई तव संजमसाहगं जइजणस्स। ओहाइरेग गहियं उवगहियं तं वियाणाहि ॥ १ ॥" इत्यादिवचनात्, गीतार्थाश्रयणदर्शनाच्च न तद्वर्जनमिति, तथा च न निजमतिकल्पितसामाचार्याश्चारित्रत्वमिति न तदुपदर्शितमार्गेऽपि भवद्भिरवधातव्यमिति वृत्तार्थः ॥ २१ ॥

नवमं कुलकम्। ९

एवं तावत् क्रियाविकलानां लिङ्गिनां स्वप्रकल्पितक्रियाचारिणां मध्यस्थज्ञानिनां च स्वरूपमभिधाय अथ तादृशामेव लाभपूजाख्यातीर्लोके उपलभ्य सविषादमाह—

कुगुरुसु दढभत्ता तप्पहे चेव रत्ता, अमुणियसुयतत्ता साहुधम्म(म्मे)पमत्ता। ॥ ८६ ॥
गुरुकुलकमचत्ता संकिलेसप्पसत्ता, अहह कहमपत्ता चेव ही खाइपत्ता ॥ २२ ॥

व्याख्या—अहह कथमपात्ररूपा एव ख्याति प्राप्ता इति सम्बन्धः, 'कुगुरुषु' तात्त्विकज्ञानक्रियाविकलेषु आचार्यादिषु सुदृढ-

मतिशयेन भक्ता एते एव सम्यग् गुरव इति भावतो बाह्यभक्तिभाजः, तथा 'तत्पथे' कुगुरूपदिष्टमार्गे एव पूर्वोक्ते रक्ताः अन्तरङ्गानुरागवन्तः, तथोभयेऽपि 'अज्ञातश्रुततत्त्वाः' अविदितसिद्धान्तपरमार्थाः, यदि हि ते विदितश्रुततत्त्वा अभविष्यन्, तदा न तथा क्रियावैकल्यं स्वकल्पितक्रियाबहुमानो वा तेषामभविष्यत्, अत एव च 'साधुधर्मे' आगमाचरणाविशेषप्रतिष्ठितानुष्ठानरूपे उभयेऽपि 'प्रमत्ताः', एके तावन्निद्राविकथाकषायविषयासक्तत्वेन, अपरे तु मिथ्याभिनिवेशवशात् स्वकल्पितक्रियानुरागेण, तथा 'गुरुकुलं' सद्गुरुजनाधिष्ठितसुसाधुसमूहस्तस्य 'क्रमो' दशविधचक्रवालसामाचारीप्रभृतिकः समाचारः तेन 'त्यक्ता' वर्जिता, उभयेऽपि प्रमत्तत्वोक्तहेतुद्वयादेव, तथा 'संक्लेशे' क्रूरतया वि(चि)त्तविप्लवे 'प्रसक्ताः' अत्यन्तप्रतिबद्धाः, एके तावत् सुविहितविद्वेषेणक्रियापरिहारानुचिन्तनेन च, अपरे तु स्वकल्पितक्रियाभिनिवेशेनेति, 'अहहेति' खेदे, कथं केन प्रकारेण प्रचण्डदशमाश्चर्यमाहात्म्यादिना, किमित्याह—पात्राणि सद्गुणमहामाणिक्यकरण्डकाः तद्विपरीतानि तु न पात्राणि अपात्राणि सर्वथा विशुद्धसंयमरत्नानाधारा एवासाधवः, पुँल्लिंगता प्राकृतत्वात्, 'चः' समुच्चये, एवोऽवधारणे, स च योजित एव, 'ही' इत्यपि खेद एव, 'ख्यातिं' सुसाधुतया प्रसिद्धिं, 'प्राप्ता' लब्धवन्तः, अहहेति (अहहहीति) खेदवाचिपदद्वयोपादानमत्यन्तखेदप्रतिपादनार्थं, महत्कष्टस्थानमेतद् यदेवंविधास्तिरस्कारयोग्या अपि शुद्धसाधुमार्गप्रतिकूलचारित्वेन सुसाधुकीर्त्तिमाप्नुवन्तीति वृत्तार्थः ॥२२॥

अथ पूर्वोक्तस्वरूपे कुगुरावपि सुगुरुप्रतिपत्तिं कुर्वतां श्रावकाणां स्वरूपमाह—

कुगुरुवयणदूढा संसयावत्तछूढा, अइबहुभवरूढातुच्छमिच्छत्तमूढा ।

अपरिणयसुयत्थं जीवियासंसघत्थं, सुहगुरुरयमेवं विंति मुत्तं व देवं॥ २३ ॥

व्याख्या–'कुगुरूणां' पूर्वोक्तस्वरूपाणां वचनं वयमिह चरणाढ्या इत्यादिकं परकीयचेतो वञ्चनचतुरं, तेन 'दूढा' इति प्राकृतत्वाद् द्रोहिता द्रोहं प्रापिताः, यथा केचिन्मरणभीरवः केनापि विश्वासवचनैर्द्रुह्यन्ते, एवमेते अपि कुगुरुभिः, तथा 'संशयः' सद्गुरुविषयः संदेहः स एव 'आवर्त्तो' जलपरिभ्रमः तत्र क्षिप्ताः प्रापिताः, पूर्वं हि तैरन्यथा सद्गुरुस्वरूपमवधारितं, संप्रति तु अन्यथा श्रवणे दर्शने च संदेहः संपन्न इति, 'तथातिबहुभिः' अत्यन्तप्रभूतैर्भवैर्जन्मभी 'रूढं' संजातम् 'अतुच्छं' प्रचुरं प्रबलं यद् 'मिथ्यात्वं' विपर्य्ययज्ञानलक्षणं तेन 'मूढा' विचित्ततां प्रापिताः, न हि अविपर्यस्तज्ञानिनां देवबुद्ध्या कुगुरुदर्शनं भवतीति भावः, तथाविधाः सन्तः किं कुर्वन्तीत्याह–परिणतश्चेतसि अङ्गाङ्गिभावेन व्यवस्थितः श्रुतार्थः सिद्धान्ताभिधेयो यस्य स तथोक्तो, न तथेति अपरिणतश्रुतार्थः तं, तथा 'जीविका' भोजनादिजीवनोपायलाभः तस्या 'आशंसा' प्रार्थना तया 'ग्रस्तो' व्याप्तस्तम्, एवमगुणमपि गुरुं 'शुभगुरुरयं' सकलकल्याणकारी ज्ञानादिपात्रं युगप्रधानमित्येवं ब्रुवते, लोकानां पुरतोऽपि प्रतिपादयन्ति, मूर्त्तमिवेत्युपमानं, साक्षाद्रूपं 'देवं' वीतरागममुमिति, यथा वीतरागः सर्वथा पर्य्युपास्य एवमयमपीति, तथा चोच्यते–"मिथ्यादृशामुत्तमदेवरूपको न कौतुकं यत्प्रतिभात्यसद्गुरुः । पित्तावृताक्षा ह्ययसोऽपि गोलकं सौवर्णमेवाकलयन्त्यनाकुलाः ॥ १ ॥" एवंविधस्यापि कुगुरोरेवं मुग्धपर्य्युपासनामालोक्यापि न तत्रास्था विधेया इति भाव इति वृत्तार्थः ॥ २३ ॥ 

अथ दुष्टाग्रेसरदशमाश्चर्यादिप्रभावादत्यन्तनिर्गुणसाधुवेषधारिकृतं गाढपरिभवं सद्गुणसाधुजनस्यावलोक्य तान् उपालब्धुमाह—

अइ दुसमदुरंतच्छेरय ! भासरासी !, दुसमसमय ! हंभो तुम्भमेसप्पभावो ।
जमिह कवडकूडा साहुलिंगी गुणड्ढे, परिभविय पहुत्तं जंति नंदन्ति दूरं ॥ २४ ॥

व्याख्या—'अइ' इति कोमलामन्त्रणे दशस्वाश्चर्येषु दशमं सुसाधूनां तिरस्कारेण तद्दुःखदायित्वेन दुरन्तमाश्चर्यं कादाचित्कभावरूपं, तस्य संबोधनम् अयि दुःषमदुरन्ताश्चर्य ! भस्म भो भस्मराशे ! दुष्टत्रिंशग्रहविशेष ! तथा 'हंभो' इति प्राकृतसम्बोधनं, तच्च दुःषमासमये त(त्य)स्यादौ योजनीयं, ततो भो ! दुःषमासमय ! अवसर्पिणीपञ्चमारक विशेषेऽपि त्रीनपि दशमाश्चर्यादीन् प्रत्येकं संबोध्य उपालम्भमाह—'युष्माकं' भवतामेष वक्ष्यमाणः 'प्रभावो' माहात्म्यं, यदित्यादिना उपालभ्यं वस्तु आह—यत् किलेह प्रवचने, साधूनां लिङ्गं रजोहरणादिकं विद्यते येषां ते तथा, विशेष्यपदं चैतत्, किंविशिष्टाः सन्तः ? इत्याह—विश्वासनीयवेषोपदर्शनेन तदननुसारिवचनक्रियाविशेषाः कपटा वितथवादिनः कूटाः ततश्च कपटाश्च ते कूटाश्च इत्यादिकर्मधारयः, ते च किं कृतवन्तः ? इत्याह—'गुणाढ्यान्' ज्ञानादिक्षान्त्यादिसमस्तयतिधर्मैश्वर्यवतः, 'परिभूय' असद्दूषणशतारोपणेन महाजनसमक्षं तिरस्कृत्य, 'प्रभुत्वं' समस्तजनपूज्यत्वेन स्वामित्वं 'यान्ति' प्राप्नुवन्ति, न केवलं प्रभुत्वं यान्ति, 'नन्दन्ति च' परिवारपूजाख्यात्यादिभिर्वर्धन्ते च, न हि एवंविधात्यन्तनिर्गुणानां दुरन्तदशमाश्चर्यादिमहामात्यसाहाय्यमन्तरेण

एवं प्रभुत्वं वृद्धिर्वेति, न खलु प्रावृषेण्यजलदोद्भवनिमित्तेन गोनसविषधरविषविकारवृद्धिः, पठ्यते च–"भेकेन क्वणता सरोषपरुषं यत्कृष्णसर्पानने, दातुं कर्णचपेटमुद्धतधिया हस्तः समुल्लासितः। यच्चाधोमुखमीक्षणे विदधता तेनापि तन्मर्षितं, तन्मन्ये विषमन्त्रिणो बलवतः कस्यापि लीलायितम् ॥ १ ॥" इति। तदेवं यदि ईदृशानामपि एवं प्रभुत्वं वृद्धिश्च तन्नूनं युष्मत्प्रभावविलसितमिति उपालम्भ इति वृत्तार्थः ॥ २४ ॥

तदेवं केषांचित् तावद् गुरूणामपि क्रियाशैथिल्येऽपरेषां च स्वप्रकल्पितसामाचारीपरत्वे, केषांचित्तु मध्यस्थभावावलम्बनेन गुरूणां प्राचुर्ये, श्राद्धजनस्यापि प्रभूतस्य तद्भक्तत्वे शुद्धधर्मश्रद्धालूनां, केषांचित् श्राद्धानां यत् संप्रति संपन्नं तदाह—

किर बहुपहुपासे धम्मसुस्सूसणाए, कुमयविउडणेणासंकिया हुंति भावा।
नवसुविहियसेवासत्त तत्तत्थियाणं, कहमिव विवरीयं जायमवो इयाणिं ॥ २५ ॥

व्याख्या–'किलेति' आप्तवादे 'बहवः' प्रभूताश्च ते प्रभव आचार्याश्च, तेषां 'पार्श्वे' समीपे 'धम्मसुस्सूसणाए' इति प्राकृतत्वात् धर्मशुश्रूषया इत्यर्थः। ततश्च धर्मस्य सुसाधुसुश्रावकसमाचारलक्षणस्य शुश्रूषा–श्रवणवाञ्छा तया श्रवणमुपलक्ष्यते, ततः किल बहुभिः श्रोतव्यं बहुभ्यः श्रोतव्यमिति सिद्धान्तप्रसिद्धेः बहुभ्यः श्रवणे 'कुमतविकुट्टनेन' शाक्यभौतादिदर्शनस्य सर्वथा निषेधनेन 'आशंकिता' निस्संदेहा 'भवन्ति' संपद्यन्ते 'भावा' देवगुरुधर्मरूपाः पदार्थाः, एकस्माद् हि धर्मस्वरूपमात्रं ज्ञातमन्यस्माच्च तदेव विशिष्टमपरस्माद् विशिष्टतरमित्येवं सर्वथा पदार्थेषु संदेहो निवर्त्तत इति स्थितिः, एतत्तु इदानींत्रं ॥ ८८ ॥

विपरीतमस्माकं संवृत्तमित्याह–'नवा' अपूर्वा अपूर्वा ये 'सुविहिताः' सुविहितमन्या न पुनः परमार्थतः सुविहिता एव, तेषां 'सेवा' समासन्नावस्था विनयादिरूपपर्युपासना, तस्याम् 'आसक्ता' अत्यन्तमादरवन्तः तेषाम्, अत्र षष्ठीबहुवचनलोपो द्रष्टव्यः, तथा 'तत्त्वार्थिनां' सद्गुरुसद्धर्मज्ञानाभिलाषुकाणां, कथं केन प्रकारेण दुष्टकर्मोदयरूपेण इति तत्त्वप्राप्तिप्रकारेण, क्वचित् कथमिवेति पाठः, स च सुगम एव, विपरीतं संशयोच्छेदाय प्रवृत्ताना–मधिकतरसंशयहेतुत्वेन विपर्य्यस्तं 'जातं' सम्पन्नं, 'अव्वो' इति प्राकृते अहो इत्यर्थे सम्बोधनं, ततश्चात्यन्तविषण्णा इव तत्त्वार्थिनश्चिन्तयन्ति कथयन्ति च–अहो लोकाः! पश्यत अस्मदीयां कर्मपरिणतिं येनेद–मित्थं सम्पन्नम् 'इदानीं' सांप्रतम्, अयमभिप्रायः–नवनवप्रभुपर्य्युपासने हि तेषु कश्चित् प्रतिमायाः पुष्पधूपनैवेद्यदुग्धदधिघृतेक्षुरसादिस्नात्रं श्राद्धस्य विधेयमाह, अपरस्तु तस्य सर्वथा निषेधं, कश्चिच्च प्रतिमादेराचार्येण प्रतिष्ठाम्–अपरस्तु श्राद्धेन, कश्चित् शक्रस्तवादिदण्डकपञ्चकेन स्तुतिस्तोत्रैश्चैत्यवन्दनम्, अन्यस्तु शक्रस्तवमात्रेण, द्वादशावर्त्तवन्दनकमपि श्राद्धस्य कश्चिन्मुखवस्त्रिकया, कोऽपि चेलाञ्चलेन, श्राद्धादेरुभयकाल–मावश्यकविधानम् इतरश्च तन्निषेधमित्यादेः प्रभूताचार्यमतस्य श्रुतौ न कृत्यत्वाभिगमः सम्यगभूत्, प्रत्युत किमिदं कृत्यमुतान्यत्, किं वा ततोऽप्यन्यदिति संदेहशताकुलत्वमेवाजायत, तेनोक्तं विपरीतं जातमिति वृत्तार्थः ॥ २५ ॥

तदेवं प्रभूतमार्गाभासानुपदर्श्य संप्रति उपसंहरन् सन्मार्गनिष्ठत्वभवनोपदेशमाह—

इयकुपहपयारं सुद्धधम्मंधयारं, परिलसिरमसारं छड्डिउं निव्वियारं।
सइ अणभिनिविट्ठा सुत्तजुत्तीविसिट्ठा, गयभयमयतिट्ठा होह सम्मग्गनिट्ठा ॥ २६ ॥

व्याख्या—इति कुपथप्रचारं त्यक्त्वा यूयं सन्मार्गनिष्ठा भवतेति योगः, 'इति' पूर्वोक्तप्रकारा ये 'कुपथाः' सूत्रोत्तीर्णत्वेन कुमार्गा लिङ्गिकल्पितस्वकल्पितसामाचारीचारित्रादिलक्षणाः, तेषु 'प्रचारः' प्रवर्त्तनं 'छड्डिउं ति' त्यक्त्वा, एतत् त्यागे हि सम्यक् सन्मार्गनिष्ठत्वमिति भावः, किंविशिष्टं ? 'शुद्धधर्मस्य' आगमगीतार्थाचरणरूपस्य विधिविधीयमानानुष्ठानस्य अन्धकारमिवान्धकारं तदाच्छादकत्वात्, कुलिङ्गिप्रभृतिप्रवर्त्तितमार्गे हि प्रसरति सति क्व शुद्धधर्मप्रचारः ? इति भावः, पुनः कीदृशं ? 'परिलसिरम्' अत्यन्तोल्लसनशीलं, केनापि अस्खलितत्वात्, तथा 'निर्विचारम्' आगमानुसारिविचारविकलम्, अत एवासारं तुच्छम्, अप्रधानं वा, कुपथप्रचारं त्यक्त्वा कीदृशाः किं कुरुतेत्याह—भवत संपद्यध्वं, कीदृशाः ? सन्मार्गनिष्ठाः सन्मार्गे प्रतिश्रोतोरूपविशुद्धविधिपथे निष्ठा निश्चलमनस्कतयाऽवस्थानं येषां ते तथा, कीदृशाः सन्त ? इत्याह—'सक्कत्' सर्वदा 'अनभिनिविष्टा' आग्रहरहिताः तथा 'सूत्रयुक्त्या' श्रुतोपपत्त्या 'विशिष्टा' अनुरञ्जिताः सर्वमपि अनुष्ठानं श्रुतोक्त्यनुसारि अभिनिवेशरहितं च क्रियमाणं सफलं भवतीति उभयविशेषणविशिष्टत्वोपादानं, तथा तिड्ढाशब्दो देशीभाषया कार्पण्ये, ततश्च 'गतभयमदकार्पण्यविशेषा' निवृत्ताहंकारत्रासकार्पण्याः, संभवति हि विधिधर्ममार्गप्रवृत्तौ भिन्नधर्मजनकादिभयं कदाचिदितरेभ्योऽहमुत्कृष्ट इति मदश्च, दानादिप्रवर्त्तने च कार्पण्यमिति, ते च विधिधर्ममार्गप्रवृत्तौ वर्जनीया एव, तद्वर्जन एव सम्यग् निःशंकविधिधर्मनिर्वाहादिति भाव इति वृत्तार्थः ॥ २६ ॥ सर्वत्र चात्र कुलके मालिनीवृत्तमेवेति शुभम् ॥



इति श्रीयुगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ नवमकुलकविवरणं समाप्तम् ॥

# अथ दशमं कुलकम् ।

नवमे हि कुलके स्वदर्शन एवाभिनिवेशादिवशा–दुपजातावान्तरमतान्तरनिवृत्त्या भावरूपं सन्मार्गनिष्ठत्वमुपदिष्टं, दशमे तु कामादिभावनिषेधेन धर्ममार्गनिश्चलतोपदिश्यत, इत्येवंसम्बद्धस्यास्य नरभवाद्यसुलभलाभे स्वहितधर्मकर्मोपदेशं वृत्तत्रयेणाह—

इत्थुग्गकुग्गहकुसासणभिल्लभीमे, चिंताविसुक्कडकसायमहाभुयंगे ।
अन्नाणदारुणदवे नवनोकसाय–लल्लक्कसावयगणे भवसंकडिल्ले ॥ १ ॥
जीवा चउग्गइगया कुलकोडिजोणी–लक्खेसु दुक्खतविया बहुसो भमंति ।
दीहद्धमेव भवकायठिईहिं धम्म–कम्मक्खमं नरभवाइ न पाउणंति ॥ २ ॥
गंभीरनीरनिहिनट्ठमणिं व धम्म–सामग्गिमित्थ समिलाजुगजोगतुच्छं ।
एमेव पाविय हिं पि कहिं चि काग–तालीयनायवसओ सहियं करेह ॥ ३ ॥

व्याख्या–अत्र स्थावरजङ्गमादिपदार्थोपलम्भरूपतया प्रत्यक्षे भवसंकडिल्ये संसारगहने जीवा बहु भ्रमन्तीति संबन्धः, की-

दृशे ? 'उग्रः' प्रचण्डः 'कुग्रहः' कदभिनिवेशो येषां ते तथा, युक्तिबाधितत्वेन कुत्सितं शासनं शास्त्रं येषां ते तथा, ततश्चोग्रकुग्रहाश्च ते कुशासनाश्चेति कर्मधारयः, अथवा उग्रः कुग्रहो यस्मात् तथाविधं शासनं येषामिति, त एवातिक्रूरचित्ततया दुष्टवचनत्वेन च 'भिल्लाः' पर्वतवासिचौराः तैः 'भीमे' भीषणे, तथा 'चिन्ता' नानाविधानर्थानुध्यानं सा एव महामोहहेतुत्वाद् 'विषं' गरलं तेन 'उत्कटा' अतिप्रबला ये 'कषायाः' क्रोधादयस्त एव मरणप्रबन्धनिदानत्वात् 'महाभुजङ्गा' गुरुसर्प्पा यत्र तत्तथा तत्र, तथा 'अज्ञानं' मिथ्याज्ञानं तदेव समस्तसम्यक्त्वादिगुणदारुदाहकत्वाद् 'दव' आरण्यको ज्वलनो यत्र तत्तथा(तत्र), तथा 'नवेति' नवसंख्या 'नोकषायाः' कषायसहचारिणो हास्यादयः त एव सुमुनिजनमनःकुरङ्गत्रासोत्पादकत्वाद् 'लल्लका' रौद्राः श्वापदगणाः सिंहव्याघ्रतरक्षादिपशुसमूहा यत्र तत्तथा तत्र, एवंविधे भवगहने ॥१॥ 'जीवाः' प्राणिनः 'चतुर्गतिगता' नरकादिगतिचतुष्टयावस्थिताः सन्तः, कुलकोटयश्च योनयश्च पूर्वव्याख्याताः तासां 'लक्षेषु' शतसहस्ररूपेषु 'भ्रमन्ति' पर्य्यटन्ति, कीदृशाः सन्तो ? 'दुःखतप्ताः' शारीरमानसव्यथाव्यथिताः, बहुशोऽनेकवारं, कियन्तं कालमित्याह–'दीर्घो' महानुत्सर्पिण्यादिरूपोऽद्धा काल–स्तम्, एवकारोऽवधारणे, ततश्च महामिथ्यादृशां दीर्घकालमेवेति, शेषाणां तु अनियमः, केन केनेत्याह, भवकायस्थितिभ्यां पृथिव्यादिषु चतुर्षु पुनः पुनः तत्रैवोत्पत्ते–रसंख्यातोत्सर्पिण्यवसर्पिणीनामवस्थानरूपा वनस्पतिषु च ता एवानन्ता अवस्थानमिति कायस्थितिः। भवस्थितिस्तु एकदा पृथिव्यादिषूत्पत्तौ द्वाविंशतिवर्षसहस्राद्यवस्थानं, भवस्थितिस्तावत् पञ्चमकुलकादावुक्ता–"बावीसई सहस्सा सत्तेवसहस्स तिन्निहोरत्ता। वाए तिन्नि सहस्सा दसवाससहस्सिया रुक्खा ॥१॥ एवं कालं पर्य्यव्यापि किमित्याह–'नरभवो' मनुष्यजन्म तदादिकम्, आदिशब्दात् प्रधानक्षेत्रादिग्रहः, 'न प्राप्नुवन्ति' नैव लभन्ते, कीदृशं

धर्मकर्माणि देवपूजाप्रव्रज्यादिसदनुष्ठानानि तेषु क्षमं समर्थं, न हि नरभवमन्तरेण प्रव्रज्या क्वापि प्राप्यते ॥२॥ तदियता नरभवादेर्दुर्लभत्वं प्रकाश्य दुर्लभस्यापि यद्वद् यथा च प्राप्तिः तदुपदर्शनपूर्वकं स्वहितकरणोपदेशमाह—गम्भीरेत्यादिना, 'गम्भीरः' अत्यन्तनिम्नः स चासौ नीरनिधिश्च समुद्रः तत्र 'नष्टं' कथंचिद् भ्रष्टं मणिमिव रत्नमिवेत्युपमानं, धर्मसामग्रीं सुकृतसाधनसमग्रतां नरत्वादिकाम्, इत्थमिति अत्र भवारण्ये, कीदृशीं ? समिलाया युगेन योगः पूर्वोदितस्वरूपः तत्तुल्यां तत्समां, यथा समिलाया युगेन योगो दुर्घटः तद्वत् नरत्वसुक्षेत्रादियोग एकत्र मीलकोऽपीति भावः, ईदृशीं च इमाम्, एवमेवेति वकारलोपादेवमेवेति पाठे जन्मान्तरीयसुकृतोल्लासादित्यर्थः, 'प्राप्य' लब्ध्वा, कथंचिदिति दैववशात्, तथा क्वचिदपि देशविशेषे काकतालीयज्ञातं पूर्वोक्तं, तस्य 'वश' आयत्तता ततः, पूर्वं हि नरत्वादेरेव युगसमिलाज्ञातेन दुर्घटत्वमुक्तम् इह तु काकतालीयज्ञातेन तल्लाभस्येति न पौनरुक्त्यम्, एवं चात्यन्तदुःप्रापं(पां) धर्मसामग्रीं प्राप्य स्वहितमात्मानुकूलं धर्मकृत्यं वक्ष्यमाणरूपं कुरुत विधत्तेति वृत्तत्रयार्थः ॥ ३ ॥

अथ धर्मकृत्यं प्रचिकटयिषुः पीठमारचयन्नाह—

जंतू य दुक्खविमुहासइ सुक्खकंखी, सुक्खं च अक्खयमभिक्खणमाहु मुक्खे।
सम्मत्तनाणचरणाणि य तस्सुवाओ तस्साहणाय पुण रे ? इय निच्चकिच्चं ॥ ४ ॥

व्याख्या—'जन्तवश्च' प्राणिनः पुनः 'चः' पुनरर्थे, 'दुःखविमुखाः' स्वशरीरादिबाधापराङ्मुखाः, तथाऽ'सकृत्' सर्वदा 'सुख-

द्वादशं- कांक्षिणः' स्वात्मनि आनन्दसंवेदनाभिमुखाः, 'सौख्यं' चाक्षय-मनश्वर-मभीक्ष्णं-निरन्तरानुभवं चाहुः ब्रुवते तीर्थकरादयः, दशमं
कुलकम् । केत्याह-'मोक्षे' कृत्स्नकर्मक्षयलक्षणे, स्वर्गादौ हि तद् भवदपि नाविनश्वरं नापि निरन्तरमिति, तथाविधसुखलाभोऽपि कथ- कुलकम्
॥ ९१ ॥ मित्याह-सम्यक्त्वज्ञानचारित्राण्येव प्रसिद्धानि, चोऽवधारणे, 'तस्य' मोक्षसुखस्य 'उपायो' निदानं, तथा च किमित्याह-'तेषां' १०
सम्यक्त्वज्ञानचारित्राणां 'साधनाय' निष्पादनाय पुनः, 'रे'? इत्यधर्मामन्त्रणवत् अतिलघुसम्बोधनेऽपि वर्त्तते, इति साध्वपे-
क्षया लघुतरश्राद्धसंबोधनेऽत्र द्रष्टव्यं, ततो रे? इति भोः श्राद्धाः! इत्येतद्वक्ष्यमाणं 'नित्यकृत्यं' प्रतिदिनविधेयमनुष्ठानं वर्त्तते
इति, तत्कुरुध्वमिति, अथवा नित्यं सर्वदा कृत्यं कार्यं, भवद्भिरिति गम्यते, अनुस्वारलोपः प्राकृतत्वादिति, क्वापि चेइ-
येति पाठः तत्र, चैत्यानां जिनप्रतिमानां नित्यकृत्यं चैत्यवन्दनपूजनादिकं सार्वदिकं विधेयं, तत् कुरुतेति शेषः, तस्यापि
सम्यक्त्वविशुद्धिहेतुत्वादिति भाव, इति वृत्तार्थः ॥ ४ ॥

तदेव प्रतिपादयिषुः प्रथमं तावत् तदुपदेशकगुरुसेवामाह—

संविग्गसग्गुरुकमागयजुत्तजुत्ती-वीसंतसुत्तपरमत्थविऊ जयंत ।
सेवेह धम्मगुरुणो बहुमाणभत्ति-रागेण ताण वयणं च मणे धरेह ॥ ५ ॥ ॥ ९१ ॥

व्याख्या-'संविग्ना' मोक्षाभिलाषुकाः ते च ते सद्गुरवश्च चतुर्दशपूर्वधरप्रभृतयः तेषां 'क्रमः' परिपाटिः संप्रदायः तेनागतं
शिष्यप्रशिष्यन्यायेनाधीतं, तथा 'युक्ताः' संगताः प्रमाणाबाधिता 'युक्तय' उपपत्तयः तासु 'विश्रान्तं' व्यवस्थितं, ततश्च सद्गु-

रुक्रमागतं च तद् युक्तयुक्तिविश्रान्तं च, तच्च तत् सूत्रं च श्रुतं च, तस्य परमार्थः तत्त्वं तद् विदन्ति जानन्ति ये ते तद्विदः, विभक्तिलोपः प्राकृतत्वात्, तथा 'जयंत' इति प्राकृतत्वाद् यतमानान्, साधुक्रियास्विति गम्यते, 'धर्मगुरुन्' सन्मार्गोपदेशकाचार्यान्, 'सेवत' विनयादिविधानेन पर्युपासत। अयमभिप्रायः–"अवलंबिऊण कज्जं जं किंची आयरंति गीयत्था। थोवावराहबहुगुणं सव्वेसिं तं पमाणं ति ॥१॥" इत्यादि श्रुतं तावत् सद्गुरुक्रमागतं, तत्र च पाश्चात्यश्रुतधरैर्द्रव्यतो मासकल्पप्रायोग्यक्षेत्राद्यभावादियुक्तयुक्तिविश्रान्तो मासकल्पविहारवद् इत्यस्य प्रमाणोपपन्नतया दृष्टान्तीकृतत्वे परमार्थः कः संपन्नो द्रव्यतो मासकल्पनिषेधः तदेवं गीतार्थाचरितमपि द्रव्यतो मासकल्पाविहारमवमत्य ये द्रव्यतो मासकल्पविहारं व्यवस्थापयन्ति ते परमार्थतः श्रुतापलापकारिणो बोद्धव्याः, तदुक्तम्–"यत्प्रायोग्यवरक्षेत्राद्यभावेऽपि वदन्ति ये । मासकल्पमिदानीमप्याधेयं द्रव्यतोऽपि च ॥ १ ॥ तेऽनुकुर्वन्ति विच्छिन्नजिनकल्पप्रवादुकान् । श्रुतसंहननोद्रेकान्निःस्वान्नूनं दिगम्बरान् ॥ २ ॥ तदेवम् 'अवलंबिऊण कज्जमित्येतद्' दृष्टान्तत्वमात्रेणोक्तम् एवं अन्यस्यापि श्रुतधरस्य युक्तयुक्तिविश्रान्तत्वं ये विदन्ति ते सुसाधवः सेव्या इति भावः, न केवलं सेवत, किन्तु 'बहुमानः' अन्तरङ्गप्रीतिः तद्विशिष्टो 'भक्तिरागो' बाह्यप्रतिपत्तिरूपोऽनुरागः तेन, तेषां सेवनीयसद्गुरूणां 'वचनं' धर्मोपदेशप्रतिबद्धं वाक्यं च, 'मनसि' चित्तेऽवधारयत अवस्थापयत, सद्गुरुवचसो स्थापने हि तद्भक्तिः व्यज्यते, सद्धर्मानुष्ठानप्रवृत्तिश्च सम्यग् भवतीति भाव इति वृत्तार्थः ॥ ५ ॥

अथ इन्द्रियवशीकारादि–उपदेशमाह—

वेरग्गभावणकसासुगुरुवएस–रज्जूहि इंदियतुरंगगणं दमेह ।

द्वादश-
कुलकम् ।
॥ ९२ ॥

नाणंकुसेण गुणपायवलग्गसुद्दा–मुद्दामकामकरिणं सवसं विहेह ॥ ६ ॥

दशमं
कुलकम् ।
१०

व्याख्या–'वैराग्यभावना' स्त्र्यादिविषयाणाम् अशुभसंज्ञाभावनं सा एवेन्द्रियतुरङ्गदमनपटीयस्त्वात् 'कशा' चर्मयष्टिः, तथा 'सुगुरूणां' शुद्धचारित्रिणाम् 'उपदेशाः' कामकटुविपाकत्वोपदेशकवाक्यानि, ते एव 'रज्जवो' नियन्त्रणवरत्राः ततश्च वैराग्यभावनकशा च सुगुरूपदेशरज्जवश्चेति द्वन्द्वः ताभिः, 'इन्द्रियाणि' स्पर्शनादीनि तान्येव चञ्चलत्वात् 'तुरङ्गा' अश्वाः तेषां 'गणः' समूहस्तं, 'दमयत' नियन्त्रयत, तथा ज्ञानं योषिदादिशरीरयथावस्थितस्वरूपावबोधः तदेव कामकरिवशीकारहेतुत्वात् 'अंकुशः' शृणिः तेन, किं कुरुत? इत्याह–'गुणा' ज्ञानचारित्रादयस्ते एवावान्तरभेदशाखादिमत्त्वात् 'पादपाः' तरवः तेषु 'लग्नं' भञ्जनाय सम्बद्धं, तथा उद्गतं दाम बन्धनं शृंखलादिकं यस्मादसौ उद्दामा, स चासौ उद्दामकामश्च अत्युद्भटमदनश्च स एव महामदोत्पत्तिनिमित्तत्वात् 'करी' हस्ती तं, 'स्ववशम्' आत्मायत्तं 'विधत्त' कुरुतेति वृत्तार्थः ॥ ६ ॥

अथ लिङ्गिनां कुतीर्थिकानां च चेष्टितमुत्कीर्त्य शुद्धजिनधर्ममार्गे लगतेति वक्ष्यति, तत्र पूर्वं तावत् लिङ्गिनां कुचेष्टितं वृत्तद्वयेनाह–

॥ ९२ ॥

कालाइदोसवसओ घणकम्मकिट्ठ–चिट्ठत्तणेण य जणा बहुसंकिलेसा ।
तो लिंगिणो य गिहिणो य दढं विमूढा, किं किं न जं अणुचियं चिरमायरंति ॥ ७ ॥

184

नट्ठा य ते सयमसंगकुहेउजुत्ती, अन्नेसि नासणकए बहुहा वयंति ।
पायं जणा सयमईइ अभाविभद्दा, तं चेव तत्तमिव लिंति चइंति मग्गं ॥ ८ ॥

व्याख्या–'जना' लोकाः तावत् सामान्येन 'बहुसंक्लेशाः' प्रभूतचित्तविप्लवा वर्त्तन्ते, कुत इत्याह–'कालादिदोषवशतो' दुःषमादुरन्तदशमाश्चर्यादीनां यो दोषोऽशुभभाववर्धनादिलक्षणोऽपराधस्तस्मात्, तथा 'घनानि' निबिडबन्धनहेतु(बद्ध)त्वेन चिक्कणानि यानि 'कर्माणि' ज्ञानावरणादीनि तैः 'क्लिष्टा' स्वपरयोर्बाधाहेतुः 'चेष्टा' प्राणातिपातादिरूपा क्रिया येषां ते तथा तेषां भावः तत्त्वं तेन, 'चः' समुच्चये, 'तो' इति ततो हेतुरूपाद् लोकस्य बहुसंक्लेशत्वे सति किमित्याह–'लिङ्गिनः' क्रियादिविकलाः साधवो 'गृहिणश्च' श्रावकाः, 'दृढम्' अत्यर्थं 'विमूढा' अत्यन्तमोहभाजः, चशब्दौ द्वयोरपि तुल्ययोगक्षेमताप्रतिपादनार्थौ, एवंविधाश्च सन्तः ? 'किं किम्' इत्यनिर्दिष्टविशेषम्, 'अनुचितं' लोकलोकोत्तरविरुद्धं देवद्रव्योपयोगप्रवचनात्यन्तलाघवकारि परस्परकलहादिकं च धर्मपरायणजनायोग्यं तद् यत् 'न आचरन्ति' न कुर्वन्ति ? अपि तु सर्वमपि समाचरन्ति, नकारो भिन्नक्रमे योजनीयः, 'चिरं' बहुकालं निरन्तरमित्यर्थः ॥७॥ ते चानुचिताचरणशीलाः साध्वादयः, 'स्वयम्' आत्मना तावत् 'नष्टाः' कुग्राहकुविकल्पैः सर्वथा सदाचाराद् भ्रष्टाः तादृशाश्च सन्तोऽन्येषां मुग्धबुद्धीनां 'नाशनकृते' नाशनाय सदाचारभ्रंशनार्थं, किमित्याह–'असङ्गकुहेतुयुक्तीर्वदन्ति', तत्र सङ्गः स्वसाध्येन सम्बन्धो, न विद्यते सङ्गो येषां हेतूनां चाक्षुषत्वादीनामिव शब्दानित्यत्वे साध्ये तेऽसङ्गाः, कुहेतवोऽसिद्धत्वादिदोषदुष्टानि साधनानि, कुशब्दस्य युक्तिभिरपि सम्बन्धात् कुयुक्तयः, स्वसा-

ध्यासाधिकाः कुत्सितोपपत्तयः ता 'बहुधा' बहुभिः प्रकारैः 'वदन्ति' ब्रुवते, तथाहि—जिनशासने साधूनां पार्श्वस्थादीनामपि क्वचिद् वन्दनमभ्यधायि, आधाकर्मादेरपि क्वचिद् ग्रहण—मभ्यनुज्ञातम्, एकाकिनोऽपि साधोः क्वचिद् विहार उक्त—स्तस्मात्—"न वि किंचि अणुन्नायं पडिसिद्धं वा वि जिणवरिंदेहिं । मुत्तुं(तुं) मेहुणभावं न तं विणा रागदोसेहिं ॥ १ ॥" इत्यादियुक्तेः सर्वथाऽपि अयुक्तप्रतिषेधेन युक्त एव प्रवर्त्तितव्यम् इत्येवंरूपो विधिधर्ममार्गः क्वावकाशं लभतां, तथा च साम्प्रतं न सन्त्येव सुसाधुसुश्रावकाः तदुचितानुष्ठानस्य अनिर्वाहाद्, इत्यादिवचनैः अन्यानपि नाशयन्ति, तच्चायुक्तं, यत उत्सर्गापवादाभ्यां जिनमते सर्वमनुष्ठानं स्थितं, ततश्च यदि अपवादेन कदाचित् पार्श्वस्थादिवन्दनकाऽऽधाकर्मादिकमुक्तम्, एतावता किमायातं 'न वि किंचि अणुन्नायमित्यादि' अव्यवस्थायाः ? इति कुयुक्तिरेषा, तथाऽयुक्तप्रतिषेध—युक्तप्रवृत्तिरूपो विधिधर्ममार्गोऽपि स्तोकः स्तोकः क्वचिदवश्यमभ्युपेतव्योऽन्यथा दुःप्रसभान्तचरणोक्तेः मिथ्यात्वप्रसङ्गात्, तथा च न सन्त्येव संप्रति सुसाधव इत्याद्यनुमानं "ब्राह्मणेन सुरा पेया द्रवद्रव्यत्वात् क्षीरवत्", इत्यनुमानवदागमबाधितमिदमनुमानम्, एवं च कुहेतुता, तथा तदुचितानुष्ठानस्यानिर्वाहादिति, स्वसाध्यासम्बद्धो हेतुः असङ्गः, यतोऽत्र सुसाध्वभावः साध्यः तत्र च न वर्त्तते हेतुः, अनुष्ठानानिर्वाहो ह्यनुष्ठाने वर्त्तते, न तु साधुषु इति, ततश्च धवलः प्रासादः काकस्य कार्ष्ण्यादिवद् व्यधिकरणो हेतुरयमसङ्गः, अयमपि असिद्धहेत्वाभासभेद एव, पक्षेऽसंबद्धत्वात्, एवं चासङ्गकुहेतुयुक्तीर्वदतीति सिद्धम्, एतदेव नष्टकुलिङ्गिभापितमेव तत्त्वमिव यथावस्थितवस्तुस्वरूपमिव नूनमेतद् लिङ्गिदर्शितम्, अधुना साध्वाद्यभावम् इत्थमेव 'लान्ति' गृह्णन्ति प्रतियन्ति, न केवलं गृह्णन्त्येव अपि तु 'त्यजन्ति' परिहरन्ति, तदुक्त्या

भ्रमिताः सन्तो 'मार्गं' शुद्धविधिधर्मपथमिति, अथवा मार्गम् अनेकान्तवादलक्षणं तस्यैव प्रामाणिकत्वात्, तद्विपरीतैकान्तवादसाधने हि ये हेतवः ते सर्वेऽपि असिद्धत्वादिदोषदुष्टा एव, तथा चोच्यते-"असिद्धः सिद्धसेनस्य विरुद्धो मल्लवादिनः। उभयं समन्तभद्रस्य हेतुरेकान्तसाधने ॥ १ ॥" इति, तं मार्गं तात्त्विकमोक्षपथं त्यजन्तीति, के इत्याह-'जना' मुग्धलोकाः 'स्वमत्या' आत्मीयबुद्ध्यैव, कीदृशाः सन्त इत्याह-भावि भविष्यत् संपत्स्यमानं भद्रं सुगतिलाभादिलक्षणं कल्याणं येषां ते तथा, न तादृशा अपि तु अभाविभद्राः, तत् किं सर्वेऽप्येवं ? नेत्याह-'प्रायो' बाहुल्येन, मुग्धा हि निर्विचारकाः केचिद्, अन्ये तु प्रगल्भबुद्धयो जिनमततत्त्वाभिज्ञा न गृह्णन्त्येवेति वृत्तार्थः ॥ ८ ॥

उक्तं लिङ्गिचेष्टितम् अथ कुतीर्थिकचेष्टितमाह—

मिच्छत्तछन्नपडिकप्पियजुत्तिहीण—नाणाकुसत्थमयमूढकुतित्थियाणं ।
दुव्वासणाविनडिया पडिया वसे ही, जीवा कयाइ न भवंति भवंतगामी ॥ ९ ॥

व्याख्या—कुतीर्थिकानां वशे पतिता जीवा भवान्तगामिनो न भवन्तीति योगः, कीदृशानामित्याह—'मिथ्यात्वच्छन्नानि' विपर्यस्तज्ञानान्तरितानि तद्गर्भाणीति यावत्, 'छत्तेति' पाठपक्षे तु मिथ्यात्वमेव सज्ज्ञानालोकाच्छादकत्वात् छत्रमातपत्रं येषु, तथा 'प्रतिकल्पितानि' प्रमाणमन्तरेण स्वयमुत्प्रेक्षितानि, तदर्थानामुत्प्रेक्षितत्वादिति भावः, तथा 'युक्तिहीनानि' उपपत्तिविकलानि, अत्रापि तदर्थानां तथात्वादिति भावः, ततो मिथ्यात्वच्छन्नानि च तानि प्रतिकल्पितानि युक्तिहीनानि चेति

कर्मधारयः, तानि च तानि 'नानाकुशास्त्राणि' चानेकसिद्धान्ताः तैः मदोऽहंकारः तेन 'मूढा' विचित्ततां प्रापिताः, अथवा तादृशानि शास्त्राणि येषां तानि मतानि दर्शनानि तैर्मूढा इति पूर्ववत्, ते च ते 'कुतीर्थिकाश्च' शाक्य–सांख्य–नैयायिक–वैशेषिक–मीमांसकादयोऽन्यदर्शनिनः तेषां। किमित्याह–'दुर्वासनाविनटिता' निरन्तरं तच्छास्त्रश्रवणानुचिन्तनकुसंस्कारेण विगोपिताः, तथाहि–शाक्याः तावत् सर्वं क्षणिकमेवाहुः, सांख्यास्तु गुणत्रयात्मकप्रकृतिविकारभूतं परस्परेणाभिन्नं सर्वमुदासीनपुरुषकल्पितं च जगदिति, नैयायिकवैशेषिकौ तु गुणगुणिनोः अत्यन्तभेदमेव, मीमांसकास्तु तयोर्भेदाभेदं सर्वज्ञाभावं चेति, सर्वत्र चात्र मिथ्यात्वगर्भत्वमेकान्तवादित्वेनैव, क्षणिकत्वस्य प्रकृत्यादीनां च स्वोत्प्रेक्षितत्वमेव, सर्वथा तत्र प्रमाणाभावाद्, यथा चैतदेवं तथा संमत्यादेः ग्रन्थाद् बोद्धव्यं, गुणगुणिनोः अत्यन्तभेदस्तु प्रत्यक्षविरोधात् निरसनीयः, किं च अत्यन्तभेदे नैयायिकाद्यभिमते सांख्याभिमतेऽत्यन्तभेदे चानुमानाङ्गव्याप्तेरेवाग्रहः, तथा चोक्तम् अनेकान्तजयपताकायाम्–''नान्योऽन्यव्याप्तिरेकान्तभेदेऽभेदे च युज्यते । अतिप्रसङ्गाच्चैक्याच्च शब्दार्थानुपपत्तितः ॥१॥ अन्योऽन्यमिति यद्भेदं व्याप्तिश्चाह विपर्य्ययम् । भेदाभेदे द्वयोस्तस्मादन्योन्यव्याप्तिसंभवः ॥ २ ॥'' इति, सर्वज्ञाभावे तु शिवस्वर्गमार्गादौ सर्वत्रान्धत्वमापद्येत, तस्मादेवं स्वोत्प्रेक्षितत्वं युक्तिहीनत्वं च तच्छास्त्रार्थानामित्येवंविधेषु अपि तेषु जीवानां दुर्वासना निरंकुशाः कर्मवशगानां संपद्यन्ते, तेन तद्वासनाविनटिता इत्युक्तं, न केवलं विनटिताः 'पतिता' अवस्थिताश्च, क्वेत्याह–'वशे' आयत्ततायां, सामर्थ्यादेव तेषां कुतीर्थिकानामेव, 'हीति' खेदे, 'जीवाः' प्राणिनः, कदाचित् क्वापि काले, 'न भवन्ति' न संपद्यन्ते, कीदृशाः ? 'भवान्तगामिनः' संसारपर्य्यन्तप्रापका इति वृत्तार्थः ॥ ९ ॥

तदेवम् उभयेषामपि लिङ्गिनां कुतीर्थिकानां च वर्जनेन धर्मप्रवृत्त्युपदेशमाह—

ता भूरिकुग्गह—कुतित्थि—कुदेसणाउ, सुच्चा वि निच्चमचला जिणधम्ममग्गे ।
भो ? लग्गहुज्झियकुधीभयसंकलज्जा, एवं च होहिह सुधम्महिगारिणु त्ति ॥ १० ॥

व्याख्या—यतो लिङ्गिनः कुतीर्थिकाश्च संसर्गेणापि महानर्थकारिणः, 'ता' इति ततस्तस्माद् 'भूरयः' प्रभूताः 'कुग्रहा' अभिनिवेशा येषां ते भूरिकुग्रहा लिङ्गिप्रभृतयः, तथा 'कुतीर्थिका' बौद्धादयः ततो भूरिकुग्रहाश्च कुतीर्थिकाश्चेति द्वन्द्वः, ततस्तेषाम् उभयेषामपि, अथवा भूरिकुग्रहाश्च ते कुतीर्थिनश्चेति तेषां 'कुदेशना' असत्प्रवृत्तिहेतवः संप्रति सर्वथा विधिधर्माभावश्राद्धादिविधानप्रभृतय उपदेशाः, ताः 'श्रुत्वापि' आकर्ण्यापि, अपिशब्दस्तच्छ्रुतेरसत्प्रवृत्तिसामर्थ्यमुपदर्शयति, एवमपि भोः श्राद्धा ! यूयं 'लगत' सादरमनुपक्ता भवत, केत्याह—'जिनधर्ममार्गः' तीर्थकृत्प्रणीतसुश्रावकसमाचारस्तत्र, कीदृशा लगत ? इत्याह—निश्चला(अचला) धर्माप्रतिपातिमानसा न तु कुलिङ्गिकुतीर्थिकादि दुर्देशनाश्रुतिसन्दिग्धचित्ताः, 'नित्यं' सर्वदा, पुनः कीदृशा ? 'उज्झितकुधीभयशङ्कालज्जाः' तत्र कुधीर्लिङ्गिप्रभृतिदुर्देशनाजनिता कुत्सितबुद्धिः, भयशंकालज्जास्तु पूर्वव्याख्याताः तत उज्झिताः त्यक्ताः कुधीभयशंकालज्जा यैस्ते तथा, ह्रस्वत्वं प्राकृतत्वात् । 'एवमिति' एवमेवेत्यर्थः, 'भविष्यथ' संपत्स्यध्वे यूयं, क्वचिदेवं 'हीति' पाठस्तत्र हिशब्दोऽवधारणे द्रष्टव्यः, कीदृशाः ? 'सुधर्माधिकारिणः', संप्रति तावत् शोभनद्वादशव्रतादिरूपसुश्रावकधर्मयोग्याः क्रमेण च सुसंयतधर्मयोग्या अपि, इतिशब्दः परिसमाप्तौ, तदेवं कुदेशनया येषां मनो न वास्यते त एव सुश्रावका इति। दशस्वपि एषु वृत्तेषु वसन्ततिलका च्छन्द इति वृत्तार्थः ॥ १० ॥

द्वादश-कुलकम्। ॥ ९५ ॥

तदेवमनेकधा सदुपदेशदानेऽपि ग्रन्थकारः स्वमनोऽभिरुचितनीत्या श्रावकाणां प्रवृत्तिमनुपलभ्यमानोऽप्रस्तुतप्रशंसालंकारेण सविषादम् आत्मचरितानुवादेन श्रावकान् सम्बोधयन्नाह— (दशमं कुलकम्। १०)

भूयोभिः सुकृतैः कथंचन जनैः कल्पद्रुरासाद्यते,
संप्राप्तोऽभिमतं प्रयच्छति सकः संकल्पमात्रादपि।
सोऽप्यस्माभिरलाभ्यभाजि च चिरं दध्ये विधायाञ्जलिं,
घोरे व्यक्तमयुक्तमित्यपि वृथाऽभूदित्यचिन्त्यो विधिः ॥ ११ ॥

व्याख्या—'भूयोभिः' प्रभूतैः 'सुकृतैः' पुण्यैः 'कथंचन' महाकृच्छ्रेण, 'जनैः' लोकैः 'कल्पद्रुः' कल्पितार्थप्रदः तरुविशेष 'आसाद्यते' प्राप्यते, ततः किमित्याह—'संप्राप्तो' लब्धः सन् 'अभिमतम्' अभीष्टं मनोवांछितं वस्तु 'प्रयच्छति' ददाति, अर्थात् तेभ्य एव जनेभ्यः, यः प्राप्तः कल्पद्रुः स एव 'सकः' स्वार्थिककप्रत्ययान्तः, कस्मादित्याह—'संकल्पमात्रादपि', संकल्पनं संकल्पः चेतसा अभिसन्धानं स एव संकल्पमात्रं तस्मात्, अयमर्थः—न तद्ग्रहणाय प्रवृत्त्यादिकं करोति, केवलं संकल्पयत्येव, य एवंविधो महाप्रभावः कल्पतरुः, सोऽपि आस्तां तदितर इत्यपेरर्थः, अस्माभिः अल्पपुण्यैः इत्यात्मनिर्देशे, 'अलाभि' लब्धः, पुण्योदयात्, न केवलं लब्धोऽभाजि च, भजश्चिञ् सेवायामिति पाठात् सेवितश्च, सततसमासन्नावस्थानपुष्पबलिधूपप्रदानादिना ॥ ९५ ॥

समाराधितश्च, न केवलमभाजि दध्ये च, "स्मृध्यै चिन्तायामिति" वचनात्, ध्यातश्च, परमात्मनि एव सम्यगाराधनाय निरन्तरमनुचिन्तितः, किं कृत्वा? विधाय विरचय्य 'अञ्जलिं' करकुड्मलयोजनरूपम्, एषोऽप्याराधनप्रकारविशेष एव, ततः कुत्र किं संवृत्तमित्याह–'घोरे' अत्यन्तरौद्रे अर्थात् संसारे, इत्यपि एवमप्याराधनं 'वृथा' निरर्थकमभूत् सम्पन्नम्, एतच्च व्यक्तं स्पष्टम् 'अयुक्तम्' असंगतमेव, न हि कल्पितार्थप्रद एवं समाराधितश्च कदाचित् कल्पितार्थदानदरिद्रः संभाव्यते, ननु कथं तर्हि एतदेवं सम्पन्नमित्याह–इत्युक्तेन न्यायेन 'अचिन्त्योऽचिन्तनीयप्रवृत्तिप्रकारोऽयं विधिः दैवं पुराकृतकर्मलक्षणमिति विषादवचनं ग्रन्थकर्त्तुः, अप्रस्तुतप्रशंसा चेयं कल्पतरुवक्तव्यतारूपा, तेनायमर्थः–अस्माभिस्तावद् जन्मान्तरीयात्युत्कटसुकृतपटलवशासादितसकलगुणसद्गुरुसंपर्कादिना प्राप्तः प्रभूतभव्यसंभाव्यमानानुग्रहदक्षः सद्वचनपाटवकल्पवृक्षः, स चानुध्यातो निरन्तरं भव्यजनप्रतिबोधकाम्यया सेवितश्च अनेकधा सदुपदेशव्यापारणेन अञ्जलिविधानस्थानीयं चेह कोमलामन्त्रणादिकं द्रष्टव्यम्, एवमतिप्रयत्नेन सेवितोऽपि स्ववचनपाटवकल्पवृक्षः श्राद्धानामुत्तरोत्तरगुणप्रकर्षेण सर्वविरतिप्रतिपत्तिं यावद् यदा न फलितः तदा नूनम् अस्माकमेवायं विधिः प्रतिकूल इति, परं युष्माभिर्विशेषतो धर्मकर्मसु समुद्यमो विधेय एव, यतो विधेरचिन्तनीयत्वेनेदं सूच्यते–यथा क्वचित् तस्य प्रतिकूलप्रवृत्तिः तथा क्वचिदनुकूलत्वेनापि, इत्युपदेश इति शार्दूलविक्रीडितवृत्तार्थः ॥ ११ ॥

इति श्रीयुगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ दशमकुलकविवरणं समाप्तमिति ॥१०॥

---

## अथ एकादशं कुलकम् ।

दशमे हि आन्तरवैरिकामादिदमनोपदेशोऽभिहित इहापि एकादशे प्रायः क्रोधाद्यन्तरङ्गवैरिपरिहार एवोपदिश्यते, इत्येवं सम्बद्धस्य अस्यादौ त्रसादिलाभक्रमेण मनुजत्वादिसामग्रीलाभे सति धर्मोपदेशं वृत्तद्वयेनाह—

इह हि खलु दुरंते चाउरंते भवम्मि, परिभमणमणंताणंतकालं करित्ता ।
कह कहवि तसत्तं तत्थवी माणुसत्तं, बहुसुकयवसेणं पाणिणो पाउणंति ॥ १ ॥
तमवि सुकुलजाईरूपनीरोयदीहा—उयमइगुणवंतं सव्वहा पत्तपुव्वं ।
चिरसुचरियभावा भाविभद्दाणमंते, हवइ तदिह लद्धे सव्वहा उज्जमेह ॥ २ ॥

व्याख्या—'इह' हि अस्मिन्नेवोपलभ्यमानस्वरूपे भवे संसारे, कीदृशे? 'दुरन्ते' निरन्तरमनन्तदुःखव्याप्तत्वाद् दुष्टावसाने, पुनः कीदृशे? 'चत्वारः' चतुःसंख्या 'अन्ताः' पर्य्यन्ता नरकादिभवलक्षणाः परिभ्रमणेन व्याप्या यत्र स चतुरन्तः, अथवा चतुर्भिर्दानशीलतपोभावनारूपैः प्रकारैः अन्तो विनाशो यस्य स चतुरन्तः, चतुरन्त एव चातुरन्तो, दीर्घत्वं प्राकृतत्वात्, ॥ ९६ ॥
'खलु' निश्चयेन 'परिभ्रमणं' पर्य्यटनं कृत्वा विधाय, कियन्तं कालमित्याह—'अनन्तानन्तकालं' पूर्वोपदर्शितासांव्यवहारि-

कजीवावस्थानप्रस्तावप्रतिपादितस्वरूपं, ततः किमित्याह–'कथं कथमपि' महाकृच्छ्रेण 'त्रसत्वं' द्वीन्द्रियादित्वं प्राप्नुवन्तीति योगः। अनुस्वारलोपः प्राकृतत्वात्, तत्रापि त्रसत्वेऽपि पञ्चेन्द्रियरूपेऽपि 'मानुषत्वं' मनुजजन्म, 'बहुसुकृतवशेन' प्रभूतपुण्योदयेन, 'प्राणिनः' सत्त्वाः 'प्राप्नुवन्ति' लभन्ते॥ १ ॥ 'तदपि' मानुषत्वं भाविभद्राणां भविष्यत्कल्याणानामेव 'अन्ते' पूर्वोक्तत्रसादिलाभपर्य्यन्ते 'भवति' संपद्यते, कीदृशमित्याह–सुकुलजाती च रूपं च भावप्रधानत्वाद् निर्देशस्य नीरोगता च दीर्घायुश्च मतिश्च सद्धर्मविधानबुद्धिश्च, ता एव गुणा असाधारणधर्मरूपाः ते विद्यन्ते यत्र तत्, पुनः कीदृशं? 'सर्वथा' सर्वैः प्रकारैरप्राप्तपूर्वं न कदाचिदेवंविधगुणवन्मनुजत्वं पूर्वमलाभि, अयमभिप्रायो–मनुजत्वमेव तावच्चोल्लकादिदृष्टान्तैः–दुरापं, सुकुलादिसहितं तु न कदाचिदपि इत्यतः सर्वथाऽप्राप्तपूर्वमित्युक्तं, यद्येवम् इदानीं कुतः प्राप्तमित्याह–'चिरसुचरितभावाद्' बहुकालाचीर्णसदनुष्ठानसद्भावात्, नहि स्तोकसुचरितादेवंविधसामग्रीलाभो, यत एतदेवं तत् तस्मात् इह जगति 'लब्धे' प्राप्ते, मनुजत्वे सुकुलादियुक्ते अत्यन्तदुःप्रापे सर्वथा सर्वैः प्रकारैः, पाठान्तरे तु 'सर्वदा' वा सुपात्रदानतपोभावनादिभि–रुद्यच्छत धर्मे सोद्यमा भवत भोः श्राद्धाः?, न हि एतदुद्यममन्तरेण अपर एतस्याः सामग्र्याः फलविशेष इति वृत्तद्वयार्थः ॥ २ ॥

धर्मोद्यमश्च परिहरणीयपरिहारेण विशिष्टो भवतीति परिहरणीयविशेषप्रमादादिपरिहारमेवाह—

**परिहरह पमायं दिन्नदीहावसायं, मुयह कुगइमूलं धम्मसंदेहजालं।**

द्वादश-कुलकम् । ॥ ९७ ॥

एकादशं कुलकम् । ११

चयह कुगुरुसंगं सवकल्लाणभंगं, सुणह जिणवरुत्तं सुद्धसिद्धंततत्तं ॥ ३ ॥

व्याख्या-'परिहरत 'परित्यजत, 'प्रमादं' विषयकषायाद्यासक्तिरूपं, कीदृशं ? 'दत्तदीर्घावसायम्', अतिकटुकविपाकतया जन्मान्तरे वितीर्णप्रभूतस्थितिकचित्तसंतापं, तथा 'मुञ्चत' परिहरत, किमित्याह-'धर्मे' सुकृतार्जनानुष्ठाने 'संदेहाः' किमय-मकलङ्काहिंसादिरूपो धर्म उत यागादिविधानसाध्य इत्यादयः संशयाः, तेषां 'जालं' वृन्दं, कीदृशं ? 'कुगतयो' नरकति-र्यक्कुमनुष्यत्वादयः तासां मूलमादिकारणं, संदेहेभ्यो मिथ्यात्वं ततः कुगतय इति भावः, तथा 'त्यजत' परिहरत 'कुगुरु-सङ्गं' क्रियाज्ञानविकलकुत्सिताचार्य्यादिसंपर्कं, कीदृशं ? 'सर्वकल्याणानां' समस्तैहिकामुष्मिकलक्ष्मीपुत्रादिस्वर्गादिमङ्गलानां 'भङ्गं' ध्वंसं, निरुपहतभङ्गहेतुत्वात्, हेयमभिधाय उपादेयमाह-'शृणुत' आकर्णयत 'जिनवरोक्तं' तीर्थकृदुपदिष्टं, 'शुद्ध-सिद्धान्ततत्त्वं' त्रिकोटीदोषवर्जितागमरहस्यं, तदाकर्णनस्यैव उत्तरोत्तरशुभनिबन्धनत्वादिति वृत्तार्थः ॥ ३ ॥

अथ कषायचतुष्टयपरिहारादिकमाह-

मुयह निहयसोहं सवहा कोहलोहं, निहणह मयमायं दिन्नसंसारपायं ।
सरह सरहसं भो ! सवसत्तेसु मित्तिं, कुणह जिणगुरूणं पायपूयापसत्तिं ॥ ४ ॥ ॥ ९७ ॥

व्याख्या-'मुञ्चत' त्यजत 'सर्वथा' करणकारणादिभिः सर्वैः प्रकारैः, क्रोधश्च लोभश्चेति समाहारद्वन्द्वस्तत्, कीदृशं ? 'निहतशोभं' विध्वस्तशिष्टताच्छायं, तथा 'निहत' निष्कपत 'मदमायम्' अहंकारपरवञ्चने, कीदृशं ? 'दत्तसंसारपातं' विती-

र्णभवार्ण्णवमज्जनं। हेयमभिधाय उपादेयमाह–'सरत' अनुगच्छत भोः श्राद्धाः ? 'सरभसं' सोत्कण्ठं, हंभो इति तु पाठे, सरत सरतेति द्विरुच्चारणमत्यादरख्यापनार्थं, हंभो! इति तु संबोधने, किमित्याह–'सर्वसत्त्वेषु' समस्तप्राणिषु 'मैत्रीं' सौहार्दं, न क्वापि वैरानुबन्धमित्यर्थः, तथा 'कुरुत' विधत्त किमित्याह–'पादपूजाप्रसक्तिं' चरणाराधनानुबन्धं, केषामित्याह 'जिनगुरूणां' तीर्थकृदाचार्याणां, तत्पूजाया एव सकलकल्याणनिबन्धनत्वादिति वृत्तार्थः ॥ ४ ॥

मैत्रीमभिधाय गुणवत्प्रमोदकरुणे प्राह—

पयडह बहुदुक्खत्तेसु सत्तेसु दूरं, परमकरुणभावं दव्वओ भावओ य।
भयह गुणिसु रागं सवकल्लाणवल्ली–पसरसरसनीरासारमच्चंतसारं ॥ ५ ॥

व्याख्या–'प्रकटयत' विधानेन प्रकाशयत 'बहुदुःखार्त्तेषु' प्रभूतबाधापीडितेषु प्राणिष्विति गम्यते, 'दूरम्' अतिशयेन, किमित्याह–'परमकरुणभावं' प्रकृष्टदयासद्भावं, कथमित्याह–'द्रव्यतो' बाह्यवृत्त्या, यथा क्वचित् प्राणिनि प्राणधनाद्यपहारे विधीयमाने सर्वथा तद्भयनिवारणं, 'भावतश्च' अन्तर्वृत्त्या, यथा कथमेते प्राणिनः सर्वथा दुःखाद् मया मोचनीया इत्यध्यवसायः तथा चोच्यते,–"सम्मद्दिट्ठी जीवो अणुकंपपरो सया वि जीवाणं। भाविदुहविप्पओगं ताण गणिंतो विचिंतेइत्ति" ॥ १ ॥ तदेवमुभयथाऽपि करुणां कुरुतेति, तथा 'भजत' आश्रयत किमित्याह–'गुणिषु' ज्ञानादिमत्सु आचार्यादिषु 'रागं'

१ मूलगाथायां 'सत्तेसु–सत्त्वेषु इति सत्यपि "प्राणिष्विति गम्यते" इति टीकापाठश्चिन्त्यः ।

गुणप्रतिबन्धम्, अनुमोदनमित्यर्थः, कीदृशं? सर्वकल्याणान्येव वर्द्धनसाधर्म्याद् वल्ली तस्याः समस्तैहिकादिश्रेयोलतायाः 'प्रसरः' प्रवर्धनं तत्र 'सरसनीरासारम्' अत्यन्तमधुरजलवेगवद्वर्षं, पुनः कीदृशम्? 'अत्यन्तम्' अतिशयेन शेषगुणापेक्षया 'सारं' प्रधानं, नहि यथा एकगुणवदनुरागेणापि समस्तगुणवद्गतगुणानुरागः कृतो भवति, तथान्येन केनापि विनयादिना इत्येवमत्यन्तसारत्वमस्येति वृत्तार्थः ॥ ५ ॥

अथ निर्गुणजनोपेक्षामभिधित्सुः तत्संसर्गजन्यानर्थसार्थस्य गर्हणीयतामाह—

गरिहह कयणेगाणत्थसत्थं समत्था—सुहसयजणचारी रायमग्गं व दुग्गं।
जणियविसयगिद्धिं पावमेत्तेहि सद्धिं, जइ महह महंतिं सव्वसंपत्तिसिद्धिं ॥ ६ ॥

व्याख्या—भोः श्राद्धाः? 'गर्हत' गुरुसमक्षमालोचनादानादिना निन्दत, कमित्याह—'अनेके' प्रभूता 'अनर्थाः' चौर्यपारदारिकत्वद्रोहद्यूतादयोऽसदाचाराः, ततः कृताश्च तेऽनर्थाश्च (तेऽनेकानर्थाश्च) तेषां 'सार्थः' समूहस्तं, कीदृशं? दुःखेन गम्यते शिष्टैरिति दुर्गं, पुनः कीदृशं? 'विषया' इन्द्रियार्थां धनरमणीप्रभृतयस्तेषु 'गृद्धिः'—गार्द्ध्यं लाम्पट्यं, ततो जनितोत्पादिता विषयगृद्धिर्येन स तथा तम्, एतैर्हि प्रायो विषयासक्ति—र्जन्यते एव, अत्रोपमानमाह—'राजमार्गमिव' नगरान्तवर्तिमहापथमिव, क्व विषय इत्याह—'समस्तानि' संपूर्णानि यानि 'अशुभानि' अकल्याणानि, असुखानि वा अश्रातानि तेषां 'शतानि' प्रभूतानि [तानीत्यर्थः] ॥ ९८ ॥

तान्येव सततात्ममहाराजाश्रितत्वाद् 'जना' लोकाः तेषां 'चारी' संचारः तत्र, लुप्तसप्तम्येकवचनं चेदं पदं द्रष्टव्यं, यथा राजपथे सर्वेऽपि जनाः संचरन्ति, तथात्रानर्थसार्थे सर्वाणि अशुभानि असुखानि च संचरन्तीत्यर्थः। किं केवलमेवानर्थसार्थं? नेत्याह— सार्द्धं समं कैः 'पापमित्रैः' पापोपदेशकदुराचारैः, तानपि गर्हतेत्यर्थः, अयमभिप्रायो—नानर्थोपदेशकानामगर्हणीयत्वेऽनर्थसार्थस्य गर्हणीयतेति भावः। पापमित्राणां गर्हणीयत्वोपदर्शनेनोपेक्षा पापकारिष्विति समर्थितं भवति, तदेतदनर्थगर्हणादिकं कुरुत, यदि किमित्याह—यदि चेद् भोः श्राद्धा! महताऽऽकांक्षत, "प्राकृते हि कांक्षतेर्महादेशः", कीदृशीं? 'महतीं' बृहत्तरां 'सर्वसंपत्तीनां' समस्तैहिकामुष्मिकसमृद्धीनां 'सिद्धिं' निर्वृत्तिं यदि वांछत तदाऽनर्थसार्थादिगर्हणां कुरुतेति वृत्तार्थः॥ ६॥

अथ संक्षिप्य कर्त्तव्यसर्वस्वं वृत्तद्वयेनोपदिशन्नाह—

किमिह सुवहुवायावित्थरेणं भवाउ, जइ कहमवि चित्तं तुम्ह दूरे विरत्तं।
जइ य कुमुयकंतिं वित्थरत्तिं च किर्त्तिं, अभिलसह बुहाणच्छेरयं संजणित्तिं॥ ७॥
ता दूरं मुक्कसंका विरइकयमणा चत्तमिरथत्तदोसा,
साहूणं पायसेवा जिणमयसवणच्चिंतणखि(क्खि)त्तचित्ता।

१ समस्ताशुभरूपजनानां चारी यत्र तम् इति अनर्थसार्थस्य राजमार्गस्य च विशेषणं युक्तियुक्तं प्रतिभाति, सप्तम्यन्तपाठस्तु चिन्त्यः।

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

द्वादश-कुलकम्। ॥ ९९ ॥

एकादशं कुलकम्। ११

कालं वोलेह निच्चं पुणरवि दुलहा धम्मसामग्गि एसा,
भुज्जो पाविज्ज जीवा कहमवि न इमं नजए जेण सम्मं ॥ ८ ॥

व्याख्या–'इह' उपदेशप्रस्तावे सुष्टु अतिशयेन 'बहुः' प्रभूतो 'वाग्विस्तारो' वचनाडम्बरः तेन कृतेन किं प्रयोजनं? न किंचिदित्यर्थः। केवलं 'भवात्' संसारात् यदि चेत् 'कथमपि' कृच्छ्रेण कर्मलाघववशात्, 'चित्तं' मनो 'युष्माकं' भवतां, 'दूरम्' अतिशयेन तत्त्वतो 'विरक्तं' धिगनन्तदुःखनिधान-मेतं संसारं, कथमेतद्विच्छेदो भविष्यतीति तत्परित्यागाभिमुखं संपन्नमित्येकं कारणं वक्ष्यमाणधर्मानुष्ठानपरायणकालव्यतिक्रमणे। तथा 'यदि च' इति चकारः कारणान्तरसमुच्चयार्थः, कीर्तिमभिलषतेति सम्बन्धः, कीदृशीं? 'कुमुदकान्तिम्' अतिनिर्मलत्वेन कैरवच्छायां 'विस्तरन्तीं' जगति प्रथमानां वाऽअभिलषत वाञ्छत यद्यपि धार्मिकाणां धर्मे प्रवर्त्तमानानां कीर्त्यभिलाषो नास्ति, तथापि तेषां तस्या अवश्यंभावित्वा-दभिलाषोपचारः, पुनः कीदृशीं 'बुधानां' विचक्षणानाम् 'आश्चर्यं' चमत्कारं जनयंतीमुत्पादयन्तीं, भवति हि अवदातकर्मणः सकाशादद्भुता ख्यातिरिति, यद्येतद् द्वितीयमभिलषत, ॥७॥ 'ता' इति तदा एवं कालं व्यतिक्रमयतेति योगः, कीदृशाः सन्तो? 'दूरम्' अतिशयेनोन्मुक्ता प्राबल्येन त्यक्ता 'शंका' संशयो भिन्नधर्मजनकादिभयं वा यैः ते तथा, नहि सशंकं क्रियमाणमनुष्ठानं विवक्षितफलदायि भवति, तथा 'विरतौ' सर्वसावद्ययोगनिवृत्तौ 'कृतं' न्यस्तं मनश्चित्तं यैः ते तथा, एवंविधा एव सुश्रावका भवन्ति, तथा चोच्यते–''कइया होही सो वासरो त्ति गीयत्थगुरुसमीवम्मि। सव्वविरइं पव्वज्जिय विहरिस्सामी अहं जम्मि ॥१॥'' तथा 'त्यक्तः' करणकारणानुमतिभिः ॥ ९९ ॥

परिहृतो 'मिथ्यात्वदोषो' विपर्य्ययः तद्बोध (विपर्य्यस्तबोध) कृतश्राद्धादिक्रियाविधानलक्षणं दूषणं यैस्ते तथा, नहि मिथ्यात्वलेशेनापि स्पृष्टमनुष्ठानं सफलं भवतीति विशेषणत्रयोपादानम् , एवंविधाश्च सन्त एवं कालं व्यतिक्रमयतेति सम्बन्धः, कीदृशाश्च सन्तः ? इत्याह–'साधूनां' सुविहितानां 'पादसेवा' निरन्तरं तच्चरणपर्य्युपासनम् ,एतस्या एव समस्तोत्तरक्रियाकलापनिबन्धनत्वात् , पदान्तरापेक्षत्वेऽपि क्वचित् समासः, इति साधूनामिति भिन्नपदत्वेऽपि न दोषः, तथा 'जिनमतस्य' तीर्थकरागमस्य 'श्रवणम्' आकर्ण्णनं, 'चिन्तनं' श्रुतस्य सतोऽधिगतौ पुनः पुनरनुप्रेक्षणं, पादसेवा च जिनमतश्रवणानुचिन्तनं चेति समासः, चकारद्विर्भावः प्राकृतत्वात् , तेषु 'आक्षिप्तम्' आसक्तं चित्तं येषां ते तथा, क्वचित् श्रवणे चिन्तने चेति व्यस्तपद एव पाठः, अत्र पादसेवेति पदं लुप्तसप्तम्येकवचनं द्रष्टव्यम् , इह च जिनमतश्रवणानुचिन्तनाभ्यां तत्पूर्विका सम्यक्क्रियापि उपलक्ष(क्ष्य)ते, ततः सादरं संपूर्ण्णसुश्रावकानुष्ठानानुष्ठातारः सन्तः, स्वकीयं 'कालं' जीवनसमयमेवं व्यतिक्रमयत अतिवाहयत, 'नित्यं' सर्वदा नतु कदाचिदेव, एवं हि भवतां सामग्रीलाभसाफल्यं स्यादिति भावः, किमित्येवमादरनैरन्तर्याभ्यामनुष्ठाने प्रवर्त्त्यत इत्याह–'पुनरपि' एतज्जन्मानन्तरं भूयोऽपि 'दुर्लभा' दुःप्रापा 'धर्मसामग्री' विशुद्धपरिपूर्णसदनुष्ठानकारणसामग्र्यभावः एवेति, मानुष्यादिधर्मश्रवणश्रद्धानपर्य्यन्ता, अयमभिप्रायो–यदि हि संप्रति एषा लब्धा सदनुष्ठानेन सफलीक्रियते, तदा न भूयोऽपि अस्या लाभः संभाव्यते, तथा चोक्तमुपदेशमालायाम्–"लद्धिल्लियं च बोहिं अकरेंतो अणागयं च पत्थेंतो। अन्निंदाइं बोहिं लब्भिसि कयरेण मुल्लेणं॥१॥" अन्यत्रापि उक्तम्–"धर्मसाधनविधेः समग्रता हारिता क्व नु पुनर्मिलिष्यति। किं मिलन्ति पुरुषप्रयत्नतः सूक्ष्मरेणुकणिका रथोद्धताः ॥२॥" इति ननु यथा एकदा प्राप्ता तथा काकतालीयन्यायेनापि कदाचित् प्राप्स्यत इत्याह–'भूयः' पुनरपि भ्रंशनान-

न्तरं 'प्राप्नुयुः'-लभेरन्, 'जीवाः' प्राणिनः 'कथमपि' केनापि प्रकारेण काकतालीयादिनापि, नेदं सामग्रीलाभरूपं वस्तु लभ्यत इत्यवबुध्यते, येन कारणेन सम्यग् यथावस्थिततत्वेन, काकाक्षिगोलकन्यायेन कथमपीति पदमिहापि संबध्यते, कथमपि अतीन्द्रियद्रष्टृत्वाभावेन नेदं निश्चीयते, यदुत अवश्यं लभ्यत एव, तस्माल्लब्ध्वा सामग्री सफलतां प्रापणीयेत्युपदेशसर्वस्वमिति, अत्र च कुलके सप्तसु वृत्तेषु मालिनीच्छन्दो अष्टमे च स्रग्धरेति वृत्तार्थः ॥ ८ ॥

इति श्रीयुगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादशकुलकवृत्तौ एकादशकुलकविवरणं समाप्तमिति ॥ ११ ॥

---

## अथ द्वादशं कुलकम्।

एकादशे हि कुलके उपदेशसर्वस्व-मभ्यधायि, द्वादशं तु पर्य्यन्तोपदेशकुलकं, तत्र पर्य्यन्तोपदेश इति कः शब्दार्थः? उच्यते -सर्वेषां लेख्योपदेशानां पर्य्यन्ते वर्त्तमानत्वात् पर्य्यन्तोपदेशो नैतस्मादुपदेशा-दन्यो लेख्योपदेशो दत्त इति, अथवा एकादशसु कुलकेषु गुरुशुश्रूषादेवपूजाद्युपदेशाः प्रतिपादिताः तेऽपि सांप्रतिकप्रभूतसाध्वाभासोपदेशप्रवृत्त्यादिदर्शनेन श्राद्धानां सम्यग् न निर्वहन्तीति तत्स्वरूपपरिज्ञानं तद्वर्जनं च सर्वत्र तात्पर्य्यमुपदेशानां पर्य्यन्तस्तेषां तेन निर्वाहादिति वा पर्य्यन्तोपदेशः, तत्प्रतिपादकं कुलकमपि पर्य्यन्तोपदेशकुलकमिति, अत्रापि प्रथमं तावत्सामान्योक्त्या तेषामेव स्वरूपं गाथाद्वयेनाह—

कालस्स अइकिलिट्ठत्तणेण अइसेसपुरिसविरहेण। पायमणुग्गत्तणेणं गुरुकम्मत्तेण य जीयाणं ॥ १ ॥

॥२००॥

किर मुणियजिणमया वि हु अंगीकयसरिसधम्ममग्गा वि।पायमइसंकिलिट्ठा धम्मत्थी वित्थ दीसंति २

व्याख्या–धर्मार्थिनोऽपि एवं प्रायोऽत्र दृश्यन्ते इति सम्बन्धः, केन हेतुना? इत्यत्र हेतुचतुष्टयमाह–'कालस्य' दुःषमासमयलक्षणस्य 'अतिक्लिष्टत्वेन' अत्यन्तक्लेशोत्पत्तिनिमित्तत्वेन, अन्यथा हि कालस्याजीवत्वेन क्लेशस्य मानसिकदोषविशेषत्वेन तत्रासंभवात् क्लिष्टत्वानुपपत्तेः, ततो व्रीहीन् वर्षति पर्जन्य इतिवत् निमित्तत्वेन क्लिष्टत्वोपचारः, तथा च क्लिष्टकालसम्बन्धात् सुगन्धिकुसुमसंपर्कात् तिलसौगन्ध्यवत् धार्मिकजनानामपि क्लिष्टत्वं, तथा 'अतिशेषा' अतिशया अवधिमनःपर्य्यायकेवलज्ञानलक्षणाः तद्योगात् पुरुषा अपि अतिशेषाः, ततश्चातिशेषाश्च ते पुरुषाश्चावधिज्ञानिप्रभृतयः तेषां विरहोऽभावः तेन, यदि हि क्वापि अतिशयिनः स्युः तदा धार्मिकान् संबोध्य तेषां क्लिष्टत्वमपसारयेरन्नपि, तथाऽयोग्यत्वात् तथाविधभव्यत्वपरिपाकाभावेन क्लिष्टसाध्यधर्मानुचितत्वा–जीवानामिति सम्बन्धः, तत् किं सर्वेषामपि? नेत्याह–'प्रायो' बाहुल्येन, यतः सांप्रतमपि केचिदक्लिष्टचित्ता दृश्यन्ते एव, तथा 'गुरूणि' बहुकालवेद्यस्थितिकानि 'कर्माणि' ज्ञानावरणादीनि येषां ते तथा, तेषां भावस्तत्त्वं तेन, चः समुच्चये, नहि लघुकर्मणामेवमत्यन्तक्लिष्टत्वसंभवः, जीवानां सामान्येन प्रायः समस्तप्राणिनामिति ॥ १ ॥
एतस्माच्च हेतुचतुष्टयात् कीदृशाः सन्तः ते क्लिष्टा भवन्ति? इत्याह–किरेत्यादि, 'किलेति' अलीके 'ज्ञातजिनमता' अपि विदिततीर्थकृच्छासना अपि, अपिर्विस्मये, नहि सम्यग्विदितसिद्धान्ततत्त्वाना–मेवं क्लेशसंभव इति, किलेति अलीक इत्युक्तं, 'हुः' पादपूरणे, तथा 'अङ्गीकृतः' अभ्युपगतोऽसदृशः शेषशाक्यादिमार्गेभ्योऽतिशुद्धतया विलक्षणो 'धर्ममार्गः' सुविहित-

यतित्वलक्षणो यैस्ते तथा, अपिरत्रापि विस्मये एव, नहि एवंविधानामत्यन्तसंक्लेशः संभाव्यत इति, क एवंविधाः? इत्याह–
'धर्मार्थिनोऽपि' गृहवासपरित्यागेन साधुधर्मानुपालनाकांक्षिणोऽपि, आस्तां तदितरे, परमीदृशा अप्यतिशयेन वाढं 'संक्लिष्टाः'
परगुणव्याघाताद्यनुचिन्तका, अत्र जगति प्रवचने वा दृश्यन्तेऽवलोक्यन्ते, प्रायो वाहुल्येन न तु सर्वेऽपि, तथा सति दुःप्र-
सभान्तचरणवचनव्याघातापत्तेः इति गाथाद्वयार्थः ॥ २ ॥

अथातिसंक्लिष्टानां चेष्टितमाह—

ते किंचि कहिंचि कसायविसलवं धरिय नियमणे गूढं। दरिसंति तव्वियारे अप्परिणयसमयअमयरसा ३

व्याख्या–'ते' पूर्वोपदर्शिता अतिसंक्लिष्टचित्ताः साधवः, कषायविषलवविकारान् (लवं) दर्शयन्तीति सम्बन्धः, किं कृत्वा?
धृत्वाऽवस्थाप्य, किमित्याह–'कषायाः' क्रोधादयः त एव मारणनिबन्धनत्वाद् 'विषं' गरलं, तस्य 'लवं' लेशं, केत्याह–'नि-
जमनसि' आत्मीयचित्ते, कथं धृत्वा? 'गूढं' मुग्धजनालक्ष्यत्वाद् गुप्तं, किंरूपं तदित्याह, 'किंचिदिति' नपुंसकत्वं प्राकृत-
त्वात्, तेन कमपि क्रोधादिष्वन्यतमं, तथा कथमपि केनापि प्रकारेण, क्वचित् सुविहितानामपि पूजादर्शनख्यातिश्रवणा-
दिनेत्यर्थः। चित्तधृतकषायविषाः किं कुर्वन्तीत्याह–'दर्शयन्ति' बहिरपि प्रकाशयन्ति, किमि(कानि)त्याह–(तस्य)कषायविष-
लवस्य 'विकाराः' तदुत्थदुष्टवचनपरिभवकलहादयः तान्, कीदृशाः सन्तः? इत्याह–'समयः' कषायकटुविपाकदर्शकः सिद्धा-
न्तः, स एवाजरामरत्वहेतुत्वात् अमृतरसः पीयूषनिर्यासस्ततोऽपरिणतोऽङ्गाङ्गिभावेनाजीर्णः समयामृतरसो येषां ते तथा,

द्विर्भावः प्राकृतत्वात्, अयमभिप्रायो-यथा केचिद् भक्षितालक्ष्यविषा असंपन्नतत्प्रतिकारहेत्वमृतास्वादनाः तद्विकारान् मूर्च्छादीन् बहिरुपदर्शयन्ति, तथा एतेऽपीति गाथार्थः ॥ ३ ॥

कषायचतुष्टयस्यापि प्रत्येकं विकारानुपदिदर्शयिषुः प्रथमं तावन्मानविकारं गाथाद्वयेनाह-

केइ अपुट्ठा पुट्ठा पुरओ तव्विहजणस्स पयडंति । अन्नपसंगेणं चिय परपरिभवमत्तउक्करिसं ॥ ४ ॥
गुरुमवि गुणमगणंता परस्स दोसं लहुं ति पयडंता । अन्नोन्नममत्तं(न्नं)ता जणयंति बहूणं मयि(इ)मोहं ५

व्याख्या-'केचित्' तावत् संक्लिष्टचित्ताः परेण श्राद्धादिना, 'पृष्टाः' 'कीदृशाः साधवो विशेषेणाराध्या भवन्तीति' प्रश्निताः 'अपृष्टा वा' एवमप्रश्निताः, वाशब्दो विकल्पार्थोऽत्र लुप्तो द्रष्टव्यः, परपरिभव-मात्मोत्कर्षं च प्रकटयन्तीति योगः, क कस्य च? इत्याह-पुरतोऽग्रतस्तद्विधजनस्येति तस्यैव भगवद्दर्शनमात्रं प्रमाणमित्येवंरूपा मुग्धोचिता विधा प्रकारो यस्य स तद्विधः, स चासौ जनश्च श्राद्धादिलोकश्च तद्विधजनः तस्याग्रे, 'प्रकटयन्ति' प्रकाशयन्ति, किं किमित्याह-परेषां सुविहितसाधूनां 'परिभवं' तिरस्कारं किमेभिरित्येवंरूपं लाघवमित्यर्थः । तथा 'आत्मनः' स्वस्योत्कर्षं वयमेवाराध्या इत्येवंरूपं गौरवमित्यर्थः । अत्र विसन्धिः प्राकृतत्वात्, किं सक्षादेव नेत्याह-अन्यस्य कस्यापि अपरस्य श्रावकादेः प्रसङ्गेनैव प्रसङ्गागततद्वर्णनव्याजेनैव, न तु साक्षात्, अयमभिप्रायः-क्वचित् कश्चित् कंचन श्रावकं प्रशंसन्नेवमाह-धन्योऽसौ देवदत्तश्रावको यस्यानवरतं साधुप्रशंसापरायणस्य दिनान्यतिक्रामन्ति, तथाहि-"ये साधवः प्रतिदिनं प्रचरन्ति चारुचारित्र-

द्वादश-
कुलकम् ।

॥१०२॥

केलिसदने क्षितिपा इवोच्चैः । धन्या जयन्ति जगति प्रथितप्रभावा-स्ते दर्शनेन्दुहतपापतमःप्रचाराः ॥ १ ॥ ये तु व्रतं सुकृतकन्दपयोदकालं तन्वन्त एव जिनभूरितरानुरागात् । कुर्वन्ति जैनसदनस्य समस्तचिन्तां ते सर्वतोऽपि भुवि धन्यतमाः पवित्राः ॥ २ ॥ अत्र हि श्रावकप्रशंसाव्याजेनात्मनो गौरवं सुविहितानां चार्थतो लाघवं प्रकाशितं कैश्चिच्चैत्यवासिभिरिति, ॥४॥ तथा जनयन्ति बहूनां मतिमोहमिति सम्बन्धः, 'गुरुमपि' पञ्चविंशतिभावनोपेतविशुद्धाखण्डचारित्रानुपालनलक्षणं महान्तमपि, 'परस्य' सुसाधुवर्गस्य सम्बन्धिनं (गुणं) धर्मविशेषमगणयन्तोऽस्तित्वेनाननुमन्यमानाः, एतदपि परगुणाननुमननमहंकारनिमित्तमेव, न हि आत्मगुणबहुमान-मन्तरेण परगुणावमननमिति भावः, तथा 'दोषं' दूषणं 'लघुम्' अल्पमपि कदाचिन्मुखचरणप्रक्षालनमप्राप्तेऽपि प्रावृट्काले कदाचिद् वस्त्रधावनप्रभृतिकं 'प्रकटयन्तो' जने बृहच्छब्देन प्रकाशयन्तः, तथा 'अन्योन्यं' परस्परममन्यमाना ये पूर्वोक्ता आत्मबहुमानिनो मध्यस्थात्ममानिनश्च ते शिथिलाचारान् न मन्यन्ते, शिथिलाचाराः तु महामत्सरेण तान् न मन्यन्ते इत्येवं परस्परमननुमननेन 'बहूनां' श्रद्धालुश्राद्धानां प्रभूतानां 'जनयन्ति' उत्पादयन्ति 'मतिमोहं' बुद्धिविपर्यासं, किमेते आराध्या अन्ये वा न वा केचन इत्येवं सुसाधुष्वनाश्वासमिति मानविकारोपदर्शन-मिति गाथाद्वयार्थः ॥ ५ ॥

अथ मायाविपक्वतविकारमाह—

अवरे नियडिपहाणा पयडिय वेसासियं खणं रूवं । सुहलुद्ध मुद्धजणवंचणेण कप्पंति नियवित्तिं ॥ ६ ॥

द्वादशं
कुलकम् ।
१२

॥१०२॥

मार्गदर्शक

204

व्याख्या–'अपरे' अन्ये केचित् साध्वाभासाः, 'निकृतिप्रधानाः' परवञ्चनारूपमायापरायणाः स्व(निज)वृत्तिं कल्प(ल्पय)न्तीति योगः,केन? मुग्धजनवञ्चनेन मूर्खप्रायश्रद्धालुलोकप्रतारणेन, किं कृत्वा? 'प्रकटय्य' बहिः प्रकाश्य, किं? रूपं स्वरूपं नेपथ्यलक्षणं, कीदृशं? विश्वासः परविश्रम्भणं स एव प्रयोजनमस्येति ''क्रीतादित्वात्'' इकणि वैश्वासिकमिति, 'क्षणं' क्षणमात्रं स्तोककालमित्यर्थः। कीदृशाः सन्तः? 'सुखलुब्धा' इति लुप्तप्रथमाबहुवचनमिदं पदं, स्वशरीरसौख्यापादनमात्रलम्पटाः, सर्वथापि न धर्मस्पृहयालवः, किं कुर्वन्तीत्याह–'निजवृत्तिं' स्वकीयवर्त्तनं स्वजीवनोपायं 'कल्पयन्ति' विरचयन्ति कुर्वन्तीत्यर्थः। अयमभिप्रायो–गृहस्थेषु पश्यत्सु मुखे मुखवस्त्रिकादानपूर्वक एवालापो बहिर्भूम्यादिगमने पदं पदमीर्यापथशोधनं परमादरेण, येन श्रद्धालूनां तेषु साधुत्वविश्वासः संपद्यते, ततस्तेभ्यो यथेच्छं वृत्तिलाभ इति मायारूपकषायविषविकारोऽयं, यतो गृहस्थदृष्टिवञ्चने पुनरुच्छृंखलतयैव प्रवृत्तेरिति गाथार्थः॥ ६ ॥

अथ क्रोधविषविकारमाह—

अवगणियनिजकज्जा, लज्जामज्जायवज्जिया अन्ने। कलहिंति मिहो बहुविह–बाहिरवत्थूण वि कएण ७

व्याख्या–अन्ये कलहायन्त इति योगः, कीदृशाः सन्तो! 'अवगणितम्' अवधीरितं 'निजम्' आत्मीयं 'कार्यं' क्षान्त्यादिदशविधधर्मप्रतिपालनरूपं प्रयोजनं यैस्ते तथा, तथा 'लज्जा' कलहायमानानां लोकेभ्यस्त्रपा, 'मर्य्यादा' आगमगुर्वाद्युपदर्शितकार्यव्यवस्था, ततो लज्जामर्य्यादाभ्यां 'वर्जिताः' परित्यक्ताः, निर्लज्जा निर्मर्य्यादा इत्यर्थः, 'अन्ये' अपरे साध्वाभासाः,

ज्ञा०कु०१८

किं कुर्वन्तीत्याह–'कलहायन्ते' निरन्तरं लोकसमक्षं वाग्युद्धमारभन्ते, 'मिथः' परस्परं साध्वन्तरैरेव सहेत्यर्थः, किमर्थमित्याह–( बहुविधानां अनेकप्रकाराणां ) बाह्यवस्तूनां पुस्तकवस्त्रश्रावकादिपदार्थानामपि कृते निमित्तमित्यर्थः, अपिर्विस्मये, किलैतदर्थं को विवेकी ज्ञातसर्वानित्यत्वस्वरूपः कलहायत इति भावः, अयमभिप्रायो–यदि हि तेषां क्वचित् क्षान्त्यादिधर्मो मनसि निविशेत लज्जामर्य्यादे स्यातां, तदा नैतत् कुर्युरिति गाथार्थः ॥ ७ ॥

अथ लोभविषविकारं गाथाद्वयेनाह—

**अन्ने दक्खिन्नेण वि(व), नच्छंदमईए अहव जडयाए। आजीवियाभयेण वि, बहुजणायरणओ वावि ॥८॥**
**गारवतिगोवरुद्धा, लुद्धा मुद्धाण जुगपहाण त्ति। अप्पाणं पयडिंता विवरीयं बिंति समयत्थं ॥ ९ ॥**

व्याख्या–'अपरे' अन्ये विपरीतं समयार्थं वदन्तीति योगः, किं कुर्वाणाः? इत्याह–आत्मानं 'प्रकटयन्तः' प्रकाशयन्तः, कथमित्याह–'युगं' वर्त्तमानः कालः तत्र शेषाचार्याद्यपेक्षया प्रभूतागमत्वेन 'प्रधानाः' श्रेष्ठा युगप्रधानाः, वयं संप्रतियुगप्रधाना इत्येवं 'मुग्धानाम्' अविचारकश्रावकाणां पुरत इति शेषः, वस्तुवृत्त्या तु कीदृशाः ते इत्याह–'गौरवाणि' आत्मनो गुरुत्वाभिमानकारीणि ऋद्धिरसशातलक्षणानि तेषां त्रिकं त्रिसंख्यत्वं तेनोपरुद्धा व्याप्ताः, तथा 'लुब्धा' वस्त्रपात्रान्नपानादिषु सातिशयलोभवन्तो, न हि एवंविधाः कदाचिद् युगप्रधाना भवन्ति, तेषामितरासाधारणविशिष्टगुणयोगित्वेन तीर्थकृत्सादृश्येन सिद्धान्तेऽभिधानात्, तथा चोक्तं महानिशीथे–"इत्थं चायरियाणं पणपन्नं हुंति कोडिलक्खाउ। कोडि सहस्से

द्वादश-कुलकम् ।

॥ १०४ ॥

एवं स्वरूपत्वे च युगप्रधानस्य कथमेषामात्मनि युगप्रधानारोपः संगच्छते, तदारोपेऽपि वा कथमेवं विपर्य्यस्तभाषणं परं सर्वत्र वस्त्रादिलाभलोभ एवापराध्यति, इति लोभविषविकारदर्शनमेतदिति गाथाद्वयार्थः ॥ ८-९ ॥

तदेवं लोभाभिभूतानां कुचेष्टितं कुवचनं च पश्यन् ग्रन्थकारः सविषादमाह—

न परं न कुणंति सयं, अवि य भयमएहिं निंति सुत्तत्थं। जं समइपहेण तयं, अहह महामोहमाहप्पं १०

व्याख्या-'न परं' न केवलं 'न कुर्वन्ति' न विदधति, 'स्वयम्' आत्मना 'सूत्रार्थम्' आगमोक्तमनुष्ठानं शुद्धचारित्रप्रतिपालनरूपमपि च किन्तु 'भयमदाभ्याम्' [illegible]राभ्यां, किमित्याह-यन्नयन्ति प्रापयन्ति व्याख्यानयन्ति 'सूत्रार्थम्' आगमाभिधेयं चैत्यसाधुसमाचारीविध्यविधिलक्षणं, 'स्वमतिपथेन' आगमगीतार्थाचरणानपेक्षाभिनिविष्टस्वबुद्धिमार्गेण, तकत् तदित्यर्थः, 'अहहेति' खेदे, 'महामोहमाहात्म्यं' प्रबलतराज्ञानप्रभावोऽयम्, अयमभिप्रायो-यत् तावदागमोक्तं स्वयं न क्रियते इत्येतदपि मोहविलसितं, यत् तत्पुनस्तदपि अन्यथा व्याख्यायते शेषजनसंसारपातायै-तन्महत्तराज्ञानविजृम्भितमिति गाथार्थः ॥ ॥ १० ॥

एवं तावद् दुःषमाद्यनुभावभाविप्रव्रजितकुचेष्टितमभिधाय अथ गृहस्थानामपि तदाह—

एवंविहाण वि दढं, दूसमच्छेरयमहापभावेण । सड्ढालु मुद्धबुद्धी, भत्तीए कुणंति पूयाई ॥ ११ ॥

व्याख्या-'एवंविधानामपि' पूर्वोपदर्शितसूत्रोत्तीर्ण्णप्रवृत्तिमत्तया सर्वथा भक्तिबहुमानायोग्यानामपि, आस्तां तदितरेषां,

द्वादशं कुलकम् । १२

॥ १०४ ॥

208

मुग्धबुद्धयः पूजादिकं कुर्वन्तीति योगः, 'दढम्' अत्यर्थं, केनैत्याह—दशमाश्चर्यमहाप्रभावेणेति व्यक्तं, न हि असंयतपूजालक्षणाश्चर्यमाहात्म्यं विना एतत् संभवति, के कीदृशाः किं कुर्वन्ति? इत्यत आह—'मुग्धा' सिद्धान्तविचाराचतुरा बुद्धिर्मतिर्येषां ते तथा, कीदृशाः? 'श्रद्धालवो' भगवद्दर्शनमात्रे सातिशयप्रीतिभाजः, उभयत्रापि विभक्तिलोपः प्राकृतत्वात्, 'भक्त्या' बाह्यप्रतिपत्तिलक्षणया, 'कुर्वन्तीति' विदधति, 'पूजादिकं' पूजा वस्त्रान्नादिदानलक्षणा, आदिशब्दाद् विनयविश्रामणादिग्रहः, एवं मुग्धकृतपूजादर्शनेऽपि नैतेषु आस्था विधेया इति गाथार्थः ॥ ११ ॥

तथा—

अन्ने उदग्गकुग्गह—घत्था दुरहिगयसमयलेसेहिं। नट्ठेहिं नासिया आसिया फुडं सुन्नयावायं ॥१२॥

व्याख्या—एके तावत् शिथिलाचारभक्तिमन्तः संवृत्ताः, 'अन्ये' अपरे पुनः केचिद् गृहस्थाः शून्यतावादमाश्रिता इति योगः, कीदृशाः सन्तः? 'उदग्रकुग्रहग्रस्ता' उद्भटासदभिनिवेशाभिभूताः, तथा दुरधिगतसमयलेशैः—विपर्य्यस्तरूपतया दुष्टावगतसिद्धान्तलवैः साध्वाभासैः स्वयं नष्टैर्दर्शनानास्थया सदाचारभ्रष्टैः तैर्नाशिताः सांप्रतं ज्ञानदर्शनाभ्या-मेव तीर्थं वर्त्तते चारित्रं तु व्यवच्छिन्नमेव तदुपयोगिक्रियायाः सर्वथाऽभावादित्यादिवचनैः चारित्रिणः प्रति वैमुख्यमापादिताः, ततश्च ते शून्यतावादं सर्वथा धर्मवैकल्यदर्शनमाश्रिता अभ्युपगतवन्तः, 'स्फुटं' व्यक्तं, तथाहि—चारित्रिणामभावे क तदुपासकाः श्राद्धाः, तदभावे च वास्तवधर्माभाव एवेति शून्यतावादाश्रयणं, यथा चैतदयुक्तं तथा वक्ष्याम इति गाथार्थः १२

तदेवं भ्रष्टसमाचारसाधुश्रावकसद्भावेऽपि धीराणां धर्मे निश्चलत्वमाह—

इय बहुविहअसमंजस—जणदंसणसवणओ वि धीराण।
मणयं पि न चलइ मणं, सम्मं जिणमयविह(हि)न्नूणं ॥ १३ ॥

व्याख्या— 'इति' पूर्वोक्तप्रकारेण केवलायुक्तरूपतयाऽव्यवस्थिता प्रवृत्तिरसमंजसा तद्योगाद् जना अपि असमंजसाः, ततश्च बहुविधाः क्रोधलोभादिविषविकारदर्शनभेदेनासंयतपूजाविधानादिलक्षणेन चानेकप्रकाराः ते च ते असमंजसजनाश्च नाम साधुश्रावकलोकाः तेषां दर्शनं साक्षादुपलम्भः, श्रवणमन्यतः समाकर्ण्णनं, ततोऽपि, अपिर्विस्मये, एवंविधाऽसमंजसदर्शनादिकं हि प्रायो मा(म)नसो धर्मस्थैर्यध्वंसहेतु-र्भवति, परं 'धीराणां' सात्त्विकसत्त्वानामिति सामान्यवचनेन सुश्रावकाणामपि संग्रहं करोति, ततः किमित्याह—'मनागपि' अल्पमात्रमपि 'न चलति' नैवास्थैर्यं भवति 'मनः' चित्तं, यदुत सर्वेऽपि एवमसमंजसकारिण इति, केषामित्याह—'सम्यग्' यथावस्थितत्वेन, जिनमतविधिज्ञानां ये हि जैनदर्शनप्रवृत्तिप्रकारं तत्त्वतो विदन्ति, ते दशमाश्चर्यविलसितमिद—मित्यध्यवस्यन्ति स्तोकाश्च सुधर्मचारिणस्तत्रोच्यन्त इति न तेषां मनसि कथंचिद् कदाचित् धर्माभावो निविशते, ततो युष्माभिरपि धर्मे चित्तस्थैर्यमेव विधेयमिति उपदेश इति गाथार्थः ॥१३॥

अथ यत् प्राक् प्रतिपादितं सांप्रतं ज्ञानदर्शनाभ्यामेव तीर्थं प्रवर्त्तते चारित्रं तु अतिचारबाहुल्याद् व्यवच्छिन्नमिति, तन्निराकरणाय गाथाद्वयमाह— 

ता भासरासिगहविद्दु—रिए वि तह दक्खिणे वि इह खित्ते।

अत्थि च्चिय जा तित्थं, विरलतरा केइ मुणिपवरा ॥ १४ ॥
ते य बलकालदेसा–णुसारपालियविहारपरिहारा ।
ईसि सदोसत्ते वि हु, भत्तीबहुमाणमरिहंति ॥ १५ ॥

व्याख्या–यतोऽतिस्तोकचारित्रिजनदर्शिनां धीराणां प्रभूतासमंजसदर्शनेऽपि मनो न चलति, 'तत्' तस्माद् इह अस्मिन्नेव जम्बूद्वीपवर्त्तिनि न तु धातकीखण्डादिसंबन्धिनि तस्याप्रस्तुतत्वात्, 'क्षेत्रे' वर्षे, कीदृशे? 'दक्षिणे' मेरोर्दक्षिणदिग्वर्त्तिनि, 'विरलतरा' मुनिप्रवराः सन्तीति योगः, कीदृशे? 'भस्मराशिग्रहेण विधुरिते' पीडिते, क्षेत्रस्थसुसंघपीडासद्भावे क्षेत्रे पीडोपचारः, अपिर्विस्मये, पीडिते हि मुनिसद्भावो न संभाव्यत इति भावः। किमित्याह–यावद् यावन्तं कालं दुःप्रसभान्तं तीर्थं भगवत्प्रवचनं प्रवर्त्तते,तावदिति शेषः, 'सन्त्येव' विद्यन्ते एव, मुनिप्रवराः शुद्धचारित्रिणः तथा चोक्तं व्यवहारभाष्ये –"न विणा तित्थं नियंठेहि नातित्था य नियंठया। छक्कायसंयमो जाव ताव अणुसंजना दुण्हं ॥१॥" द्वयोरव्यवच्छेदो बकुशकुशीलयोः सामायिकच्छेदोपस्थापनीययोर्वेति, कियन्तः? इत्याह–'केऽपि' केचित्, अत एवाह–विरलतरा अतिस्तोकाः, ततो यदुक्तं चारित्रं सांप्रतं नास्तीति तन्निराकृतमिति । किं च चारित्राभाववादिनः प्रति व्यवहारभाष्ये साक्षेपः परिहार एवमुक्तोऽस्ति "केसिंचि य आएसो दंसणनाणेहि वट्टए तित्थं । वुच्छिन्नं च चरित्तं वयमाणे भाविया चउरो ॥ १ ॥" एवं वदति कश्चित् साध्वादौ पापविशुद्ध्यर्थं चतुर्गुरुकाः प्रायश्चित्तविशेषा इत्यर्थः । तथा–"जो भणइ नत्थि धम्मो न य

सामाइयं न चेव य वयाइं। सो समणसंघवज्झो कायवो समणसंघेणं ॥ १ ॥" तथा पूर्वसाध्वपेक्षया हीनतरक्रियापरिणामत्वेऽपि दुःषमासाधूनां साधुत्वमेव, यदाह–"सत्थपरिन्ना छक्कायअहिगमो पिंड उत्तरज्झाए। रुक्खेवसहो गाहे जोहे सोही य पुक्खरिणी ॥ १ ॥" अयमर्थः–पूर्वं शस्त्रपरिज्ञाध्ययनमुत्थापनाहेतु–रासीद्, अधुना षट्कायाधिगमः षड्जीवनिकायाध्ययनमित्यर्थः। एवं पिण्डग्रहणहेतु–राचारो दशवैकालिकं च, तथोत्तराध्ययनानि आचारस्योपरि, इदानीं तु दशवैकालिकस्येति, पूर्वं वृक्षाः कल्पवृक्षाः, अधुना तु सहकारादयोऽपि ते, शोधिः षाण्मासिकी प्राग्, अधुना पञ्चकल्याणकदशकल्याणकादिरिति, न च सा न भवति, एवं पूर्वं गौतमादयः साधवः, सांप्रतं तु अशठा यथाशक्ति संयमोद्योगवन्तः तादृक्क्रियाविकला अपि साधव एवेति, (१४) न चैते किंचित्क्रियाहीनत्वे भक्त्यादिकं नार्हन्तीत्याह—

ते च भक्त्यादिक–मर्हन्तीति योगः, ये पूर्वमुनिप्रवरा अभिहिताः ते च ते पुनः कीदृशाः सन्तः? 'बलं' शारीरं मानसं च सामर्थ्यं, 'कालो' दुःखमादिरूपो ग्रीष्मादिरूपो वा, देशोऽनूपो मरुदेशो वा, ततो बलं चेत्यादिद्वन्द्वः तेषा–मनुसारोऽबाधा, तेन पालितविहारपरिहाराः, तत्र विहारः तावत् सम्यक्समस्तयतिक्रियाकरणं, परिहार इति सामयिकी भाषा, स च द्विविधः, परिभोगधारणारूपतया, तत्र यद् वस्त्रादिकं प्रत्युपेक्ष्य तदैव परिभुज्यते एष परिभोगपरिहारः यच्च प्रत्युपेक्ष्य ध्रियते कम्बलादिकं, न तु तदैवोपभुज्यते स धारणापरिहारः, ततः पालितौ सम्यगासेवितौ विहारपरिहारौ यैः ते तथा, अनेन यथाशक्ति समस्तक्रियापरत्व–मेषामुक्तम्, एते चेषद् मनाक् सदोषत्वेऽपि कदाचिद् मुखपादादिप्रक्षालनवर्षाकालाप्राप्तावपि वस्त्रधावनाद्यल्पदूषणवत्त्वेऽपि, आस्तां निर्दोषत्वे, भक्तिश्च बहुमानश्चेति समा- ॥१०६॥

मार्गदर्शक :- आचार्य श्री सुविधिसागर जी महाराज

हारद्वन्द्वः, तदर्हन्ति तद्योग्या भवन्ति, न तु पार्श्वस्थादिवत् [illegible]था तदयोग्याः तस्माद् भवद्भिरपि तादृशेषु भक्ति-बहुमानौ विधेयाविति भाव इति गाथाद्वयार्थः ॥ १४ ॥ १५ ॥

पुनरपि तादृशामेव विशेषतः पूज्यतोपदेशमाह ने

ते य असढं जयंता, सुबुद्धिओ मुणियसमयसब्भावा [illegible]इसि सकसायभावे, पि हुंति पुज्जा बुहजणाण १६

व्याख्या–त एव मुनिप्रवराः पूज्या भवन्तीति सम्बन्धः, 'ते [illegible]वेति' चोऽवधारणे तेन त एव सुसाधवः, कीदृशाः? यतमानाः सम्यक् समस्तयतिक्रियासु प्रवर्त्तमानाः, कथमित्याह–'अ[illegible]ठमिति' भावप्रधानत्वान्निर्देशस्य न विद्यते शाठ्यं छद्म यत्र तदशठमिति क्रियाविशेषणम्, अनेन तेषां क्रियावत्त्वमुक्तं, त[illegible]था 'सुबुद्धितः' शोभनस्वमतिप्रकाशत्वात् 'ज्ञातसमयसद्भावाः' विदितसिद्धान्तपरमार्थाः, गुरुषु सम्यक् सिद्धान्तरहस्यमर्मभि[illegible]दधत्सु अपि न जडमतेः कथंचित् सिद्धान्तार्थपरिज्ञानमिति सुबुद्धिग्रहणं, न तु स्वात्मप्रेक्षिततत्त्वं सुबुद्धित्वं, तस्य सर्वथा [illegible]सिद्धान्तार्थानवबोधेनानादेयत्वात्, तथा चोच्यते –"न हि भवति निर्विगोपकमनुपासितगुरुकुलस्य विज्ञानम्। प्रकटितपश्चा[illegible]द्भागं पश्यत नृत्तं मयूरस्य ॥१॥" इति, अनेन च ज्ञानवत्त्वम्, एवं च समस्तसाधुगुणसमेतत्व–मुक्तं, ततश्च ( ईषत् मना[illegible]क् ) सकषायभावेऽपि संज्वलनक्रोधादिमत्त्वेऽपि, आस्तां तदभाववत्त्वे इत्यपेरर्थः, अयमभिप्रायः–कदाचित् केनापि गुरुपरिभ[illegible]वे मनाक् क्रोधे परप्रतिवादिनि वा मार्गाधिक्षेपकारिणि अहंकारे, क्वचिद् भूपादौ संघप्रत्यनीकतां भजमाने मायायां, क्वचिद[illegible]पूर्वशास्त्रग्रहणलोभे सति अपि न साधुत्वध्वंस

इति तत्सद्भावेऽपि भवन्ति संपद्यन्ते, 'पूज्याः' सर्वप्रकारेणाराध्याः, 'बुधजनानां' सिद्धान्तरहस्यविचक्षणलोकानां, तदत्र यूयमपि सद्गुरूपदेशश्रवणादिना बुधाः तादृशानां च सुमुनिषु पूजाविधानं समीचीनमेवेति, एतदुक्तं भवति-समस्तेष्वपि कुलकेषु देवपूजादिकं श्रावकानुष्ठानं समस्तमपि अभ्यधायि, तस्य चेदं तात्पर्यं-यदुतासमंजसजनप्रवृत्तिदर्शनादिना कदाचिन्मनसि नास्थैर्यं विधेयं, तद्विधाने हि सर्वमपार्थकं स्याद् इत्येतत् पर्यन्तोपदेशकुलक-मिति गाथार्थः ॥ १६ ॥

इति श्रीयुगप्रवरागमश्रीमज्जिनपतिसूरिशिष्यलेशविरचितायां द्वादश[illegible]लकवृत्तौ द्वादशकुलकविवरणं समाप्तम् ॥

समाप्ता चेयं द्वादशकुलकवृत्तिः, नमोऽस्तु सरस्वत्यै, नमोऽस्तु [illegible]मज्जिनपतिसूरिपादेभ्यः, शुभं भवतु ॥

## प्रशस्ति।

जयन्ति सन्देहलतासिधाराः श्रोत्रप्रमोदामृतवारिधाराः। सूरेर्गिरः श्रीजिनवल्लभस्य प्रहीणपुण्याङ्गिसुदुर्लभस्य ॥ १ ॥
आसन् नात्र मुनीश्वराः सुबहव-श्चारित्रलक्ष्म्यास्पदं, स्तोक[illegible] श्रीजिनवल्लभेन सदृशा निर्भीकवाग्विस्तराः।
संग्रामे गहनेऽपि भूरिसुभटश्रेण्या वरे भारते, तुल्याः श्री[illegible]वाजिना विजयिना वीराः कियन्तोऽभवन् ॥ २ ॥
जिनदत्त इति श्रीमान्, सूरिस्तत्पदभूषणः। जज्ञे सज्ज्ञान[illegible]णिक्यरोहणो विधिपोषणः ॥ ३ ॥
यस्य प्रातिभमञ्जुरूपकमलां चालोक्य वाचस्पति-र्देवोऽप्[illegible]तबुद्धिवैभवमदः सोऽन्तर्दधे लज्जया।

नूनं सारतराणुसंचयचिताऽत्यन्ताद्भुतश्रीस्तनौ, स श्रीमा[illegible]नचन्द्रसूरिरभवच्छिष्याग्रणीस्तत्पदे ॥ ४ ॥
नानासद्वादकेलीविदलितविलसन्मानशैलः परेषां, रेखां यः [illegible]प विद्वत्स्वनितरसुलभां सर्वविद्यावतंसः ।
दृष्टान्तत्वं चरित्रिष्वलभत कुमुदध्वान्तविध्वंसहंसः, स श्रीम[illegible]न् सूरिराजो जिनपतिरभवत् तत्पदालङ्करिष्णुः ॥ ५ ॥
चक्रे तच्छिष्यलेशैर्निरुपमजिनपालाभिधेयैः प्रसादा–दत्युग्राद् सद्गुरूणां कुलकविवरणं किंचिदेतत् सुबोधम् ।
तच्छोध्यं सूरिवर्यैर्मयि विहितकृपैः संभवन्त्येव यस्माद्, दोषाश्छद्मस्थवाक्ये किमुत कुवचने मादृशां मान्द्यभाजाम् ॥ ६ ॥
श्रीमत्सूरिजिनेश्वरस्य सुमुनिव्रातप्रभोः सांप्रतं, शीघ्रं चारुमहाप्रबन्धकवितुर्वाक्यात् समारम्भि यत् ।
तन्निष्ठामधुना ययौ गुणनवादित्य ( १२९३ ) प्रमाणे व्रजे, वर्षे भाद्रपदे सितै शुभतरे द्वादश्यहे पावने ॥ ७ ॥
जम्बूद्वीपे पुरेऽस्मिन् वहति हि जगती प्रोन्नताशाललीलां, यावद् यावच्च वारिस्त्वकितपरिखाविभ्रमं वारिराशिः ।
श्राद्धैः श्रद्धाविशुद्धैः सुविहितयतिभिश्चादृतैर्बुद्धिमद्भि–र्नन्द्यान्निर्विघ्नमेतद् विवरणममलं सन्ततं पठ्यमानम् ॥ ८ ॥
त्रयस्त्रिंशच्छतान्येव त्रिषष्ट्या संगतानि च । प्रत्यक्षरं प्रमाणं भोः श्लोकानामिह निश्चितम् ॥ ९ ॥

शुभम् ।

214

॥ समाप्तं द्वादशकुलकम् ॥